MANUSHA

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar
Digitized by Arya Samaj Foundation Chennai and eGangotri

G.K.V.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

111677

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षं] January, 1954 [पञ्चमी संख्या

भाञ्जूषा

111077

सम्पादकः—श्रीचितीशचन्द्र-चट्टोपाध्यायः

Next Month

1. Abhinavagupta, the great rhetorician. 2. The authorship of the Bhagavadgita, 3. Tagore's short story. 4. Asoka Inscription. 5. On sugar-candy. 6. Notes and Queries, etc

Just Out ! **Just Out !!**

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Four.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) मासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

स्त्रोप्रशंसा—वराहमिहिरस्य श्लोकाः

भट्टोत्पलटीकया विद्यावाचस्पतिविरचिताभिनवविस्तृतव्याख्यया च विभूषिता। मूल्यं रूप्यकमात्रम्।

Convocation Address in Ancient India -12-

Popular Etymology— Re. 1/-

शब्दकथा— २৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষায় চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া**, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওত-প্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে. 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরলভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/৹

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) **of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs 5/12/- for the lot.**

শ্রীবিশ্বনাথ-চট্টোপাধ্যায়ঃ।

৮১ শ্যামবাজার ষ্ট্রীট, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111077

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरण नान्यदुपैमि दैवतम् ।।

मञ्जूषा

January, 1954 | १८७५-शकीयमाघस्य ८म-वर्षस्य पञ्चमी संख्या | Vol. VIII No. 5

आभाणकमाला

A wilful man will have his way.

क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत् ।। कुमारसम्भवः ।

Never take a stone to break an egg, when you can do it with the back of your knife.

Ne'er take a forehammer to break an egg, when you can do it with a pen-knife.

मा ग्रहीः[1] प्रस्तरं वत्स [2]कुक्कुटाण्डस्य भेदने ।
क्षुरिकावरभागेण यदि तत् सुशकं भवेत् ।।
"कररुहसाध्ये किं परशुना ।"
[3]मोद्यंस्था मुद्गरं मूढ कुक्कुटाण्डस्य भेदने ।
कर्तरीपृष्ठभागेन कर्तुं तच्छक्यते यदि ।।

---

1 माङि लुङ् इति लुङ् । न माङ्योगे इत्यडागमनिषेधः ।
2 कुक्कुटा अण्डम् कुक्कुटाण्डम् । कुक्कुटादीनामण्डादिषु इति पुंवद्भावः ।
3 "समुदाङ्भ्यो यमोऽग्रन्थे" इत्यात्मनेपदम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३। (वङ्गीयः) यार नाम भाजा चाल तारइ नाम मुड़ि।*
यार माथाय पाका चुल तारेइ वले वुड़ी ॥
भृष्टो यस्तण्डुलो नाम तन्न्याक्यमभिधीयते।
यस्या मूर्ध्नि कचाः शुक्लाः सैव वृद्धेति कथ्यते ॥

There is no more difference between them than between a broom and a besom.

JOHN LYLY, *Euphues and this England.*

Some say, compared to Bononcini,
That Mynheer Handel's but a ninny ;
Others aver that he to Handel
Is scarcely fit to hold a candle.
Strange all this difference should be
'Twixt Tweedledum and Tweedledee !

JOHN BYROM, *On the Feud Between Handel and Bononcini.*

अनुरूपोक्तयः

दलति हृदयं गाढोद्वेगं द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥

उत्तररामचरितम्। ३।३१

अन्वयः। गाढोद्वेगं (गाढ उद्वेगः यस्मिन् तत्) हृदयं दलति (स्फुटति), किन्तु द्विधा न भिद्यते। विकलः कायः मोहं वहति, चेतनां [पुनः] न मुञ्चति। अन्तर्दाहः तनूं ज्वलयति, भस्मसात् [तु] न करोति। मर्मच्छेदी विधिः प्रहरति, जीवितम् [पुनः] न कृन्तति।

There are crushed hearts that will not break ;
And mine, methinks, is one ;

* न्याक्यम् भृष्टतण्डुलम्, मुड़ी इति भाषा। शब्दकल्पद्रुमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Or thus I should not weep and wake
And thou to slumber gone.

H. P. LYTE, *A Lost Heart.*

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥

उत्तररामचरितम् । २।२७

अन्वयः । पुरा यत्र सरितां (नदीनां) स्रोतः आसीत्, अधुना तत्र पुलिनम् (दृश्यते), क्षितिरुहाम् (वृक्षाणां) घनविरलभावः विपर्यासं यातः (पुरा यत्र निबिडत्वमासीत् इदानीं तत्र विरलत्वं सञ्जातम्, यत्र च विरलत्वम् आसीत्, तत्र निबिडत्वं सञ्जातम्) । बहोः कालात् [अनन्तरं] दृष्टम् इदं वनम् अपरं [वनम्] इव मन्ये । शैलानां (पर्वतानां) निवेशः (यथापूर्वम् अवस्थानं) तत् इदं (तदेव पूर्वानुभूतम् इदं वनम्, न खलु वनान्तरम्) इति बुद्धिं (प्रत्यभिज्ञां) द्रढयति (दृढीकरोति) ।

"When I have seen the hungry ocean gain
Advantage of the kingdom of the shore,
And the firm soil win of the watery main,
Increasing store with loss and loss with store."

SHAKESPEARE, *Sonnet* LXIV.

अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां
मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणक्लीबताम् ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया
[1]स्वेच्छादुर्ललिताद्भुतव्यसनिने देवाय तस्मै नमः ॥

सुभाषितावलिः ।

---

[1] लीलादुर्ललितेति सूक्तिमुक्तावल्यां पाठः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतरत्नमञ्जूषा

भीष्म उवाच ।

अत्राप्युदाहरन्ती[2]ममितिहासं पुरातनम्[3] ।
[4]बृहस्पतेश्च संवादं शक्रस्य च युधिष्ठिर ।।

शक्र उवाच ।

किंस्विदेकपदं ब्रह्मन् पुरुषः सम्यगाचरन् ।
[5]प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् ।।

बृहस्पतिरुवाच ।

[1]सान्त्वमेकपदं शक्र पुरुषः सम्यगाचरन् ।
प्रमाणं सर्वभूतानां यशैश्चवाप्नुयान्महत् ।।
एतदेकपदं[6] शक्र सर्वलोकसुखावहम् ।
आचरन् सर्वभूतेषु प्रियो भवति सर्वदा ।।
यो हि नाभाषते किञ्चित् सर्वदा भ्रुकुटीमुखः[7] ।
द्वेष्यो भवति भूतानां स सान्त्वमिह नाचरन्[8] ।।
यस्तु सर्वमभिप्रेक्ष्य पूर्वमेवाभिभाषते ।
[9]स्मितपूर्वाभिभाषी च तस्य लोकः प्रसीदति ।।
दानमेव हि सर्वत्र सान्त्वेनानभिजल्पितम् ।
न प्रीणयति भूतानि निर्व्यञ्जनमिवाशनम् ।।

---

[1] सान्त्वम्—निष्कपटप्रियवचनम् । [2] उदाहरन्ति– कथयन्ति । [3] पुरातन is a later word than पुराण. [4] बृहस्पतेः शक्रस्य च संवादम् इत्यन्वयः । शक्रः इन्द्रः । संवादः—Conversation. In Bengali the word in used in the sense of news and संवादपत्र means newspaper. [5] There is a zeugma here : सर्वभूतानां प्रमाणं भवेत् यशश्च महत् आप्नुयात । [6]एकपदं—in one word. [7]सर्वदा भ्रुकुटिमुखः—always with a frown on his brow. [8]नाचरन्—अनाचरन्. It is a सुप् सुपा compound of न and आचरन्. [9]स्मितपूर्वाभिभाषी—स्मितं पूर्वं यस्मिन् तद् यथा स्यात् तथा स्मितपूर्वम् (बहुव्रीहिः), स्मितपूर्वम् अभिभाषितुं शीलं यस्य. Who is accustomed to speak with a smile.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदानादपि भूतानां मधुरामीरयन् गिरम् ।
सर्वलोकमिमं शक्र सान्त्वेन कुरुते वशे ॥
तस्मात् सान्त्वं प्रयोक्तव्यं दण्डमाधित्सतापि[2] हि ।
फलं च जनयत्येवं न चास्योद्विजते जनः ॥
सुकृतस्य हि सान्त्वस्य[3] श्लक्ष्णस्य मधुरस्य च ।
सम्यगासेव्यमानस्य तुल्यं जातु न विद्यते ॥

भीष्म उवाच ।

इत्युक्तः कृतवान् सर्वं यथा शक्रः पुरोधसा ।
तथा त्वमपि कौन्तेय सम्यगतत् समाचर ।

स्वर्णमृगः

[स्वर्गत-रवीन्द्रनाथठाकुरस्य]

(३)

इत आरभ्य गृहकार्यमधिकृत्य यदैव वैद्यनाथस्तुच्छमप्यभिमतं प्रकटयितुमुद्युङ्क्ते तदैव गृहिणी तीव्रमधुरेण स्वरेण वदति, बुद्धेः परिचयो बहुधा प्रदत्तः, इदानीं कियन्तिचिद्दिनानि विरतोऽवतिष्ठस्वेति । वैद्यनाथः सर्वथा निर्वाण एव भवति ।

मोक्षदया तथाविधायाः श्रेष्ठताया भाव आस्थितः यथा प्रतीयते न खलु स्वर्णमरीचिकयानया सा मुहूर्तमपि समाश्वस्तेति ।

सापराधो वद्यनाथः पत्नीं कथमपि तोषयितुं विविधान् उपायानचिन्तयत् । एकदा च कस्मिंश्चन चतुष्कोणे पत्रपुटे निभृतमुपहारमादाय पत्नीमुपसृत्य प्रभूतहास्यविकासपुरःसरं निरतिशयेन चातुर्यण स्कन्धौ सञ्चाल्यावदत्, उच्यतां तावत् किं मयानातमिति ।

---

[1]ईरयन्—उच्चारयन् । "सर्वस्वं गृहीत्वापि सान्त्वं प्रयुञ्जानस्य वशे लोके भवति ।" [2]आधित्सता—आ-धा+सन्—शतृ, तृतीयैकवचनम्, आधातुमिच्छता; प्रयोक्ष्यमाणेन । [3]श्लक्ष्ण—slippery, smooth, soft, tender.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्नी कौतूहलं संगोप्य तटस्थाब्रवीत्, कथं वा मयोच्येत ? न खल्वहं दैवज्ञेति ।

वैद्यनाथोऽनावश्यकं कालव्ययं विधाय प्रथमतस्तावत् सूत्रस्य ग्रन्थिं शनैरुन्मोचितवान्, ततश्च फूत्कारेण फूत्कारेण पत्राणां धूलिमपासारयत्, ततश्चातिमात्रेणावधानेनैकैकं पर्वापावृत्य पत्रपुटमुन्मोच्य आर्ट्स्टुडियोनिर्मितं वर्णरञ्जितं दशमहाविद्यानां चित्रं निष्कास्यालोकमभि प्रत्यावर्त्य गृहिण्याः पुरतोऽधारयत् ।

तदात्व एव विन्ध्यवासिन्याः शयनकक्षस्थितानि वैदेशिकतैलचित्राणि गहिण्याः स्मृतिपथमवतीर्णानि, उक्तं च तया, हन्त मातर्जीवामि जीवामि ! तवैव बहिः प्रकोष्ठे संस्थाप्य निषद्य निषद्य निरीक्ष्यतामिदम् । न खल्वेतेन मम कार्यम् इति ।

विषण्णो वैद्यनाथोऽबुध्यत स खलु सहैवेतराभिः शक्तिभिर्योषिदनुरञ्जनस्य दुर्लभशक्त्यापि वञ्चितो विधात्रेति ।

इतश्च तद्दृशे यावन्तो दैवज्ञा आसन् मोक्षदा सर्वेभ्य एव तेभ्यः पाणिरेखाः प्रादर्शयत्, जन्मपत्रिकां च समदर्शयत् । सर्व एवाब्रुवन् सा खलु जीवद्भर्तृकव मरिष्यतीति । परं न खल्वसौ परमानन्दमयस्यास्य परिणामस्य कृते सर्वथा व्यग्रासीत्, अत एव न खल्वेतावतापि निववृते तस्याः कुतूहलम् ।

आकर्णितं च तया, शोभनमेव स्वं पुत्रभाग्यम् । न चिरादेव पुत्रश्च दुहितृभिश्च तस्या गृहं पूर्णं भविष्यतीति सम्भाव्यते इति । श्रुत्वा न खलु विशेषतः कोऽपि हर्षस्तया प्रकटितः ।

अन्ततश्चैकेन गणयित्वोक्तम्—वत्सराभ्यन्तरेण चेद् वैद्यनाथो दैवधनं न प्राप्नुयात्, अहं पुस्तकपञ्चाङ्गादिकं सर्वमेवाग्निसात् करिष्यामीति । गणकस्य निदारुणं पणमिमं श्रुतवत्या मोक्षदाया मानसे तिलमात्रस्याप्यविश्वासस्य कारणं नावाशिष्यत ।

गणकस्तावत् प्रभूतं पारितोषिकं परिगृह्य प्रययौ, वैद्यनाथस्य जीवनं पुनर्दुर्वहमेव सञ्जातम् । अर्थोपार्जनस्य केचन सामान्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111077....

पन्थानो वर्त्तन्ते, यथा कृषिः, शकवृत्तिः, वाणिज्यं, चौर्य्यं विप्रलम्भश्च। परं दैवधनोपार्ज्जनस्य तथाविधः कोऽपि निर्दिष्ट उपायो नास्ति। अत एव मोक्षदा यथा यथा समुत्साहयति भर्त्सयते च तथा तथा वैद्यनाथः क्वापि पन्थानं नाधिगच्छति। कतमत् स्थानं खनितुमारप्स्यते, कतमस्यां पुष्करिण्यां निमज्जकान् अवतारयिष्यति, गृहस्य कतमं प्राचीरं भञ्ज्यात्, चिन्तयन्नपि किमपि निर्णेतुं न प्रभवति।

मोक्षदा च सातिशयमपरक्ता भर्तारं व्यज्ञापयत्, न खलु मयेतः पूर्वं स्वप्नेऽपि सम्भावितं यत् पुरुषस्य मस्तके मस्तिष्कस्य स्थान एतावद् गोमयं तिष्ठेदिति।

तयोक्तम्। किञ्चिच्चलनारोहणादिकं स्वीकुरु। उद्यमं तावदातिष्ठ। न खलु मुखं व्यादायोपविष्टे त्वयि वियतो रूप्यकवृष्टिर्भविष्यतीति।

वचनमिदं समीचीनमेव, सैव च वैद्यनाथस्यैकान्तिकी वाञ्छा, परं कस्यां दिशि चलिष्यति किं वारोक्ष्यति तत्तु केनापि नोच्यते। अत एव प्राङ्गणे निषद्य वैद्यनाथः पुनरपि यष्टितक्षणे प्रवृत्तः। (क्रमशः)

इध्मः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अमरकोषे दृश्यते—काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम् [२।४।१३] इति। अत्र इध्मम् इति पाठश्चिन्त्यः, इध्मशब्दस्य प्रायेण सर्वत्रैव पुंलिङ्गत्वदर्शनात्। अत्र क्षीरस्वामिनोक्तम्—"विशेषमाह—इन्धनं त्विति।.....आद्यमेध एधेरसुनि दाह्यदार्वर्थे, अपर एधः....इन्धेर्घञि साधुः" इति। अत्र रायमुकुटव्याख्यानम्—ञि इन्धी दीप्तौ। इध्यते दीप्यतेऽग्निरनेनेति ल्युट्। इन्धनम्। एधतेऽनेनाग्निरित्यसुन् एधेः, इन्धेर्वा,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाहुलकान्नलोपः। गुणः। एधः सान्तम्। इध्यतेऽनेनाग्निरिति षियुधीन्धिदसिश्याधूसूभ्यो मक् [उ० १।१४२]। किन्त्वादनुनासिकलोपे इध्मम्। हलश्चेति [३।३।१२१] करणे घञ्। अवोदैधोद्म्नेत्यादिना [६।४।२९] नलोपो निपातितः। एधः। पुंस्ययम्। एधान् हुताशनवतः [रघुवंशे ९।८१] इति कालिदासः। समिध्यतेऽनया। इन्धोः सम्पदादित्वात् क्विप्। इति।

भानुजिदीक्षितेन प्रायेण रायमुकुटस्यैव सरणिरनुसृता, केवलं स्वपुस्तकेषु इन्धेर्वा इत्यंशस्य लेखकानवधानाल्लुप्तत्वात् उक्तम्—यत्तु "बाहुलकान्नलोपो गुणश्च" इति मुकुटः, तन्न, एधतेरुभयासम्भवात्। इति। अत्र शिवदत्तमहोदयेनोक्तम्—"इन्धेर्बाहुलकान्नलोपः"* इत्येवं पाठस्य मुकुटपुस्तकेषु दर्शनेन सर्वसङ्गत्या प्रतारणपरमेवैतत् इति। वयं तु ब्रूमः मुकुटदोषोद्घाटनव्यसनितया भानुजिदीक्षितेन स्वपुस्तकेषु त्रुटितोऽंशो नानुमितः, कथं वा बृहस्पतिकल्पो रायमुकुटोऽसतो नकारस्य लोपं विदध्यात् अविद्यमानस्य च इकारस्य गुणं प्रतिजानीत इत्यपि न चिन्तितम्। पित्तोपहतदर्शनः किं वा पीतं न पश्यति?

यथास्माभिर्दृष्टं तथा सर्वैष्टीकाकृद्भिः 'इध्मम्' इति पठ्यते, द्वितीयस्य चैधशब्दस्य पुंलिङ्गत्वं चाभ्युपगम्यते। एतत्तु न समीचीनतया प्रतिभाति। इन्धनमिति रूपं शब्दस्य नपुंसकत्वमवबोधयति। तत्साहचर्याच्च एधः-शब्दोऽपि नपुंसकः। ततश्च इध्म इति पुंलिङ्गः पठनीयः। तस्य च रूपमेव पुंस्त्वं प्रत्याययेत्। तत्साहचर्यात् एधोऽपि पुंलिङ्गो बोध्यः। ततश्च समिच्छब्दस्य स्त्रीलिङ्गत्वं कण्ठत एवोक्तम्।

उणादिसूत्रवृत्तिषु दशपाद्यां पञ्चपाद्यां च शब्दस्यास्य पुंलिङ्गत्वं

---

* अस्मदीये हस्तलिखिते पुस्तके—एध-विन्धेर्वं बाहुलकान्नलोपः। गुणः। इति पाठः। एतस्माच्च एधेरिन्धेर्वा इति पाठः प्रतीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादितम्। पेरुसूरिणा विस्पष्टमेवोक्तम् —इध्मः पुंसि प्रकथितः काष्ठे काले च सूरिभिरिति। ततश्चैकीयमतमुपन्यस्तम्—काष्ठ तु न द्वयोरिति।

परोपकारः

(Theory and Practice)

[श्रीफटिकलालदासः]

चन्द्रो नाम द्विजः कश्चित् प्रत्युवास पुरोत्तमे।
स स्वपुत्रमशान्नित्यं धर्मबुद्धिविवृद्धये॥
एकदा पुत्रमाहूय जगाद वचनं महत्।
"भो भोः पुत्र त्वया नित्यं कर्तव्यो धर्मसंग्रहः॥
दरिद्राय धनं देयं, भोज्यादि च बुभुक्षवे।
नग्नगात्राय वासश्च व्याधिताय च भेषजम्॥
क्षन्तव्याः शत्रवो घोराः सदोषा बान्धवा अपि।
कीटस्यापि सदा रक्ष्याः प्राणाः सर्वप्रयत्नतः॥
यत् किञ्चिदेकमेतेषामन्यद्वा नियतं चर।
मामुपेत्य च सन्ध्यायां कृत्यं प्रात्यहिकं वद॥"
पितुरेवं समाकर्ण्य शासनं सुमहत् सुतः।
तस्माद्दिनात् प्रभृत्येव स्वं न्ययुङ्क्त प्रसाधने॥
कालेन गच्छता पित्रैकदा प्रोक्तः सुतः स्वयम्।
"यदद्य विहितं पुण्यं कृत्यं तन्मे निवेदय॥"
श्रुत्वा पितृवचः पुत्रः प्रत्युवाच सुगर्वितः।
"रक्षिता मूषकप्राणा मयाद्य दुःखवेदिना॥"
पिता— साधु वत्स कृतं साधु धन्योऽसि मम पुत्रक।
कथ्यतां कथमेतद्धि त्वया बालेन साधितम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रः— अद्य प्रातर्मया दृष्ट आखुरेकः पुरः सरन् ।
मार्जारेण समाक्रान्तः कृतान्तेनेव देहिना ॥
दृष्ट्वैतज्जातकारुण्यो मूषकासुररक्षिषुः ।
लोष्टेनाहं समाहन्य विडालं हतवान् क्षणात् ॥
स आखुराशु लब्धासुर्बिलं विवेश वेगवान् ।
प्राणदाता भयत्राता तस्याहं निर्वृतिं गतः ॥
श्रुतोदन्तः पिता हन्त निन्दन् पुत्रविचेष्टितम् ।
जगादोच्चैरहो वत्स किं त्वया दारुणं कृतम् ॥
विचारमूढतामाप्तस्त्वमित्थं प्रतिभासि मे ।
नोचेद्धत्वा विडालं हा कथमाखुर्विरक्षितः ॥
अहिंसा चेत् परो धर्मः सर्वशास्त्रपुरस्कृतः ।
एकस्य रक्षणव्याजान्नाशोऽन्यस्य न युज्यते ॥
भो भोः पाठकवर्या मे वृत्तान्तो नानृतो ह्ययम् ।
विस्मयं चेद् गता यूयं सारं मे श्रूयतां वचः ॥
किं चित्रं यद्यहत्वैकं नापरस्य समुन्नयः ।
आब्रह्मस्तम्बपर्यन्तं विधिरेष सनातनः ॥
हननं बहुधा प्रोक्तं, नैकं प्राणविनाशनम् ।
परवित्तापहारेण शोषणञ्चापि हिंसनम् ॥
दरिद्रानेव हत्वैवं जीवन्ति धनिका जनाः ।
क्रेतृवर्गं समाहन्य श्रीमन्तो व्यवसायिनः ॥
अहो राजा प्रजा हत्वा क्षेत्रपश्च कृषीवलान् ।
धनधान्यसमायुक्तो प्रासादमधितिष्ठतः ॥
शतमारी भवेद्वैद्यः सहस्रघ्नश्चिकित्सकः ।
स्वर्गकामाः सदा यज्ञे यज्वानः पशुघातिनः ॥
वैधी हिंसाऽथवाऽवैधी विश्वे सा सर्वतोमुखी ।
अहिंसा परमो धर्मः शास्त्रेष्वेव व्यवस्थितः ॥]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औत्तराधर्यम्

कस्य वा न विदितो मर्त्यस्य भुजङ्गानां भेकैः सह शाश्वतिको विरोधः? भुजङ्गा हि प्रायेण भेकदर्शं भक्षयन्ति। साम्प्रतं पुनर्वृत्तान्तपत्रेषु भेककर्त्तृकं भुजङ्गनिगरणमुपवर्णितम्। हाजारिबागान्तःपातिनि छातरानिगमे ढाउससमाख्यः कश्चनातिबृहन् भेकः सार्द्धहस्तपरिमितं भुजङ्गममेकं न्यगिरत्। निरवधौ काले विपुलायां च पृथ्व्यां कति वाश्चर्याणि न सन्दृश्यन्ते।

अशोकस्य शिलालेखः

(४)

अतिक्रान्तमन्तरं बहूनि वर्षशतानि वर्द्धित एव प्राणालम्भः, विहिंसा च भूतानाम्, ज्ञातिष्वसंप्रतिपत्तिः, ब्राह्मणश्रमणानाम् असंप्रतिपत्तिः। तदद्य देवानांप्रियस्य प्रियदर्शिनो राज्ञो धर्म्मचरणेन भेरीघोषोऽभूद्धर्मघोषः। विमानदर्शनाच्च हस्तिदर्शनाच्च अग्निस्कन्धान् च अन्यानि च दिव्यानि रूपाणि दर्शयित्वा जनम्, यादृशं बहुभिर्वर्षशतैर्न भूतपूर्व्वम्, तादृशमद्य वर्द्धितं देवानांप्रियस्य प्रियदर्शिनो राज्ञो धर्मानुशस्त्या--अनालम्भः प्राणानाम्, अविहिंसा भूतानाम्, ज्ञातीनां संप्रतिपत्तिः, ब्राह्मणश्रमणानां संप्रतिपत्तिः, मातरि पितरि शुश्रूषा। एतदन्यच्च बहुविधं धर्मचरणमिदम्। पुत्राश्च पौत्राश्च देवानांप्रियस्य प्रियदर्शिनो राज्ञः प्रवर्द्धयिष्यन्तीदं धर्मचरणं यावत् संवर्त्तकल्पम्, धर्मे शीले च तिष्ठन्तः धर्ममनुशासिष्यन्ति च। एतच्छ्रेष्ठं कर्म यद्धर्मानुशासनम्। धर्मचरणमपि न भवत्यशीलस्य। अस्मिन्नर्थे वृद्धिश्चाहीनिश्च साधुः। एतस्मा अर्थायेदं लेखितम्--अस्यार्थस्य वृद्धिर्युज्यताम्, [1]हीनिश्च न रोचयितव्या। द्वादशवर्षाभिषिक्तेन देवानांप्रियेण प्रियदर्शिना राज्ञेदं लेखितम्।

---

[1]हीनिः = हानिः, अल्पता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[अतिकातं अन्तरं बहूनि वाससतानि वढितो एव प्राणारंभो विहिंसा च भूतानं ञातीसु असंप्रतिपत्ती ब्राह्मणसमणानं असंप्रतीपत्ती। त अज देवानं प्रियस प्रियदसिनो राञो धंमचरणेन भेरीघोसो अहो धंमघोसो। विमानदंसना च हस्तिदंसना च अगिखंधानि च अञानि च दिव्यानि रूपानि दसयित्पा जनं यारिसे बहूहि वाससतेहि न भूतपुवे तारिसे अज वढिते देवानंप्रियस प्रियदसिनो राञो धंमानुससटिया अनारंभो प्राणानं अविहिसा भूतानं ञातीनं संपटिपत्ती ब्रम्हणसमणानं संपटिपत्ती, मातरि पितरि सुस्रूसा थैरसुसुसा एस अञे च बहुविधे धंमचरणे वढिते। वढयिसति चेव देवानंप्रिया प्रियदसि राजा धंमचरणं इदं। पुत्रा च पोत्रा च प्रपोत्रा च देवानंप्रियस प्रियदसिनो राञो प्रवधयिसंति इदं धंमचरणं आव सवटकपा धंमम्हि सीलम्हि तिस्टंतो धंमं अनुसासिसंति। एस हि सेस्टे कंमे य धंमानुसासनं। धंमचरणे पि न भवति असीलस्स। त इमम्हि अथम्हि वधी च अहीनी च साधु। एताय अथाय इदं लेखापितं इमस अथस वधि युजं तु हीनि च [नो] लोचेतव्या। द्वादसवासाभिसितेन देवानंप्रियेन प्रियदसिना राञा इदं लेखापितं।]

नामरहस्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(६)

धृष्टद्युम्नशब्दः खलु बहुशः श्रुतः सर्वैरेव भारतवर्षीयैः, अर्थः पुनरस्य स्वल्पैरेव विज्ञायते विपश्चिद्भिः। दीप्त्यर्थकाद् दिव्धातोर्म्न त्ययेन द्युम्नशब्दो निष्पन्नः। प्रत्ययोऽयं निम्न-सुम्नं-नृम्णशब्देष्वप्युपलभ्यते। द्युम्नशब्दस्यार्थो दीप्तिः, धनम्। धृष्टं सुमहत् द्युम्नं दीप्तिः यस्य सः धृष्टद्युम्नः। यद्वा धृष्टम् अधिगतं द्युम्नं धनं येन स धृष्टद्युम्नः। यद्वा धृष्टं सुमहत् द्युम्नं धनं यस्य स धृष्टद्युम्नः। एवमेव प्रकृष्टं द्युम्नम् औज्ज्वल्यं दीप्तिः कान्तिः यस्य स प्रद्युम्नो मदनः। इन्द्रस्येव द्युम्नं दीप्तिः यस्य स इन्द्रद्युम्नः। शोभना दीप्तिर्यस्य स सुद्युम्नः। ऋग्वेदे ऋतद्युम्न-तुविद्युम्न-त्वेषद्युम्न-पाशद्युम्नाऽभिष्टिद्युम्न-सुद्युम्न-शब्दा उपलभ्यन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपूर्वा युक्तिः

बालकः। आर्य, पठितं मया वृत्तान्तपत्रेषु रङ्गभूमितो कश्चन व्याघ्रो विनिष्क्रान्त इति। बलवत् खलु भीतोऽस्मि।

वृद्धः। वत्स मूढाः खलु व्याघ्राद् बिभ्यति। यदा हि व्याघ्रः क्षुधार्तो भवति तदैव मानुषादीन् ग्रसते, नान्यदा।

बालकः। कथं वा जानीयां कश्चन व्याघ्रः क्षुधार्तो वा न वेति।

वृद्धः। यदि व्याघ्रस्त्वां भक्षयात् तर्हि ज्ञास्यसि क्षुधार्तोऽयमासीदिति।

बालिकाया वैदग्ध्यम्

मातुलस्य भोजनकाले त्रिहायणी (three years old) भागिनेयी समुपस्थिता।

(आहारनिरतं मातुलं प्रति) अपूपभक्षणे नास्ति कोऽपि निषेधः। अहमपि अपूपान् भक्षयामि। (मातुलस्तूष्णीमेकैकमपूपं भुङ्क्ते।) अपूपा मह्यं रोचन्ते। (मातुलस्तथैव भक्षयति।) एकोऽपूपो मदर्थं रक्षणीयः। (मातुलोऽपूपमेकं तस्याः पाणौ प्रयच्छति।) (अपूपं सानन्दं भक्षयित्वा सक्रोधम्) किमित्युच्छिष्टं मे प्रदत्तम्? अपि न ज्ञायते भवता नाहं कस्याप्युच्छिष्टं भक्षयामीति। भृशं भवते क्रुध्यामि। इतः परं कदाप्येवं न कर्तव्यम्, उच्छिष्टं मे न दातव्यम्।

सुष्ठु खलूक्तं कालिदासेन [शकुन्तला ५।२२]—

स्त्रीणामशिक्षितपटुत्वममानुषीषु
सन्दृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजातम्
अन्यैर्द्विजैः परभृताः खलु पोषयन्ति॥ इति।

[The untaught cunning (**अशिक्षितपटुत्वम्**) of women (**स्त्रीणाम्**) is observed (**सन्दृश्यते**) even among lower animals (**अमानुषीषु**), not to speak of those (**किमुत याः**) endowed with

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

reason (प्रतिबोधवत्यः). The female cuckoos (परभृताः) get their young ones (स्वम् अपत्यजातं) nursed (पोषयन्ति) by other birds (अन्यैः द्विजैः) before (प्राक्) they are able to fly in the air (अन्तरिक्षगमनात्) ।]

कार्मुकशब्दस्य निर्वचनम्

[श्रीक्षितीशचन्द्र चट्टोपाध्यायः]

(२)

वस्तुतस्तु संस्कृतभाषायां कार्मुक-शब्दो द्विविध उपलभ्यते। एकः कर्मण उकञ् इति सूत्रेण कर्मन्शब्दात् उकञ् प्रत्ययेन निष्पन्नः, प्रत्ययस्य ञित्त्वादाद्युदात्तः। अस्य अर्थः—कर्मणे प्रभवति, फलोत्पादनक्षमः, अमोघः इति। शब्दोऽयम् 'आरोग्यसाधनक्षमः' इत्यर्थे वैद्यकसंहितासु प्रायश उपलभ्यते। अस्य च स्त्रियां विशेषसूत्राभावात् अजाद्यतष्टाप् इति सूत्रेण टापि कार्म्मुकेति स्यात्।

द्वितीयश्च कार्मुकशब्दः काष्ठविशेषवाचिनः अन्तोदात्तात् कृमुकशब्दात् अनुदात्तादेश्च इति सूत्रस्यापवादेन कोपधाच्च इति सूत्रेणाण्-प्रत्ययेन निष्पन्नः। यथा शृङ्गशब्दादणि शार्ङ्गम्, तथा कृमुकशब्दादणि कार्मुकम्। प्राचीने काले धनूंषि कृमुकवृक्षस्य काष्ठेन निर्मीयन्ते स्मेति प्रतीयते। अस्य च प्रत्ययस्वरेणान्तोदात्तत्वं बोद्धव्यम्। स्त्रियां टिड्ढाणञ् इति सूत्रेण ङीपि कार्म्मुकीति पदं भवति, तच्च उदात्तनिवृत्तिस्वरेणान्तोदात्तं बोध्यम्।

जिज्ञासा मीमांसा च

(४)

मान्या मञ्जूषासम्पादकमहोदयाः,

सिद्धान्तकौमुद्यां कानिचनोद्धृतानि वाक्यानि वर्तन्ते येषां मूलं प्रयत्नतोऽन्विष्यमाणेनापि नोपलभ्यते। कृपया चुरादिप्रकरण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पठितस्य स एवायं नागः सहति कलभेभ्यः परिभवम् इति श्लोकांशस्य शेषः पूरणीयः। इति प्रणतः श्रीनन्दलाल शर्मा।

समग्रः श्लोकः सुभाषितग्रन्थेषूपलभ्यते। स च यथा—

नदीवप्रान् भित्त्वा किसलयवदुत्पाट्य च तरून्,
मदोन्मत्ताञ्जित्वा करचरणदन्तैः प्रतिगजान्।
जरां प्राप्यानार्यां तरुणजनविद्वेषजननीं
स एवायं नागः सहति कलभेभ्यः परिभवम्॥

यस्मिञ् श्लोके करचरणदन्तैरिति पदं देदीप्यते तस्य साहायकेन सहधातोः परस्मैपदित्वप्रतिपादनं साहसमात्रम्।

इति मञ्जूषासम्पादकः।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

आचार्यः। वत्स वेणुगोपाल, संपाठः पठ्यताम्।

वेणुगोपालः। (पठति)

परावरे ब्रह्मणि यं सदाहु-
र्वेदात्मानं वेदनिधिं मुनीन्द्राः।
तं पद्मगर्भं परमं त्वादिदेवं
प्रणम्यर्चां लक्षणमाह शौनकः॥

रामगोपालः। आर्य, ग्रन्थकारान् उद्दिश्य वर्तते नः कुतूहलम्। तत कोऽयं शौनको नाम?

आचार्यः। शुनको नाम कुक्कुरः। शुनकस्य पुत्रो वा शिष्यो वा शौनकः।

रामगोपालः। ही ही शुनकोऽपि नाम भवति! यस्येदं नाम तेन कथं निर्वृतिर्लभ्यते?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यः। यथा कुक्कुरः सर्वानुद्दिश्य वुक्कति (barks) तथा भ्यक्तमिव स्नातः, शुचिरशुचिमिव, सर्वं जन पश्यति, भर्त्सयते च, अपरक्तलोकेन तस्मिन् शुनक इति नाम आरोपितम् !

नन्दगोपालः। आर्य, बुद्धं मया। अस्माकमेव शुनक आङ्ग्ल-भाषायां Cynic रूपं परिगृहीतवान्। तर्हि शुनकस्य पितृदत्तं नाम (Antisthenes) अन्तिस्थान इत्यासीत्। तस्यैव शिष्यः शौनक इति।

वेणुगोपालः। तर्हि यवनानां (of the Greeks) Diogenes एवास्माकं शौनकः।

आचार्यः। वत्साः, श्रीमतां प्रसादेनाधिगतं मया तत्त्वज्ञानम्। गलितं तिमिरावरणं नयनयोः। Diogenes-शब्दो द्विजानि-शब्दस्यैव विकारः। द्वे जाये यस्य स द्विजानिरिति। तेन खलु विपश्चिता द्विः परिगृहीता दारा इति स स्वजनैर्द्विजानिरिति व्यपादिश्यत। स च प्रकृतिमुखरयोः कलत्रयोराक्रोशेन निरन्तरं दह्यमानकर्णो जगति निःस्पृहः सन्न्यासी संवृत्तः। ततश्च अन्तिस्थानस्य (Antisthenes) शिष्यतामुपगतः। स खलु सर्वत्रैव दोषं पश्यति स्म, शशिशुभ्रमपि शङ्खं पीतं पश्यति स्म। स च प्रचण्डतापे निदाघे तप्ततमासु सिकतासु लुठति स्म, अस्थिविध्वंसिनि च शीते निशायां निरावरणा-स्तुहिनावृता मर्मरमूर्त्तीः स्पृशति स्म।

एकदा जगदेकवीरेणालीकसुन्दरेण तस्य साक्षात्कारः सञ्जातः। सम्राजोक्तम्—अहं महावीरोऽलीकसुन्दर इति। विदुषोक्तम्—अहं शौनको द्विजानिरिति (Diogenes the Cynic)। सम्राजोक्तम्, किं ते प्रियं करवाणीति। विदुषोक्तं कृपया सूर्यकरान् मा निरौत्सीरिति। एतदेवास्य निरपेक्षत्वं प्रमापयति। अत एव खृस्तपूर्वपञ्चम-शताब्द्यां शौनकेन विरचितमृक्प्रातिशाख्यम् इति बोध्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Professor, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra

VISVANATH CHATTERJI
81 Shyambazar Street,
CALCUTTA—4
Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

MAHABHASHYA

(First Ahnika or, Introduction to Sanskrit grammar)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc. Rs. 3/12/-

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kās'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Candra Vyakarana

The first great revised edition of Panini.

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, etc. etc.

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT

Professor, Calcutta University.

Part I (Chapters 1—3). *Price Rupees Twelve only.*

Deccan College Post Graduate and Research Institute,

Poona 6.

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street. Calcutta—4. Printed at the Elm Press 63, Beadon Street. Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्ष] March, 1954 [सप्तमी संख्या

मञ्जूषा

सम्पादकः—श्रीचितीशचन्द्र-चट्टोपाध्यायः

Just Out! **Just Out!!**

Candra Vyakarana—The First Great Revised Edition of Pāṇini, critically edited with Vṛtti and rules of Pāṇini and Bhoja. Rs. 12/-

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Four.

Single copy : Eight annas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम् । आश्विन (September) मासतो वर्षारम्भः । ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम् ।

२ । प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते ।

स्तोत्रप्रशंसा—वराहमिहिरस्य श्लोकाः भट्टोत्पलटीकया विद्यावाचस्पतिविरचिताभिनवविस्तृतव्याख्यया च विभूषिता । मूल्यं रूप्यकमात्रम् ।

Convocation Address in Ancient India As 12

Popular Etymology— Re. 1/-

शब्दकथा—सरस, सरल ভাষাতত্ত্ব ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

नक्षत्रमाला—धर्मविषयक श्लोक, सरल व्याख्या ও অনুবাদ ।/৹

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

Palm-Leaf Manuscripts

(From Chinese Turkestan)

Translated from the German of Lüders

BY

TUHINIKA CHATTTERJI KAVYATIRTHA, M A.

Invaluable to students of Prakrit and of the Indian Drama. Rs. 2/-

श्रीविश्वनाथ-चट्टोपाध्यायः ।

Phone :—B. B. 4049.

८१ श्यामबाजार ष्ट्रीट, कलिकाता ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ।।

मञ्जूषा

March, 1954 | १८७५-शकीयचैत्रस्य ८म-वर्षस्य सप्तमी संख्या | Vol. VIII No. 7

आभाणकमाला

१। सर्वः स्वे स्वे गृहे राजा। महाभारतम् ।

हिन्दी) अपने घरमें हर आदमी बाद्शाह् है ।

स्वके गेहे कुक्कुरोऽपि तावच्चण्डो भवति ।

(वङ्गीयः) निजेर घरे सकलेइ राजा ।

आपन गाँये कुकुर राजा ।

आपन घरे सवाइ राजा ।

A cock is bold on his own dunghill.

Latin. Gallus in sterquilinio suo plurimum potest.

'The cock is master on his own dunghill.'

२। आहारे व्यवहारे च त्यक्तलज्जः सदा भवेत् ।

One should never be bashful at table or in trade.

Latin, Verecundari neminem apud mensam decet.

At table no one should be bashful.

३। चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।

न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

One should provide against all emergencies beforehand. It is foolish to set about sinking a well when the house is burning furiously.

Lat. Miserum est opus,

Igitur demum fodere puteum, ubi sitis fauces tenet.

It is a miserable thing to be digging a well at the moment when thirst has seized your throat.

कण्ठे तृष्णासमाक्रान्ते कष्टं कूपस्य निर्मितिः।

रामायणरत्न-मञ्जूषा

रावणं प्रति जटायुषो वाक्यम्

सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे।
ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि॥
स भारः सौम्य भर्तव्यो यो नरं नावसादयेत्।
तदन्नमपि भोक्तव्यं जीर्यते यदनामयम्॥
यत् कृत्वा न भवेद्धर्मो न कीर्त्तिर्न यशो भुवि।
शरीरस्य भवेत् खेदः कस्तत् कर्म समाचरेत्॥

प्रश्नोत्तराणि

प्रश्नः। ब्रूहि तावत् कथं वा वृद्धाश्चिरं जीवन्ति।

उत्तरम्। ये तावत् स्वल्पे वयसि म्रियन्ते न खलु ते वृद्धावस्थां प्रपद्यन्ते इति।

प्रश्नः। यदि स्वकृतप्रतिज्ञाया भङ्गः स्यात् किं करिष्यसि?

उत्तरम्। पुनरप्यनुरूपया प्रतिज्ञया तस्याः स्थानपूरणं विधास्यामि।

प्रश्नः। को वा कस्यापि बुद्धिपरीक्षणस्य सुकरोपायः?

उत्तरम्। तस्य पुरतस्तं मुख इत्याख्याहि। काणश्चेत् काण इत्युच्यते क्रुद्धो भवति, न पुनश्चक्षुष्मान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नः। परिचितेषु पञ्चसु जनेषु के के भवतः पूर्वमेव मरिष्यन्ति तद्वक्तुं प्रभवति वा भवान्? एतदर्थं यावदपेक्षं कालं गृहाण।

उत्तरम्। तर्हि प्रभवाम्येव वक्तुम्। यथा यथा द्रक्ष्यामि तथा तथा वदिष्यामि।

कृपया पथिकृद् भव

भुः। दास्याः पुत्र, नरकं गच्छ।

भृत्यः। कृपया पुरो गच्छन् पन्थानं प्रदर्शयसि चेत् सम्यक् स्यात्। अन्यथा अपरिचिततया मार्गस्य कथं गच्छेयम्?

सङ्ग-फलम्

[स्वामी लक्ष्मणशास्त्री]

माता चैका पिता चैक एके स्वजनबान्धवाः।
अहं च मुनिना नीतः स च नीतो गवाशिभिः ॥१॥

एतत्पद्यविषये वर्षीयसां मुखेनैकाख्यायिका श्रूयते। पुरा बभूव कश्चन श्रीदत्तो नाम मुनिः। स कस्मिंश्चिद्वने कृताश्रमस्तपश्चरति स्म। प्रवयसस्तस्य कदाचन तीर्थयात्रायामिच्छा जाता। स स्वस्मादाश्रमात् प्रस्थितस्तीर्थेषु पर्यटन् पथि कुत्रचित् निर्जनं वनमाससाद। तत्र च कमपि शन्यमाश्रमं निरीक्ष्य कुतूहलेन तस्मिन् प्रविष्टः। आश्रमाभ्यन्तरे न कोऽपि जनस्तदानीमासीत्। केवलं पञ्जराभ्यन्तर्गत एकः शुक एव तेन मुनिना तत्र दृष्टः। मुनिमायान्तं दृष्ट्वैव स शुको रोषेण रक्तनेत्रः किट-किट-शब्दं कुर्वाणः स्फुटमवदत्। कोऽसि त्वम्? कुतस्त्वं शून्यमिममाश्रमं प्रविशसि? नूनं त्वं तस्करोऽसि। सत्वरं बहिर्निस्सर। न चेदहं त्वां ताडयिष्ये। अहो! किं त्वं बधिरोऽसि? यन्मदीयं कथनं शृण्वन्नपि समुपसर्पसि नूनं त्वमतिधृष्टोऽसि, निर्लज्जश्चासि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति निष्कारणमेव तिरस्कुर्वाणस्य तस्य शुकस्य रोषपूर्णां दुरुक्तिं निशम्य मुनिः सत्वरमेव तस्मादाश्रमाद्बहिर्निःसृत्यान्यतोऽगमत्। तत्रैव वने परिभ्रमन् स मुनिर्नातिदूरे रम्यमेकमन्यमाश्रमं निरीक्ष्य, तस्मिन् कुतूहलादविक्षत्। तत्रापि पूर्ववत् पञ्जराभ्यन्तरस्थितमेकं शुकमेव केवलमपश्यत्। स्वाश्रमाभ्यन्तरे समायान्तं मुनिं विलोक्य प्रमुदितान्तरः शुकः स स्वदिक्षणचरणेन प्रणतिं विदधे, मधुरतरवाण्या च समभणत्। भगवन्! स्वागतमस्तु भवताम्। बृस्यामस्यां समपविश्यताम्। मधुरतमं शीतलं च जलं पीयताम्। फलमूलानि यथेष्टमास्वाद्यन्ताम्। मार्गश्रमेण नूनं भवन्तः श्रान्ता जाताः। क्षणं विश्रम्यताम्। सूर्यस्तीव्रतरं तपति। अवसरश्चेत्कामं किञ्चिन्निद्रासुखमप्यनुभूयताम्। भवद्भिरत्रागत्य नूनमयमाश्रमः सनाथीकृतः पवित्रीकृतश्च। कुत्र विद्यते भवतामाश्रमः? भवतामाश्रमे सर्वे कुशलिनः सन्ति कच्चित्? वयं जगदीश्वराद् भवतां सर्वेषां निरामयमीहामहे।

इत्थं सत्कारगर्भितां मधुरतमां च वाचं तस्य शुकस्य निशम्य पूर्वाश्रमदृष्टस्य च तत्समानस्यैव शुकस्य तिरस्कारगर्भितां दुःसहाञ्च दुरुक्तिं स्मृत्वा स मुनिर्नितरां विस्मितोऽभूत्। बभाषे च तमेव शुकम्। पक्षिराज! अहं तवातिमधुराभिर्वाग्भिरतितराम्प्रमुदितो जातः। किन्तु शङ्कैका मदीयं चेतो बाधते। भवान् ममातिसत्कारं कृतवान्। त्वत्सदृशवयोरूपादिसम्पन्नः पूर्वाश्रमे दृष्टः पुनः शुको मम नितरां तिरस्कृतिं व्यदधात्। किमेतस्य कारणम्?

एवं मुनेर्वचनं निशम्य ज्ञातवृत्तान्तः स शुकस्तं मुनिमवदत्। भगवन्! श्रूयताम्।

माता चैका पिता चैक एके स्वजनबान्धवाः।
अहं च मुनिना नीतः स च नीतो गवाशिभिः॥ इति।

एतत्पद्यस्य निष्कर्षस्त्वयम्, यद् आवयोर्द्वयोर्माताप्येका, पिताप्येकः स्वजनबान्धवाश्चाप्येके। किन्त्वहं बाल्य एव वयसि मुनिना तदाश्रम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वासिना समानीय पालितोऽस्मि। सततं महात्मनां मुनीनां सङ्गतिकरणात् सुशीलः समागतानामतिथीनां च सत्कृतिकरणे प्रवीणोऽभवम्। भवद्भिः पूर्वाश्रमे दष्टश्च स मदीयः सहजो भ्राता तु गोमांसभक्षकैश्चाण्डालैः स्वगृहं नीत्वा पालितः। तेषां दुःशीलानां सततं सङ्गतिकरणाच्च स स्वयं दुःशीलः समागतानामतिथिजनानां च तिरस्करणेऽतिनिपुणश्चाभवत्। सङ्गप्रभावेणावयोः सहजयोरपि स्वभावे महदन्तरमभूत्। सङ्गप्रभावोऽतितरां बलवान्। सङ्गप्रभावेणाकाशपातालयोरिव रात्रिदिवसयोरिव च पशुपक्षिणामपि प्रकृतौ महती विकृतिर्जायते, किम्पुनः कामक्रोधलोभैककिङ्कराणां सर्वेन्द्रियैर्विचित्रविषयजुषां च मानुषाणाम् ? अतो भवद्भिः सर्वथा नात्र विस्मयः कार्यः।

एवं तस्य शुकस्योक्तिं श्रुत्वा विगतशङ्कः स मुनिस्तमामन्त्र्य तस्मादाश्रमान्निष्क्रम्य च यथाभीष्टं प्रययौ।

श्रीरवीन्द्रनाथठाकुरस्य

उर्वशी

[उडालि-सुब्बरामशास्त्री]

माता नासि न कन्यकासि न वधूर्भासि स्वयं सुन्दरी
रूपेणाऽप्रतिमेन नन्दनवने वासस्त्वया स्वीकृतः।
सन्ध्यायाः पतने च शाद्वलतटे कृष्ट्वा सुवर्णाञ्चलं
दीपाञ्श्रान्ततनुद्युतिर्न रचयेस्सान्ध्यान् गृहाणां पुरः ॥१॥
पद्भ्यां शङ्काजडाभ्यामतिशयविलसत्कम्प्रवक्षस्स्थलाढ्या
नम्रैर्दृष्टेर्विलासैस्स्मितहसितमुखैर्लज्जया त्वं निशीथे।
निस्तब्धे केलिकायै न विशसि भवनं नांशुकं स्मेरवक्त्रे
कुर्यास्तुल्योषसा त्वं विचरसि भुवनेऽकुण्ठिता स्वैरगत्याम् ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृन्तहीनसुमवत् स्फुटतां त्वं
प्राप्य यौवनमनोज्ञलतायाम् ।
प्रस्फुटासि समये किल कस्मि-
न्नुर्वशि प्रथितरूपविलासे ॥३॥
आदिमे किल वसन्तविभाते
व्युत्थितासि मथितीदधिमध्यात् ।
न्यस्य दक्षिणकरेऽमृतपात्रं
दक्षिणेतरकरे विषपात्रम् ॥४॥

यत्पादाम्भोजसीमामुदधिरयमहो ! भ्रान्तकल्लोलभङ्गै-
र्माहात्म्यं नीयमानोऽप्यपगतमहिमा सेवतेऽयं फणीव ।
मन्त्रैः श्वेडापहारप्रणुतमहिमभिः पातयञ्छीर्षलक्षं
कुन्दस्वच्छप्रभासा सुरपतिविनुता शोभसेऽनिन्दिता त्वम् ॥५॥
आसीर्बाला कदापि त्वमिह ? महिमयुग् यौवनं शाश्वतं ते
कस्यागारे विशाले किमु रमणि ! मषिस्तोममुक्ताफलैस्त्वम् ।
क्रीडाद्रव्यैरनैषीर्ललितशिशुवयो बालकेलीविशेषैः
सिन्धावेकाकिनी त्वं विचरसि निबिडध्वान्तपूर्णोदरेऽस्मिन् ॥६॥
दीपैर्माणिक्यरूपैरनपगतविभारूषितद्वारदेशैः
कल्लोलह्लादगीतैरपगतमलिनस्मेरवक्त्राब्जशोभा ।
पर्यङ्के विद्रुमाणामधिगतशयना यासि निद्रां निशायां
क्वापि त्वं कस्य वाङ्के समुपगतवती ? तुल्यजन्मा जगत्या ॥७॥

———

असिधेनुका

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अमरकोषे दृश्यते—स्याच्छस्त्री चासिपुत्री च च्छुरिका चासिधेनुका [२।८।९२] इति। व्याख्यातं चेदं क्षीरस्वामिना—शस्यतेऽनया शस्त्री। असेः पुत्रीव अल्पत्वात्। छुरति छिनत्ति छुरिका।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुरिकापि ।" इति । अत्रासिधेनुकामधिकृत्य किमपि नोक्तम् । सर्वानन्देन विवृतम्—ङीषि शस्त्री । पुत्रीधेनुकाभ्यामसेः षष्ठीसमासः । छुर छेदने क्वुन् । छुरिका । इति । रायमुकुटेन सविस्तरं व्याख्यातम् —शस्यतेऽनया । शसु हिंसायां दाम्नीत्यादिना [३।२।१८२] ष्ट्रन्, षित्त्वान् ङीष् [४।१।४१] । असेः पुत्रीव स्वल्पत्वात् असिपुत्री । छुरति छिनत्ति शत्रून् । छुर छेदने । शिल्पिसंज्ञयोः [उ० २।३५] इति क्वुन् । टापि छुरिका । असेः कार्ष्ण्यात् करिरूपस्य धेनुका करिणीव असिधेनुका । धेनुका स्त्री करेण्वाञ्च इति वक्ष्यते इति । भानुजिदीक्षितेन व्याख्यातम्—छुर छेदने क्वुन् । इगुपध इति कः, कन् वा । असेर्धेनुरिव इति । रघुनाथचक्रवर्त्तिनोक्तम्—असेर्धेनुकेव इति ।

असिधेनुकाशब्दस्यार्थविषये टीकाकाराणामैकमत्यं दृश्यते, निर्वचने पुनर्विप्रतिपत्तिरुपलभ्यते । अत्रास्माभिर्मन्यते—यथा शस्त्रशब्दस्य स्त्रियां शस्त्रीति विलिखितम्, तथवासिशब्दस्य स्त्रियामसिधेनुरिति भवति, पुनरपि कनि असिधेनुकेति रूपम् । खड्गधेनु-गोधेनु-वडवाधेनु-प्रभृतिशब्देषु धेनुशब्दयोगेन स्त्रीवाचकत्वं सन्दृश्यते । धेनुकाशब्दस्यापि व्युत्पत्तिलभ्यार्थः पयस्विनी गौः, ततः या कापि गौः, ततश्च या कापि स्त्री इत्यर्थः सञ्जातः । "स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि" इति न्यायेन शस्त्रीशब्दश्छुरिकावाचकस्तथासिधेनुकेत्यपि । आङ्गलभाषायामपि elephant, rhinoceros प्रभृतिशब्दानां cow-शब्द-समभिव्याहारेण स्त्रीत्वं दृश्यते । अत एव धेनुका तु करेण्वाञ्च इत्यत्र धेनुका स्त्रीकरेण्वोश्च इति केचन पठन्ति । अत एव असे र्धेनुका इति विग्रहः समीचीन इति प्रतिभाति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुलीभूताः प्रमादाः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(१)

सहृदयाः, कस्य वा न विदितं भारवेः सुभाषितरत्नम्—

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ॥

इति । अस्य तृतीयं चरणं प्रायेण सुभाषितग्रन्थेषु—**वृणुते** हि विमृश्यकारिणमित्याकारं सन्दृश्यते । तत्तु सर्वथा न युक्तम् । अत्र सम्पदः इति कर्तृपदं बहुवचनान्तम्, अत एव क्रियायामपि बहुवचनमेवापेक्ष्यते । वृणुते इति स्वादिगणीयस्य धातोः प्रथमपुरुषैकवचने रूपम् । कविना पुनः क्र्यादिको धातुः प्रयुक्तः । तस्य च लटि प्रथमपुरुषबहुवचने रूपम्—वृणते इति । अत एवात्र वृणते इत्येव पठितव्यम् ।

नामरहस्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(६)

कालिदासस्य सर्वस्वे शाकुन्तले शार्ङ्गरवशारद्वतयोः सन्दर्शनं भवति । शब्दयोः पुनरर्थो बहुभिर्नाविबध्यते । तत्र शृङ्गस्य विकारः शार्ङ्गम् । तस्य च धनुरित्यर्थः । शार्ङ्गस्येव रवो यस्य सः शार्ङ्गरवः । तस्य हि कण्ठस्वरो धनुष इव टङ्कारस्तीव्रश्च दूरप्रसारी चामर्षणश्च । अत एवाभिज्ञानशकुन्तलस्य चतुर्थेऽङ्के महर्षिणोक्तम्—गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय इति । इतश्च तस्य शार्ङ्गरवे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुमानः प्रतीयते। ततश्च कुलपतिना पृष्टम्—क्व ते शार्ङ्गरवमिश्रा इति। ततश्च महर्षिणा शार्ङ्गरवमुखेनैव स्वसन्देशः प्रेषितः—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः इति। ततश्च शार्ङ्गरवेणैवोक्तम्—युगान्तरमारूढः सविता। त्वरतामत्रभवती। इति। पञ्चमेऽङ्के शार्ङ्गरवो जनाकीर्णं राजभवनं हुतवहपरीतमिव सम्भावयति। ततश्च "असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति" इति राजप्रशंसनपरः पुरोहितस्तिरस्कृत इव—भो महाब्राह्मण, काममेतदभिनन्दनीयम्, तथापि वयमत्र मध्यस्थाः। कुतः—

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्॥

इति। ततश्च राज्ञा सह संवादे तस्य शार्ङ्गस्येव रवः श्रोतॄणां श्रवणसरणिमुपयाति। यदा तेनोक्तम्—मूर्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तषु तदाशेषनरपतिशिरःसमभ्यर्चितशासनेन सम्राजोक्तम्—विशेषेणाधिक्षिप्तोऽस्मीति। ततश्च यदा राज्ञोक्तम् "इदं तत् प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते" इति, यदा च शकुन्तलालोभेन च धर्मभयेन चोभयथा समाकृष्यमाणो विभ्रान्तोऽसौ प्राकृत इव जनः गौतमीं तापसवृद्धे इत्यामन्त्र्यावोचत्—

स्त्रीणामशिक्षितपटुत्वममानुषीषु
सन्दृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति॥

इति, तदा शार्ङ्गरवेणोक्तम्—इत्थमात्मकृतं प्रतिहतं चापलं दहति।

अतः परीक्ष्य कर्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। अत्रापि मेघस्तनितनिर्घोषश्चकितमिव विदधाति श्रोतृजनम्। ततश्च यदा राज्ञा पृष्टम्—किमत्रभवतीप्रत्ययादेवास्मान् संयुतदोषाक्षरैः क्षिणुथ इति, तदा शार्ङ्गरवेणोक्तम्—श्रुतं भवद्भिरधरोत्तरम्।

आ जन्मनः शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य।
परातिसन्धानमधीयते यै-
र्विद्येति ते सन्तु किलाप्तवाचः॥

इति, तदा तस्य कण्ठध्वनिरद्रीनप्यारूढः, उदधीनपि वितीर्णः, भुजङ्गमानामपि वसतिं प्रविष्ट इत्यनुभूयते। यदा च तीव्रामिमां सोल्लुण्ठनोक्तिं सोढुमशक्नुवता सम्राजोक्तम्—भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिरेवम्, किं पुनरिमामतिसन्धाय लभ्यत इति, तदा तत्क्षणादेव शार्ङ्गरवेण ससागराया धराया एकाधिपतिः प्रत्युक्तः—विनिपात इति। यदा च सरोषं निवृत्य शार्ङ्गरवेणोक्तं—किं पुरोभागे स्वातन्त्र्यमवलम्बसे, तदापि तस्य शार्ङ्गरवत्वं स्फुटमेव।

इदानीं शारद्वतशब्दस्यार्थो विव्रियते। शरद् नाम संवत्सरः। शरद् अस्यास्तीति शरद्वान्। वर्षीयान् इत्यर्थः। तस्य अपत्यं पुमान् शारद्वतः। कारणगुणा हि कार्यगुणानारभन्त इति न्यायेन शारद्वते वर्षिष्ठसुलभं गाम्भीर्यं विवेचकत्वं निरपेक्षत्वं च स्फुटीभवति। शाकुन्तले तस्याद्यं वचनम्—

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि॥

यथा स्नातोऽभ्यक्ताद्बीभत्सते, यथा शुचिरशुचेर्बीभत्सते त ासौ सांसारिकसुखमेव स्वर्गमाकलयद्भ्यो जनेभ्यो बीभत्सते। प्रबुद्धः जागरितो यथा सुप्तं निद्राणं प्रबोधविरहितं जनं सानुकम्पं पश्यति, तथैवायमत्रत्यं सुखपरं जनं पश्यति। शार्ङ्गरवेणाधिभौतिकः क्लेशोऽनुभूतः, शारद्वतेन पुनराध्यात्मिकः इति विभेदः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा तावद्राज्ञो विस्मरणनाटितकेन क्रोधस्य काष्ठामारूढेन शार्ङ्गरवेण विजितशार्ङ्गध्वनिनोक्तम्—

मा तावत्,

कृताभिमर्षामनुमन्यमानः
सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन ॥

इति, तदा शारद्वतेन पूर्वपक्षम् उत्तरपक्षं चोभयमेव परिहृत्य निर्णयो दत्तः—शार्ङ्गरव, विरम त्वमिदानीम्। शकुन्तले, वक्तव्यमुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम् इति।

ततश्च सम्राट्शार्ङ्गरवयोः संवादः शारद्वतेनेत्थमुपसंहृतः—

शार्ङ्गरव, किमुत्तरेण। अनुष्ठितो गुरोः सन्देशः। प्रतिनिवर्तामहे वयम्। (राजानं प्रति)

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ॥

अविदितदुर्वासःशापवृत्तान्तैः शार्ङ्गरवशारद्वतादिभिः कृतकार्यद्वेषाद् राज्ञा विस्मरणमभिनीयते इति प्रतीतम्। तथापि शारद्वतेन राजा वा शकुन्तला वा लेशतोऽपि नाधिक्षिप्तः। समुन्नततमधर्माधिकरणस्य प्राड्विवाकेनेव तेन निर्णयो दत्तः—मुखमस्तीति वक्तव्यमिति न्यायेनेदानीं यत्किञ्चिदप्युच्यतां त्वया। एषा पुरतो दृश्यमानाश्रुबिन्दुनिचितगण्डस्थला तपोवनसंवर्द्धिता कैतवानभिज्ञा मुग्धा ललना तव पत्नी। त्वयैवैकदा स्वेच्छया पत्नीत्वेन स्वीकृतेति कान्तापदेन व्यज्यते। अस्याः परित्यागे स्वीकारे वा त्वमेव प्रमाणम्। परित्यागे विनिपातः, स्वीकारे स्वधर्मरक्षणमिति त्वन्यदेव। (It is a matter between you and your God.) इति

यदि शारद्वतोऽध्यात्मज्ञानेन शार्ङ्गरवमतिशेते तर्हि किमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविप्रवरेण शार्ङ्गरवे भारो निहित इति चेत्, उच्यते—संसारेऽस्मिन् केवलेनाध्यात्मविज्ञानेन कार्याणि न सिध्यन्ति, पूर्वपक्षस्योत्तरपक्षोऽप्यपेक्ष्यत इति।

अस्माकं मतं भाषा च

[श्रीपट्टाभिराम-शास्त्री विद्यासागरः]

यवनिका चेदपसार्यते तर्हि समग्रः प्रकाशो दृष्टिगोचरो भवति। एवमेव साम्प्रतं परिदृश्यमानानि सर्वाण्यपि मतानि वैदिकमतस्यांशभूतान्येव। यथा ह्येकस्यैव परस्य ब्रह्मणः प्रतिबिम्बभूता अंशभूता वा सर्वे जीवराशयः, तथैवास्मन्मतेन मतान्तराणां सम्बन्ध इति।

अस्मन्मतं यथा सर्वस्य देशस्य साधारणम्, मतान्तरैश्चेदं न विरुध्यते, तथैवास्मद्भाषापि संस्कृतं सर्वस्य जगतस्साधारण्यमावहति, भाषान्तरैश्च सह न विरुध्यते। न केवलं भाषान्तरैरियं न विरुध्यते, किन्तु सर्वासां भाषाणां मूलभूता विराजते। तासु तासु प्रान्तीयासु भाषासु प्रयुज्यमानानां विवरणसापेक्षाणां शब्दानां विवरणं संस्कृतभाषयैव क्रियत इति न तिरोहितमिदम्। भाषान्तराण्येकैकं प्रान्तं देशं वाश्रित्य स्वस्वरूपं लभन्ते, शब्ददारिद्र्यञ्चानुभवन्ति परस्परमीक्षन्ते, परमस्माकं निलिम्पवाणी सर्वमपि जगद्व्याप्नुवती अक्षय्यं शब्दकोशं बिभ्रती भाषान्तराणि चोज्जीवयन्ती चकास्ति। अनयैव भाषान्तराणि प्राणवन्ति, इयञ्च तेषां प्राणरूपा। प्राणवतामेव शरीराणां विकारो मरणं वा। न हि क्वचन प्राणा विक्रियन्ते म्रियन्ते वा। शरीरात्प्राणा निरगच्छन्निति हि लोकानां प्रवादः। यदि शरीरस्थानापन्नेभ्यो भाषान्तरेभ्यः प्राणरूपेयं निर्गच्छेत्, तर्हि भाषान्तराण्येव म्रियेरन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिका भाषाशास्त्रिणः प्राय एवं व्यवहरन्ति--यत्सैव भाषा जीवनं धत्ते, यस्यां प्रत्यब्दं प्रतिमासं वा शब्दा वर्द्धन्ते। संस्कृते तु—इतो बहोः कालात्पूर्वं पूर्वजैर्ये शब्दाः प्रयुक्तास्त एवान्यूनानतिरिक्तास्साम्प्रतमपि व्यवह्रियन्ते। न तत्र शब्दानां वृद्धिं पश्यामः। अत इयं जीवनरहितेति। परमिदं कथनं भाषाशास्त्रिणां न युक्तियुक्तमिव। यैव भाषा व्यवहारौपयिकान् पुष्कलान् शब्दान् प्रत्यहं वैज्ञानिकदृशा सम्प्रति समुत्पाद्यमानानां पदार्थानां व्यवहाराय बह्वीः प्रकृतीः संख्यातीतांश्च प्रत्ययान् धत्ते, तत्र शब्दवृद्ध्यर्थं कः प्रश्नः? यत्र च दारिद्र्यं शब्दानां विलसति तत्रैव हि तद्वृद्धिरपेक्ष्यते। इदन्त्वङ्गीकर्तव्यम्—यत्पुरातनैः प्रयुक्तान् शब्दान् केनापि कारणेन वयं विस्मराम इति। अन्यदिदमस्माकं भाषाया गौरवम्—यदुत आ च भगवतः प्रथमायास्सृष्टेः आ चैतन्निमेषात् संस्कृतभाषायां भाषान्तरीयाश्शब्दा न प्रयुज्यन्त इति। शोभनं खल्विदं समेषामपि—यन्मर्यादायां वर्तनम्। त्रसलिङ्गात्मकेऽस्मिन् प्रपञ्चे पशवस्तिर्यञ्चः, लतास्तरवः, पर्वता वनानि सर्वे च मानवा यदि स्वस्वमर्यादामाश्रित्य वर्तन्ते, तर्हि मन्ये न कोऽपि विप्लवस्यावसरो भवेत्। कामं लोका विहगा इव वियति डयन्ताम्, जलचरा इव वा जले प्लवन्ताम्, तथापि ते विहगा जलचरा वा यथा स्वमर्यादायां वर्तन्ते तथास्माभिरपि वर्तितव्यम्। न हि पशवः पक्षिणो वा मर्यादामुल्लङ्घ्य वर्तन्ते। साधूक्तं श्रोत्रियतिलकेन श्रीनीलकण्ठेन—

'अस्पृश्योऽस्तु मलीमसोऽस्त्वनियताहारोऽस्त्वतोऽप्युद्भटै-
र्दौष्टैरस्तु परश्शतैः परिवृतः काकस्ततः का क्षतिः।
भङ्क्ते भोज्यमुपस्थितं समुपहूयैव स्वयं बान्धवान्
यस्सीदन् क्षुधया विचिन्तय ततो धन्यश्च पुण्यश्च कः॥ इति।

अत एव प्राक्तनाः पुरुषधौरेयाः सुविमृश्यानवरततत्त्वपरिशीलनपरिपक्वमतिवैभवा लोककल्याणैकतानमतयः सर्वत्र काञ्चन स्पृहणीयां मर्यादां समकल्पयन्। तत्र निलिम्पवाण्या अपि काचन लोभनीया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्यादा विलसति। तस्यां वर्तमानेयं देशेन कालेन जात्या वापरिच्छिन्ना आ च तुषारशैलात् आ च कुमारिकाया अद्य यावत् एकरूपेणैव विराजत इति किं ब्रूमो वयमस्माकं पचेलिमां सौभाग्यपरम्पराम्।

एवञ्चास्माकं मतस्य भाषायाश्च परस्परं विद्यमानं नान्तरीयकं सम्बन्धं परिवर्द्धयितुमेकैकेनापि भारतीयेन बद्धपरिकरेण भवितव्यम्। प्राचीनैः प्रवर्तितमिदं मतस्य भाषायाश्च तत्त्वं तत्र तत्र बीजरूपेण साम्प्रतं वर्तते। तच्च केवलं जलसेकमेवापेक्षते। केनाप्यनुकूलदैवेन वयं प्राज्यं स्वातन्त्र्यसुखमधुनानुभवामः। अवसरोऽयं शोभनः। यदि वयमनुष्ठानानुष्ठापनाध्ययनाध्यापनरूपं जलं सिञ्चामस्तर्हि नूनं क्रमशोऽङ्कुरितेभ्यः पुष्पितेभ्यश्च तेभ्यो बीजेभ्योऽचिरेणैव स्वादूनि फलान्यवाप्य तान्यास्वादयितुं प्रभवाम इति विश्वसिमि।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(पूर्वतोऽनुवर्तते)

तथ्यवत्सलः। आर्य, अन्योऽप्यत्रार्थः सम्भवति। पर्याप्तिर्नामान्यूनता। अन्यूनतायाश्च प्रतियोगि यथा न्यूनत्वं तथाधिक्यमपि। अत एव अपर्याप्त-शब्दस्य निःसीमार्थकल्पने को दोषः ?

वङ्गवत्सलः। अयमेव दोषः—तथाविधार्थे शब्दस्यास्य क्वापि प्रयागो नोपलभ्यत इति।

तथ्यवत्सलः। अत्रैव प्रयोगो जाज्वल्यमानोऽवतिष्ठते। तथाचास्मकमाभाणकः—"हाते दइ पाते दइ। तवु वले कै कै।" दधि हस्ते दधि पात्रे दधि सर्वत्र दीप्यते। तथापि रौति मूर्खोऽयं क्व दधि क्व दधीति च। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वङ्गवत्सलः। अत्रत्यं पदं विवादग्रस्तम्। विवादाध्यासितं पद प्रमाणं भवितुं नार्हति।

तथ्यवत्सलः। महाकवेर्भासस्य कर्णभारनाटके दृश्यते—अपर्याप्तं कनकं ददामीति। अत्र अपर्याप्तशब्दस्यार्थः अपरिमितमिति प्रकरणात् प्रतीयते।

वङ्गवत्सलः। अत एव भासस्य वङ्गीयत्वमस्माभिरुद्घोष्यते।

उपाध्यायः। अहो समीचीना ते युक्तिः।

अपर्याप्तपदस्यात्र निःसीमार्थो यतः स्थितः।
अतो गीताप्रबन्धोऽयं वङ्गीयेन विनिर्मितः॥

इति। वत्स, युक्त्यन्तरं वर्तते चेद् वर्ण्यताम्।

वङ्गवत्सलः। कथं न विद्येत? यद्यपि कोको-कफीप्रभृतीनि तानि तानि पानीयानि वर्तन्ते, तथापि चा एव सुतरां स्वदते वङ्गीयेभ्यः। येषां च यत् प्रियं भवति तेषां दैवतमपि प्रायेण तदाकारमेव भवति। न केवलं यदन्नः पुरुषस्तदन्नास्तस्य देवताः, यदेव हि येषां प्रियं तदेव हि तेषां दैवतम्। अत एव Dickens-विरचिते Pickwick Papers ग्रन्थे दृश्यते पिक्उइक्महोदयेन स्वदैवतं Bardell-गृहिणी tomato sauce रूपेण सम्बोधिता। गीतायां च श्रीभगवतोक्तं—

सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनञ्च।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम्॥

इति। अत्र भगवतात्मानमुद्दिश्य चाहमित्युक्तम्। मुखेन पीत चापानीयं हृदि सन्निविशते, ततश्च स्मृतिज्ञानादीनां समुन्मेषो भवति, सोमरसलक्षणं चापानीयं पीत्वा भगवता वेदान्ती व्यरचि, वेदश्चावेदि। एतस्माच्च स्पष्टमेवावगम्यते वङ्गीयेनैव विदुषा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरचिता भगवद्गीतेति, अन्यथा भगवान् कफारूपेण कोकोरूपेण वा निरूपितोऽभविष्यत् ।

अध्यापकः। अहो अपूर्वा ते युक्तिः !

यदेव हि प्रियं येषां तत्तेषां दैवतं मतम् ।
रक्षःप्रियं नृमांसं तद्रक्षसां दैवतं नरः ॥
वङ्गीयानां प्रियं पेयं चारसो नात्र संशयः ।
अवश्यमुपगन्तव्यं चा तेषां दैवतं परम् ॥
निपातेन चकारेण चारूपेण स्थितेन च ।
प्राप्तं श्रीकृष्णसायुज्यं गीतायां दृश्यते स्फुटम् ॥
वङ्गेषु रचिता गीता वङ्गीयेनैव साधुना ।
वङ्गवासिहितार्थाय पद्मनाभेन धीमता ॥
वङ्गवत्सल ! भद्रं ते चिरं जीव सुखी भव ॥

आगामिनि मासे।

अनुबन्धचतुष्टयम्। अशोकस्य शिलालेखः। रवीन्द्रनाथस्य स्वर्णमृगः। रसमञ्जरी। नामरहस्यम्। जिज्ञासा मीमांसा। पुस्तक-परिचयः। देवानांप्रिय इति पदस्यार्थः।

त्वरन्तां वाचकमहोदयाः ! त्वरन्तां वाचकमहोदयाः !

प्रकाशितं सुसंस्कृतं सवृत्तिकं

चान्द्रव्याकरणम् (पूर्वार्धम्)

पाणिनिसरस्वतीकण्ठाभरणयोः सूत्रसनाथम्।

पाणिनिव्याकरणमेव वार्त्तिकभाष्येष्टप्रादिभिः सुसंस्कृत्य चन्द्राचार्येण प्रणीतं व्याकरणम्। मूल्यं द्वादश रूपकाः।

डेक्कान कालेज रिसार्च इन्ष्टिटुट्, पूणे ६ इत्यतो लभ्यम्।

Deccan College Research Institute, Poona—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Professor, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit,* etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra.

VISVANATH CHATTERJI

81 Shyambazar Street,

CALCUTTA—4

Phone : B. B. 1049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

MAHABHASHYA

(First Ahnika or, Introduction to Sanskrit grammar)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc. Rs. 3/12/-

A No Bhadriyam

Hymn 1. 89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kāśyapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Candra Vyakarana

The first great revised edition of Panini.

Critically edited with Vṛtti, corresponding rules of Paṇini, Bhoja and others, etc. etc.

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Professor, Calcutta University.

Part I (Chapters 1—3). *Price Rupees Twelve only.*

Deccan College Post Graduate and Research Institute, Poona 6.

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 3, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षे] May, 1954 [नवमी संख्या

मञ्जूषा

सम्पादकः—श्रीद्वितीशचन्द्र-चट्टोपाध्यायः

Just Out! **Just Out!!**

Candra Vyakarana—The First Great Revised Edition of Pāṇini, critically edited with Vṛtti and rules of Pāṇini and Bhoja. Rs. 12/-

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries etc. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Five.

Single copy : Eight annas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) मासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

स्त्रीप्रशंसा—वराहमिहिरस्य श्लोकाः

भट्टोत्पलटीकया विद्यावाचस्पतिविरचिताभिनवविस्तृतव्याख्यया च विभूषिता। मूल्यं रूप्यकमात्रम्।

Convocation Address in Ancient India As. 12

Popular Etymology— Re. 1/-

শব্দকথা—সরস, সরল ভাষাতত্ত্ব ২৲

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/৹

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) **of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.**

श्रीविश्वनाथ-चट्टोपाध्यायः।

Phone :—B. B. 4049.

৮১ শ্যামবাজার ষ্ট্রীট্, কলিকাতা ৪

সতী-পঞ্চক

বা

ভারতীয় মহিলা মাহাত্ম্য

পণ্ডিতপ্রবর শ্রীরামরূপ বিদ্যাবাগীশ এম্, আর, এ, এস্ (লণ্ডন) কর্ত্তৃক পরিদৃষ্ট।

ইহাতে দেবহূতি, সুকন্যা, অনসূয়া, লোপামুদ্রা ও সাবিত্রী এই পাঁচটী সতীশিরোমণির চরিত্র ও আনুষঙ্গিক শাস্ত্রোপদেশ সহজ সরল ভাষায় রমণীয় ভঙ্গিতে বিবৃত হইয়াছে।

বিবাহাদিতে উপহার দিবার এরূপ বই আর নাই। মূল্য পাঁচ সিকা।

12, Marcus Lane, Calcutta 7.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

भाञ्जूषा

May, 1954 | १८७६-शकीयज्यैष्ठस्य ८म-वर्षस्य नवमी संख्या | Vol. VIII No. 9

सुभाषितानि

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षे शः क्षितिपालतां क्षितिपतिश्चक्रेशवत् सम्पदम् ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्रह्मास्पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिर्हरपदं ह्याशावधिं को गतः ॥

'A man without money wants a hundred, the possessor of a hundred wants a thousand, the owner of a thousand wants a hundred thousand, the possessor of a hundred thousand wants to be a king, a king wants the wealth of a sovereign ruler, the sovereign wants the position of Indra, Indra wants the position of Brahmā, Brahmā wants the position of Viṣṇu, Viṣṇu wants the position of S'iva—who ever has reached the limit of his desires ?'

Greek. Plouton d'ouden terma pephasmenon andrasi keītai :
Hoi gar nūn hēmeōn pleīston ekhousi bion,
Diplasion speudousi ; tis an koreseien hapantas.

"There are no bounds that can be set to riches. For those of us who now possess most of the world's goods,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

make haste to double them. Who could satisfy the wishes of all ?"

Latin.

Scilicet improbae
Crescunt divitiae, tamen
Curtae nescio quid semper abest rei.

HORACE, *Od*, iii. 24. 62.

"For though the riches of the wicked increase, yet here is always a something wanting to make their store complete."

"Hoards after hoards his rising raptures fill :
Yet still he sighs, for hoards are wanting still."

GOLDSMITH, *Traveller*.

दम्पत्योः कलहः

जलधरमहोदयस्य पत्न्या चपलया साकं विवादः संवृत्तः। चलच्चित्रेषु प्रदर्श्यमानं श्मशानं नाम नाटकमतिमात्रं बीभत्समिति जलधरमहोदयेनोक्तम्। चपलयोक्तं नहि नहि, अतिमात्रं रमणीयमेव तत्। एवञ्च मतवैषम्यान्नितरां क्रुद्धो जलधरश्चपलामसम्भाष्यैव कर्मस्थानं प्रस्थितः। अपराह्णे च गृहं प्रतिनिवृत्तः सानुशयोऽवदत्, अहं तावद्विवादवस्तु चिरं विमृशामि इति। चपलान्यतो दृष्टिं निक्षिप्य परुषस्वरेणावदत्, किं तावता ? जलधरेण मृदुस्वरेणोक्तम्—यथा त्वं मन्यसे तथैवेदानीं मे मतम्। चपलयोक्तम्। अहो विलम्बस्ते सञ्जातः ! इदानीं परिवर्त्तितं मे मतमिति।

भवतु

शून्यमनस्कोऽध्यापकः प्रातर्भ्रमणं कुर्वंश्छात्रं दृष्ट्वावदत्, "वत्स, अद्य त्वया सायं मद्गृहे भोक्तव्यम्। न केवलं सम्पन्नं भोज्यं भविष्यति, चिरमित्रं ते देवदत्तमपि तत्र द्रक्ष्यसि" इति। छात्रेण सविस्मयमुक्तम्, आर्य, अहमेव देवदत्त इति। अध्यापकेनोक्तम्। अहो मे प्रमादः ! नितरां विषण्णोऽस्मि। परं किं तावता। तेन साकं ते संलापो भविष्यति। स ते प्रीतिकरो भविष्यतीति।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरवीन्द्रनाथठाकुरस्य

उर्वशी

[उडालि सुब्बरामशास्त्री]

वेणीं विमुच्य वसनेन विनाकृता त्वं
विन्यस्य पादकमलं विकचारविन्दे ।
विश्वप्रियेऽतिलघुभारतयाऽखिलस्य
हृत्स्वर्गधाम्नि कुरुषेऽखिलविभ्रमांस्त्वम् ॥१५॥
तच्छ्रूयतां—सकलदिक्षु भवन्निमित्त-
माक्रन्दनानि विसरन्ति दिवो भुवश्च ।
हे निष्ठुरे बधिरतां किमु यासि तन्वि !
सम्पादयोर्वशि ! दयामयि मे प्रसादम् ॥१६॥
आवर्तते किमु पुनस्स युगः पुराणः ?
उत्तिष्ठसि त्वमपि किं पुनरब्धिमध्यात् ?
सिक्तैः शिरोजनिकरैः प्रथमप्रभाते
पूर्वां तनूं प्रकटयेर्यदि चित्रमेतत् ॥१८॥
सर्वाङ्गमेव भवदीयमुपैति कम्प-
माघातमाप्य सकलार्थिदृशां चयस्य ।
श्च्योतन्ति वारिकणिका नयनादकस्मात्
क्षोभं प्रयाति जलधिर्नवगीतभङ्गैः ॥१९॥
नायाति नैतिं च पुनस्समयोऽप्यतीतः
*अस्तं गतस्स भगवानभिमानचन्द्रः ।
अस्ताद्दिवासरसिकोर्वशि तत्त्वमेत-
द्वासन्तकालरसवैभवमत्र चित्रम् ॥१९॥
केषां श्वासपरम्परा विरहिणां दीर्घत्वमापादिता
वासन्तोच्छ्वसितैः प्रहर्षजनितैः संसर्गिणी वीज्यते ।

---

* अत्र विसन्धिरुद्वेजकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशासु प्रसृते च पौर्णिमनिशि ज्योत्स्नावितानें स्वयं
वेणुं हस्तनिवेशितामलमसौ दूरस्मृतिर्वादयेत् ॥२०॥
बाष्पप्रवाहमियमद्य गतस्मृतिर्मे
सम्पादयत्यविरतं नयनद्वयेऽस्मिन् ।
आशा तथापि नहि नश्यति जागरूका
प्राणस्य रोदनबलादनिबन्धनेऽद्य ॥२१॥*

देवानांप्रियः (३)

[श्रीक्षितीशचन्द्र चट्टोपाध्यायः]

इदानीं पाणिनीयव्याख्यातॄणां मतान्युपनिबध्यन्ते ।

काशिका। देवानांप्रिय इत्यत्र च षष्ठ्या अलुग् वक्तव्यः। देवानांप्रियः ।

न्यासः। देवानांप्रिय इति। प्रीणातीति प्रियः। इगुपधज्ञाप्रीकिरः कः [३।१।१३५] इति कप्रत्ययः। इयङादेशः ।

पदमञ्जरी ।०।

भाषावृत्तिः। देवानां प्रिये। षष्ठ्या अलुक् स्यात्। देवानांप्रियः।

प्रक्रियाकौमुदी। देवानांप्रिय इति च मूर्खे। [पृः ६९२]।

प्रसादः। देवानांप्रिय इति स्यादलुक् मूर्खेऽभिधेये इति वाच्यम्।

सिद्धान्तकौमुदी। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। ९७९।

प्रौढमनोरमा। मूर्खा हि देवानां प्रीतिं जनयन्ति, देवपशुत्वात्॥ शब्दरत्नम्। मूर्खा हीति। ब्रह्मज्ञानरहिता इत्यर्थः। ते हि पशुवद् देवनियम्यास्तदाह—देवपशुत्वादिति।

तत्त्वबोधिनी। मूर्खा हि देवानां प्रीतिं जनयन्तीति देवपशुत्वादिति

---

* श्रीमद्भिरान्ध्रविश्वविद्यालयसहायाध्यक्षैर्बी गोपालरेड्डीमहोदयैरान्ध्रीकृतायाः श्रीमद्रवीन्द्रनाथकृतेः संस्कृतीकरणम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोरमाया भावः। ब्रह्मज्ञानरहितत्वात् संसारिणो मूर्खाः। ते तु यागादिकर्माण्यनुतिष्ठन्तः पुरोडाशादिप्रदान द्वारा देवानाम् अत्यन्तं प्रीतिं जनयन्ति। ब्रह्मज्ञानिनस्तु न तथा, तेषां यागाद्यनुष्ठानाभावात्। अतो गवादिस्थानापन्नत्वात् मूर्खा एव देवपशव इति।

लघुशब्देन्दुशेखरः। देवानामिति। मूर्खाणामित्यर्थः, मूर्खश्च मूर्खस्य प्रिय एवेत्यजेर्वीत्यत्र कैयटः। अत्र भैरवी। देवानामिति। यद्यपि भाष्ये मूर्खपदं न दृश्यते तथापि तत्रैव बहुशः प्रयोगस्य दर्शनादेवमुक्तम्। इदञ्च वचनं मनोरमायां मूर्खा हि देवानां प्रीतिं जनयन्ति देवपशुत्वादिति यद्यपि व्याख्यातम्, तथाप्यन्यादृशमप्यस्य व्याख्यानं सम्भवतीति तदभिप्रायेणाह—मूर्खाणामिति।

[भाष्ये देवानाम्प्रियशब्दस्य मूर्खार्थे बहुशः प्रयोगो नोपलभ्यते इति पूर्वमेव प्रतिपादितमस्माभिः।]

कस्तावद्देवानां प्रिय इति प्रश्ने भगवानाह—

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥
समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः॥

[गीता १२।१३—१९] इति। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्णमृगः

[स्वर्गत-रवीन्द्रनाथ-ठाकुरस्य]

वैद्यनाथः परेद्यवि काशीगमने सम्मतोऽभवत्। परं पाथेयः क्व ? पत्न्या भूषणानि विक्रीयासावर्थं संगृहीतवान्। भूषणानि तावद् वैद्यनाथस्य पितामह्याः समये निर्मितानि। ईदृशं जात्यं सुवर्णं गुरूणि च भूषणान्यद्यत्वे नैवोपलभ्यन्ते।

वैद्यनाथस्य मनसि सञ्जातं स खलु मरणायैव प्रतिष्ठत इति। पुत्रान् क्रोड़े कृत्वा चुम्बित्वा च साश्रुनेत्रो गृहान्निर्जगाम। तदानीं मोक्षदापि क्रन्दितुं प्रावर्तत।

काश्या गृहस्वामी वैद्यनाथस्य खुल्लश्वशुरस्य परिचित आसीत्, स खलु तस्य व्यवहाराजीव इति। मन्ये तत एव कारणाद् गृहं गरीयसा मूल्येन व्यक्रीणीतेति। वैद्यनाथ एकाक्येव गृहं स्वीकृत्य तत्रावस्थितः। सर्वथा नद्या अनुतटं तद् गृहम्। भवनभित्तिं धावित्वा नदीस्रोतः प्रवहति स्म।

रात्रौ वैद्यनाथस्य गात्राण्यवासीदन्। शून्ये गृहे शिरसः समीपे प्रदीपं प्रज्वाल्य प्रावरणेनापादमस्तकं संवृत्य स शिश्ये। निद्रा पुनः कथमपि न समायान्नेत्रयोः। गभीरायां निशायां प्रशान्ततामुपगते निखिले कोलाहले, कुतश्चित् कञ्चन झञ्झनारावमाकर्ण्य वैद्यनाथश्चकितोऽभवत्। शब्दोऽसौ मृदुः परं विस्पष्टः। पाताले बलिराजस्य कोषाध्यक्षो नाणकानि गणयन् स्थित इति प्रतीयते।

वैद्यनाथस्य मनसि भीतिरपि समुदिता कौतूहलमपि समुदितम्, युगपच्चाशापि प्रादुर्भूता। कम्प्रेण पाणिना प्रदीपमादायासौ गृहाद्गृहमभ्रमत्। अस्मिन् गृहे प्रविष्टे अमुष्माद् गृहाच्छब्दः समायातीति प्रतीयते। अमुष्मिंश्च गृहे प्रविष्टेऽस्माद् गृहाच्छब्दः समायातीति प्रतीयते। वैद्यनाथः सर्वरात्रं केवलं गृहाद् गृहान्तरमभ्रमत्। दिवसे पातालभेदी स शब्दः शब्दान्तरैः संमिश्रोऽभवत्, पृथक्तया न प्रत्यभात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रात्रेर्द्वित्रेषु यामेषु निद्रामुपगते सर्वस्मिञ्जगति पुनरपि स शब्दः प्रबुद्धः। वैद्यनाथस्य चित्तमतीवास्थिरं सञ्जातम्। शब्दं संलक्ष्य कस्यां दिशि गन्तव्यं तद् विभावयितुं नासौ प्रबभूव। मरुभुवोऽभ्यन्तरे सलिलकलकलः संश्रूयते, कस्याः पुनर्दिशः समायाति स शब्दस्तत्तु निर्णेतुं न शक्यते। इयं च शङ्का समुदेति तस्य चित्ते सकृद् भ्रान्तपथावलम्बनेन मा तावत् निगूढा निर्झरिणी सर्वथा गोचरतातीता भूदिति। तृष्णात्तः पान्थः स्तब्धं स्थित्वा प्राणान् पणीकृत्य कर्णौ स्तब्धौ विधायावतिष्ठते, तृष्णा पुनरुत्तरोत्तरं प्राबल्यमधिगच्छति। सैवेदानीं समवस्था वैद्यनाथस्य। (क्रमशः)

नामरहस्यम् (७)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

दुर्योधनशब्दस्य को वार्थः? दुष्टं दुरुपसर्गं निष्कास्य शोभनस्य सूपसर्गस्य सन्निवेशेनार्थस्योत्कर्षो भवति वा न वेत्यत्र विचार्यते।

भाषायां शासियुधिदृशिधृषिभ्यो युच् इति वार्त्तिके भावकर्मणोर्युध्यतेर्युज् विहितः। अत एव यो हि दुःखेन युध्यते, येन साकं युद्धं दुष्करमिति दुर्योधनशब्दस्यार्थः। अत एव दुःशब्दस्यात्र न दूषणत्वं प्रत्युत भूषणत्वमेव। कैश्चित् पुनर्दुःशब्दादुद्विजमानैः स सुयोधन इत्याख्यायते स्म। ततश्च सुखेन युध्यते, येन साकं युद्धमतीव सुकरमित्यर्थः प्रतीयते। दुर्जनदुर्योधनसंसर्गेण सुशब्दोऽप्यत्र निकृष्टार्थप्रतिपादकः संवृत्त इत्यहो नियतेः परिहासः। वृत्तान्तोऽयं—

तात वाभट मा रोदीः कर्मणां गतिरीदृशी।
दुषधातोरिवास्माकं दोषसम्पत्तये गुणाः॥

इति पद्यं स्मारयति।

विद्वद्वर्यस्य वाभटस्य दुहितातिमात्रं सुरूपा विदुषी चासीत्। तस्याश्च सौन्दर्येण मोहितो यवनराजस्तामपाहरत्। तया च दुःखसागरनिमग्नाय पित्रे पत्रं प्रेषितम्। तात वाभट, अत्र विशेषेण पूर्वस्मिञ्जन्मनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नूनं मया दुष्कृतमाचरितं तस्य कर्मणो विपाको जन्मन्यस्मिन्ननुभूयते। किञ्च ये तावत् सौन्दर्यलावण्यादयो मे गुणास्त एवेदानीं ममापहरणे कारणत्वमनुप्राप्ता दोषरूपेण परिणताः। एवमेव दुष्धातोर्गुणे दोष-शब्दः सम्पद्यते। इति।

महाभाष्यपाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अन्येभ्योऽपि दृश्यते [३।३।१३०] इति सूत्रे वर्तते वार्त्तिकम्—"भाषायां शासियुधिदृशिधृषिभ्यो युच्" इति। तत्र च भाष्यम्—भाषायां शासियुधिदृशिधृषिभ्यो युज् वक्तव्यः। दुःशासनः। दुर्योधनः। दुर्दर्शनः। दुर्धर्षणः। इति।

निर्णयसागरयन्त्रमुद्रिते पुस्तके दृश्यते वार्त्तिकान्तरम्—"मृषेश्च" इति। तदुपरि च भाष्यम्—"मृषेश्चेति वक्तव्यम्। दुर्मर्षणः।" इति।

यद्यपि केषुचिद्धस्तलिखितेषु पुस्तकेषु "मृषेश्च" इति वार्त्तिक-मुपलभ्यते, तथापि तस्यापपाठत्वं स्फुटमेव, प्राथमिके वार्त्तिके मृषेरन्त-र्भावस्यातिसुकरत्वाद् द्वैतीयीकवार्त्तिककरणायोगात्। अत एव मृषेश्चेति वक्तव्यम् इति भाष्यकारवचनम्। अत एव काशिकादिषु भाष्यवार्त्तिकसंवादेन भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज् वक्तव्य इति दृश्यते। विशुद्धः पाठः कील्हर्णादिपुस्तकेषूपलभ्यते।

लक्षणादिसंग्रहः

[श्रीफटिकलालदासः]

मानसगुणाः—धैर्योपपत्ती व्यक्तिश्च विसर्गः कल्पना क्षमा।
सदसच्चाशुता चैव मनसो नवधा गुणाः॥

महाभारते मोक्षधर्मपर्वाध्याये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुजनाः—माता पिता गुरुः श्रेयाञ्, ज्येष्ठो भ्राता पितामहः ।
श्वशुरो मातुलश्चैव तथा मातामहः स्मृतः ।
पितुर्ज्येष्ठः कनिष्ठश्च भ्राता ज्येष्ठा निजस्वसा ।
पितुःस्वसा जनन्याश्च एते गुरुजनाः स्मृताः ॥
पत्न्याः पितामहादीनां तथैव गुरवः स्मृताः ।
एतेषु हि पिता श्रेयान् गुरुरेव महागुरुः ॥

—बृहद्धर्मपुराणम्

गोत्रप्रवर्तका ऋषयः—

(१) शाण्डिल्यः काश्यपश्चैव वात्स्यः सावर्णकस्तथा ।
भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥
कल्किषश्चाग्निवेश्यश्च कृष्णात्रेयवशिष्ठकौ ।
विश्वामित्रः कुशिकश्च कौशिकश्च तथापरः ॥
घृतकौशिकमौद्गल्या आलम्यानः पराशरः ।
सौपायनस्तथात्रिश्च वासुकी रोहितस्तथा ॥
वैयाघ्रपद्यकश्चैव जमदग्निस्तथापरः ।
चतुर्विंशतिर्वै गोत्राः कथिताः पूर्वपण्डितैः ॥

—मनुसंहिता

(३) जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमाः ।
वशिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ।
(एतदुपलक्षणमन्येषामपि दर्शनात्)

ग्रहाः (नव)—सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुलीभूताः प्रमादाः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(२)

अलङ्कारशास्त्रप्रबन्धेषु प्रायेणापह्नुतेरुदाहरणं दृश्यते—

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च सञ्जगदिरे भूच्छायमैच्छन् परे।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत् सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ॥

इति। कुवलयानन्दादिषु ग्रन्थेषु सञ्जगदिरे इत्येव पाठः। स च न समीचीनः, गदधातोः परस्मैपदित्वात्। सुमनोहरस्यास्य श्लोकस्य दुष्टोऽयं शब्दश्चारुतरतरुण्याः काणत्वमिव नितरामुद्वेजकः। वस्तुतस्तु "सञ्जगरिरे" इत्येवात्र शुद्धः पाठः, समः प्रतिज्ञाने [१।३।५५] इति सूत्रेण संपूर्वाद् गृणातेरात्मनेपदविधानात्। अत एव रसार्णवसुधाकरे "सञ्जगरिरे" इत्येवोपलभ्यते।

स शूरसेनाधिपतिं सुषेण-
मुद्दिश्य लोकान्तरगीतकीर्त्तिम्।
आचारशुद्धोभयवंशदीपं
शुद्धान्तरक्ष्या जगदे कुमारी ॥ [रघु० ६।४३]

इत्यत्र कामं जगदे इत्यात्मनेपदं सन्दृश्यते, परमयं कर्मणि प्रयोग इति न विस्मर्तव्यम्।

अनुचरेण धनाधिपतेरथो
नगविलोकनविस्मितमानसः।
स जगदे वचनं प्रियमादरा-
न्मुखरतावसरे हि विराजते ॥ [किरात० ५।१६]

इत्यत्र "स जगदे वचनं प्रियमादरात्" इत्यस्य सन्दर्शनेनैव जनानां प्रतीतिर्जाता कर्त्तव्यमिति, गदधातोरात्मनेपदमपि भवतीति, तेन च

CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिपिकरैः प्रमादात् सञ्जगरिरे इत्यस्य स्थाने "सञ्जगदिरे" इति लिखितम्। स च प्रमादः कालक्रमेण बहुलीभूतः। परमत्रापि कर्मण्येव प्रयोगः।

पाणिनीयानि लाघव-करण-कौशलानि

[श्रीरामशङ्करभट्टाचार्यः]

शब्दव्यवहारे लाघवसम्पादनार्थं यानि कौशलानि पाणिनिनाऽचरितानि, तान्यत्र समासतो व्याख्यास्यामः।

शब्दप्रयोगे लाघवकरणं खलु पाणिनेरेकं वैशिष्ट्यम्, अत एवाचार्यः 'लाघवसर्वस्वव्यसनी'त्युच्यते। वक्ष्यमाणानि कौशलानि पाणिनिनोपज्ञातानि इति तु नास्माकमाग्रहः, परन्तु आचार्येणाभ्युपगतानीत्येव।

अत्रादाविदं विज्ञेयं यत् स्वरूपतो व्याकरणशास्त्रमपि लाघवार्थमेव प्रवृत्तम्(१)। प्रतिपदपाठरूपो य उपाय इन्द्रादिकाल आसीत्, तेन सिद्धिलाभो बहुकालसाध्य एवेति निश्चप्रचम्। अल्पकालेन अनेकशब्दार्थज्ञानं व्याकरणनैव सुशकमिति वाग्योगविदां मतम्। स्वयं पतञ्जलिरपि 'लघ्वर्थं चाध्येयं व्याकरणम्' (पस्पशा) इत्याह। एतेन व्याकरणशास्त्रप्रवृत्तिर्लघूपायेन शब्दार्थज्ञानं यथा स्यादित्येवमर्थमिति सिद्धम् (२)।

१। यथोक्तं नागेशचरणैर्मञ्जूषायाम्—'तत्र प्रतिवाक्यं संकेतग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्या इति। एतेन लाघवेन शब्दार्थज्ञानं व्याकरणेन सम्पाद्यत इति स्पष्टम्।

२। इदं निश्चितमेव यत् कोषादिभिः कृत्स्नं शब्दार्थज्ञानं न भवितुमर्हति। यतो हि शब्दानां विश्लेषणं कृत्वा व्याख्यानं क्रियते शब्दशास्त्रेण, अतस्तेन कृत्स्नशब्दार्थसंबन्ध-विवरणं कर्तुं शक्यते। अत्रायं न्यायः—यथा पञ्चानामेव भूतानां ज्ञाने अधिगते भूतनिर्मितानामशेषाणां द्रव्याणां ज्ञानं सुकरं भवति, तथैव प्रकृति-प्रत्ययादिज्ञानेन शब्दार्थसंबन्धसाम्राज्यमधिगतं भविष्यतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च व्याकरणन साधूनामेव शब्दानामन्वाख्यानं क्रियते, नासाधूनाम्—इयं रीतिरपि लाघवार्थमेव इति पतञ्जलिना स्पष्टं प्रत्यपादि। शब्दशास्त्रं शब्दशास्त्रीया रीतिरपि लाघवमेव व्यक्तं निर्दिशति इत्यहो लाघव-व्याकरणयोर्नेदिष्ठः सम्बन्धः (१)।

अथ सोदाहरणानि कौशलानि दर्शयामः।

(क) सर्वेषु लाघवकरणकौशलेषु 'अनुवृत्तिपद्धतिः' प्राधान्यं भजते। प्रायः सर्वेषां सूत्राणामर्थो दुर्घट एव स्यात्, यदि अनुवृत्ति-बलेन सूत्रान्तरादपेक्षितपदानां बुद्ध्याऽवधारणं न स्यात्। तदेतत् स्पष्टमभिहितं वरदराजेन—'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र' इति (लघुकौमुदी)। अनुवृत्तिमहिम्ना स्वल्पाक्षरसूत्राणि बह्वर्थ-गर्भाणि जायन्ते; यथा 'आद् गुणः' (६।१।८७) इति सूत्रम् अनुवृत्तिमहिम्ना 'अवर्णाद् अचि पूर्वपरयोरेको गुण आदेशो भवति संहितायां विषये' इत्यर्थकं भवति। अनुवृत्तपदानामवधि-निर्णय-विषये परम्परागतं व्याख्यानमेव शरणं भवतीति नार्थसाङ्कर्यं भवति॥

(ख) प्रत्याहारकरणमपि लाघवार्थमेव। तच्च 'प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अस्मिन्' इति निरुक्त्याऽपि प्रतीयते। वर्णविषये, प्रत्ययविषये च प्रत्याहारा रचिताः। लाघवमृते नैतस्याः पद्धतेः किमपि प्रयोजनमिति स्पष्टमेव।

(ग) निपातनकरणमपि लाघवार्थम्। येषां पदानां सिद्धये प्रकृति-विकारादिनिर्देशे कृते शब्दव्यवहारे गौरवमवश्यम्भावि, तादृशेषु स्थलेषु निपाततरीत्या पदं सिद्धं कृत्ववाचार्येण प्रादर्शि। तदेतल्लाघवार्थमेवेति मन्यामहे। किञ्च सूत्रसिद्धं पदं रूढमेव

१। सूत्रेण शब्दशास्त्रस्य रचनाऽपि लाघवाय। यदि श्लोकैः शास्त्र-रचना स्यात्, तर्हि शब्दव्यवहारे गौरवं स्यादेव। किञ्च क्वचित् क्वचित् अस्थानेऽपि शब्दस्थापनस्य अवश्यकरणीयत्वात् (छन्दोरक्षणार्थम्) श्लोकरीति-र्दुष्टैव। नायं दोषो सूत्रपक्षेऽवतरति। किञ्च सूत्ररचनायां लाघवमपि करणीयमित्युपदिष्टमाचार्यैः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यपि विज्ञापनार्थं निपातनं कृतम्(१) इति निपातनरीतेर्लाघवकरणार्थत्वं व्यक्तं विज्ञायते।

(ध) तथैव गणपाठरचनाऽपि लाघवाय। येषु बहुसंख्यकेषु शब्देषु समानं कार्यं भवति, तेषा सर्वेषाम् उल्लेखे सति सूत्रशरीरे गौरवं भवत्येव, अतस्तेषु कमपि मुख्यं शब्दमादौ निर्दिशति, आद्यादिशब्दै गंणपाठं विज्ञापयति चाचार्यः; प्राक्पाणिनीये शास्त्रे प्रायेण गणपाठस्य सत्ता नास्त्येव, अतः पाणिनेरिदमपरं वैशिष्ट्यमिति सामान्यतः प्रतीयते।

(ङ) अनुनासिकपाठोऽपि लाघवाय। अनुनासिकपाठमृते पृथक् शब्दप्रयोगबलेन यदि इत्संज्ञकाचां निर्देशः स्यात्, तर्हि शब्दव्यवहारे गौरवं स्यादेवेति निश्चितम्। अनुनासिकपाठेन केवलं स्वरज्ञानं शिष्याचार्यपरम्परया साधनीयम्, अन्यथाऽष्टाध्याय्यां शब्दबाहुल्यं जनिष्यत एव।

(च) स्वरितपाठोऽपि तथैव। अधिकारगतिः यदि पृथक्शब्दबलेनाचार्येण विज्ञापनीया स्यात्, तर्हि शब्दबाहुल्यमवश्यम्भावि।

(छ) णोपदेश-षोपदेशपाठावपि लाघवार्थावेवाचरितौ। तच्च भाष्यकृता स्पष्टमेव व्याख्यातम्(२)।

(ज) संहितया सूत्रप्रणयनमपि लाघवायेति वय मन्यामहे। यद्यपि संहितया निर्देशे योगविभागविषये सन्देहावसरो जायते, तथापि तस्य व्याख्यानगम्यत्वान्न सन्देहः करणीयः। उक्तं हि—'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति।

१। यथोक्तं हरिणा—'धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनम्॥' इति।

२। 'अथ किमर्थं षकारमुद्दिश्य तस्य स आदेशः क्रियते न सकार एवोपदिश्येत? लघ्वर्थमित्याह। कथम्? अविशेषेणायं षकारमुपदिश्य सकारमादेशमुक्त्वा लघूपायेन षत्वं निर्वर्तयति —आदेशप्रत्यययोरिति। इतरथा हि येषां षत्वमिष्यते तेषां तत्र ग्रहणं कर्तव्यं स्यात् (भाष्यम् ६।१।६४) इति। तथैव 'णो नः' (६।१।६५) सूत्रविषयेऽभिहितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(झ) सूत्रकृता बहूनि सूत्राण्येवंरीत्या रचितानि, यया सूत्रस्य अंशविशेषो व्यर्थो भूत्वा कमपि अज्ञातं विज्ञापयति नियमम्। सोऽयं नियमः परिभाषेत्युच्यते। इमाः सर्वाः परिभाषाः प्राचीनेषु व्याकरणेषु वाचनिकरूपेण स्थिता आसन्, पाणिनीये खलु तन्त्रे ज्ञापकसिद्धा भवन्ति(१)। एषाचार्यस्य शैली लक्ष्यते यत् स सूत्ररचनाबलेनैव परिभाषा ज्ञापयति, न तु कण्ठरवेण वक्ति। लाघवार्थमेवेयं पद्धतिराश्रिताऽचार्येण, अन्यथा गौरवं स्यादिति न रिक्तं वचः।

(ञ) संज्ञाकरणमपि तथैव मन्तव्यम्। 'लघ्वर्थं संज्ञाकरणम्' इति जेगीयते महाभाष्ये। एतेन यदि संज्ञा लघिष्ठा न स्यात्, तर्हि तस्या अन्वर्थत्वमेवाभ्युपेयमित्यपि विज्ञाप्यते। अकृतायां संज्ञायां चानेकशब्दयुक्तस्य संज्ञिनः वारंवारं निर्देशेन शब्दगौरवं स्यादेव।

(ट) सूत्रेषु अर्थादेशनं न कृतमाचार्येण। किमर्थमिदम्? इति प्रश्नस्योत्तरे पतञ्जलिर्बभाषे—'तच्च लघ्वर्थम् (२।१।१)। व्याख्यातं च कैयटेन—'लाघवार्थमर्था नादिश्यन्ते, अन्यथा गौरवमनवस्था च स्यात्' इति। एवमर्थादेशनस्याकरणमपि लाघवार्थमिति मन्तव्यम्। [सूत्रेष्वर्थादेशनविषयको विचारोऽत्रैव भाष्यकैयटयोः स्पष्टः।]

(ठ) सूत्ररचनायामुत्सर्गापवादरूपो यो नियमः सूत्रकृताऽस्थितः, सोऽपि लाघवमभिव्यञ्जयति। अनेन नियमेन अल्पैरेव शब्दैः बहूनामेवार्थानां विवरणं कर्तुं शक्यते—इति स्पष्टमेव। पाञ्चशिखेषु सूत्रेषु (योगभाष्ये उद्धृतेषु) बौद्धसूत्रग्रन्थेषु उत्सर्गापवादनियमस्य प्रायेणाभाव एव लक्ष्यते।

(ड) लाघवविषय इदमपि स्मर्तव्यं यद् यत्र लाघवं न कृतं तत्र सर्वेषु स्थलेषु कोऽपि विज्ञापनीयोऽर्थः सूत्रकारस्य विद्यत एवेति

(१) यथोक्तं नागेशभट्टेन-'प्राचीनव्याकरणतन्त्रे वाचनिकानि, अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि .... यानि परिभाषारूपाणि तानि व्याख्यायन्ते' (परिभाषेन्दुशेखरः) इति। अत्रेदं विज्ञेयं यत् प्राचीनेषु व्याकरणेषु इमाः सर्वाः परिभाषा वाचनिकरूपेणैवासन्—इत्यत्र किमपि प्रमाणं नागेशेन न दत्तम्; नापि कैयटेन भाष्यकारेण वा एवंजातीयकं किमप्यभिहितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्याकृद्भिर्निपुणं दर्शितम् । यदि पुनः कस्मिन्नपि सूत्रे शब्दगौरवं विद्यते—तर्हि तद् दोषायैव मन्यन्ते आचार्याः । पठ्यते तैश्च परिभाषाऽपि "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इति । वचनमिदं लाघवमहिम्नः परां काष्ठां विज्ञापयति ।

(ठ) लाघवस्यावश्यकर्तव्यतानियमस्य एकमेव अपवादस्थलं विद्यते । यथोक्तम्—'पर्यायशब्दानां गुरुलाघवचर्चा नाद्रियते' इति । किञ्च यदि कस्मिंश्चित् स्थले शब्दलाघवे कृते अर्थबोधविषये गौरवं भवेत्, तर्हि तत्र शब्दलाघवं परित्यज्यते । मात्रा-पदादिलाघवविषये बहवो विषयाष्टीकाकृद्भिर्बहुत्र दर्शिताः, ते आकरग्रन्थेभ्य एवावगन्तव्या इति ।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

संस्कृताध्यापकः । (प्रमादादाङ्लश्रेणीं प्रविश्य) वत्साः किमिदानीमध्येयं श्रीमद्भिः ?

छात्राः । Paradise Lost.

अध्यापकः । अहो संस्कृत-वाङ्मये परदेशो नष्टः प्राकृतभाषायां Paradise Lost संवृत्तः । परो देशो नाम श्रेष्ठं स्थानम् स्वर्ग इति यावत् । तस्य नाश एवोपवर्णितोऽस्मिन् काव्ये । अपि ज्ञायते श्रीमद्भिः केन प्रणीतमिदं काव्यम् , किं तावद् ग्रन्थकर्तुर्नाम इति ?

छात्राः । Milton.

अध्यापकः । मिलितानामिति शब्दस्य प्राकृतं रूपं Milton इति । न खल्वेकेन कविना विरचितमिदं काव्यं न वा द्वाभ्याम्, परं बहुभिः कविभिर्मिलित्वा निर्मितमिदम् । कति वा सर्गा अत्र वर्तन्ते ?

छात्राः । द्वादश ।

अध्यापकः । द्वादश मासाः संवत्सरस्य, [illegible] च सूर्यस्य विभिन्नं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपम्, सूर्यश्च परदेशस्य देवता, अत एव परदेशो नष्टः (Paradise Lost) इत्यत्र द्वादश सर्गाः।

अध्यापकः। को वास्य नायकः ?

छात्राः। God.

अध्यापकः। गतशब्दस्य प्राकृतं रूपं God इति। गत एवास्य नायकः। सम्यक्। मर्त्यभूमिमवतीर्णः परमेश्वरो गतः (God) इत्युच्यते। उक्तञ्च श्रीमद्भगवद्गीतायां—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इति। को वात्र प्रतिनायकः ?

छात्राः। Satan.

अध्यापकः। अहो शतम्-शब्दस्यैवापभ्रंशः Satan इति। परमेश्वरः सदैव सम एव तिष्ठति, कदाप्यवस्थान्तरं न भजते, अतस्तस्यैकत्वम् दुरात्मा पुनः प्रतिमुहूर्तमेव रूपान्तरं भजते, अत एव तस्य शतत्वम् किञ्च,

मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ॥

इति। अतोऽपि सुजनस्यैकत्वं दुर्जनस्य नानात्वम्।

पुस्तकपरिचयः

सतीपञ्चक वा भारतीय महिला माहात्म्य। श्रीहरिप्रसादशास्त्रि श्रीसत्यप्रसादसाहित्यशास्त्रिणा च विरचितः पण्डितप्रवरेण श्रीरामरूपविद्यावागीश महोदयेन च परिदृष्टो वङ्गाक्षरैर्मुद्रितो वङ्गभाषामयो ग्रन्थः। 12, Marc Lane, Calcutta—7 इत्यतः प्रकाशितः। मूल्यं सपादरूप्यकमात्रम्।

सुमनोहरेऽस्मिन् पुस्तके सतीकुलललामायमानानां देवहूति-सुकन्या-अनसूया-लोपामुद्रा-सावित्रीणां नितिवृत्तानि हृदयस्पर्शिन्या वङ्गभाषया सन्दृब्धानि अवश्यं पठनीयमिदं पुस्तकमस्मद्देशीयाभिर्बालाभिश्च तरुणीभिश्च प्रौढाभिश्च संरक्षणीयं चेदं सयत्नं विद्यालयानां पुस्तकागारेषु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Professor, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra.

VISVANATH CHATTERJI
81 Shyambazar Street,
CALCUTTA—4
Phone : B. B. 4040

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

MAHABHASHYA

(First Ahnika or, Introduction to Sanskrit grammar)

EDITED WITH

English translation, exhaustive critical and explanatory notes, extracts from other commentaries, full Sanskrit explanation of the Vedic mantras etc. etc. Rs. 3/12/-

A No Bhadriyam

Hymn 1.89 of the Rigveda with the critically edited commentaries of (1) Veṅkaṭamādhava (2) Skandasvāmin (3) Mahīdhara (4) Sāyaṇa (5) Kāś'yapa Kṣitīsacandra unfolding the significance of each word and expression, and extracts from the commentaries of Uvaṭa, Haradatta and others, English translations, critical and explanatory notes, comparisons from other languages etc. etc. Price : Rs. 2/8/-

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

Candra Vyakarana

The first great revised edition of Panini.

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, etc. etc.

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Professor, Calcutta University.

Part I (Chapters 1—3). *Price Rupees Twelve only.*

Deccan College Post Graduate and Research Institute, Poona 6.

Printed and published by Sri Jyotish Chandra Chatterjee, B. from 81, Shyambazar Street. Calcutta—4. Printed at the Elm Pr 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षे] June, 1954 [दशमी संख्या

भाञ्जूषा

सम्पादकः—श्रीचितीशचन्द्र-चट्टोपाध्यायः

Works of Dr. K. C. Chatterjee

Candra Vyakarana—The First Great Revised Edition of Pāṇini, critically edited with Vṛtti and rules of Pāṇini and Bhoja. Part I Rs. 12/-

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries etc. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Five.

Single copy : Eight annas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) मासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

स्त्रीप्रशंसा—वराहमिहिरस्य श्लोकाः

भट्टोत्पलटीकया विद्यावाचस्पतिविरचिताभिनवविस्तृतव्याख्यया च विभूषिता। मूल्यं रूप्यकमात्रम्।

Convocation Address in Ancient India As. 12

Popular Etymology— Re. 1/-

शब्दकथा—सरस, सरल भाषातत्त्व २৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া**, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়াবিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে। সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরল ও সরসভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঋগ্বেদের আনোভদ্রসূক্ত পঞ্চভাষ্যসমন্বিত ২॥৹

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/৹

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

Phone :—B. B. 4049.

৪১, শ্যামবাজার ষ্ট্রীট্, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

June, 1954 | १८७६-शकीयाषाढस्य ८म-वर्षस्य दशमी संख्या | Vol. VIII No. 10

आभाणकमाला

अन्याय ये करे आर अन्याय ये सहे ।
तव घृणा येन तारे तृणसम दहे ॥

—रवीन्द्रनाथस्य ।

अन्यायं यः करोतीह तमन्यायं सहेत यः ।
उभौ दहतु निःशेषं तृणे इव घृणा तव ॥

Latin. Invitat culpam, qui delictum praeterit.

He who overlooks one fault invites the commission of another.

German. Das Uebergehen der Schuld reizt Andre zum Verbrechen.

The submitting to one wrong brings on another.

Lat. Veterem injuriam ferendo, invitas novam.

By submitting to an old injury you invite a new one.

निकारस्याप्रतिकुर्वन्नुपास्से निकारं नवम् ।

Greek. Pithēkos ho pithēkos kan khrusea ekhei sumbola.

Latin. Simia simia est etiam si aurea gestet insignia.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

An ape is an ape even though he wears insignia or badges of gold.

सौवर्णलाञ्छनोपेतो वानरो वानरो हि सः ।

An ape's an ape though he wear a gold ring.

Latin. Simia est simia, etiam-si purpura vestiatur.

An ape is an ape though clad in purple.

यः स्वभावो हि यस्य स्यात् तस्यासौ दुरतिक्रमः ।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम् ॥

काकस्य चञ्चू यदि स्वर्णयुक्ते
माणिक्ययुक्तौ चरणौ च तस्य ।
एकैकपक्षे गजराजमुक्ता
तथापि काको न च राजहंसः ॥
काकस्य गात्रं यदि काञ्चनस्य
माणिक्यरत्नं यदि चञ्चुदेशे ।
एकैकपक्षे ग्रथितं मणीनां
तथापि काको न तु राजहंसः ॥
"द्विचक्रयानमारूढो पिबंश्च धूमवर्तिकाम् ।
मकटो नैति सभ्यत्वं वानरत्वं न मुञ्चति ॥" राधाकृष्णन्

परीक्षकस्य बुद्धिवैभवम्

प्रधानपरीक्षकेण सामान्यपरीक्षकैर्दृष्टानि पत्राणि निरीक्ष्यन्ते। एकस्य पत्रस्य संख्यासन्दर्शनेन स विभ्रान्त इव स्थितः। ततश्च येन परीक्षकेण दृष्टं तत् पत्रं स आहूतः, पृष्टश्च, अत्र पूर्णसंख्या शतम्, किमिति भवतास्मै पञ्चोत्तरं शतं प्रदत्तमिति। तेन सप्रसादं विहस्योक्तम्, एतेन न केवलं पृष्टानां प्रश्नानामुत्तराणि विलिखितानि, अपृष्टस्याप्येकस्य प्रश्नस्योत्तरं लिखितम्। अत एवायं समधिकं मानमर्हतीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपदेशपालनम्

हरिचरणमहोदयो यावद् द्वारं पिधाय बहिर्गच्छति तावत् तस्य भार्ययोक्तम्, प्रत्यागमनावसरे शिखामूलमेकमानेतव्यम्। कियत्परिमाणम् इति पृष्टे तयोक्तम्—तव मस्तकसम्मितमिति। ततश्च मध्येमार्गं हरिचरणमहोदयस्य चिरमित्रेण वामाचरणेन साकं साक्षात्कारः सञ्जातः, तस्मै च शिखामूलवार्त्ता निवेदिता। तेनोक्तम्, अलमेतदर्थं विपणिगमनायासेन। अदूरवर्तिनि मे क्षेत्रे बहूनि शिखामूलानि वर्तन्ते, तेषु यदेव रोचते तदेव गृह्यताम् इति।

कियतश्चित् कालादूर्ध्वं वामाचरणाय केनचित् परिचितेन निवेदितम्, अहो को वाद्य कर्मकरस्तव क्षेत्रे? कश्चन पुरुषः सर्वाणि शिखामूलान्युत्पाट्य स्वशिरसा मिमीते इति।

को वा विवाहः?

अर्भको मातापित्रोर्विवाहकालीनमालोकचित्रं पश्यति। कदा गृहीतमिदं चित्रम् इति पृष्टेन पित्रोक्तम्—तव मातुर्मम च विवाहकाले। बुद्धं वा? इति। बालकेनोक्तम्—अहो बुद्धं बुद्धम्। यदा गृहकर्मकरणाय माता त्वयानीतेति।

परीक्षार्थिनो बुद्धिवैभवम्

महेन्द्रनाथो वाचनिकपरीक्षार्थं देहलीमुपस्थितः। तत्र परीक्षकस्तमपृच्छत्, यदि त्वं प्राङ्मुखस्तिष्ठेः, तर्हि उत्तरा दिक् तव दक्षिणपार्श्वे वामपार्श्वे वा स्यात्? इति। महेन्द्रनाथेन तदात्व एवोक्तम्—आर्य, नाहमलमस्मि वक्तुम्। अहं तावद्वैदेशिकः। अपरिचिता मेऽत्रत्या दिग्भागा इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृक्षस्य सूर्यप्रणामः

कस्य वा न विदितं भारतवर्षीयस्य वृक्षलतागुल्मादीनामपि प्राणा वर्तन्त एवेति ? केन वा न श्रुतं मनुसंहितावचनम्—

तमसा बहुरूपेण वेष्टिताः कर्महेतुना ।
अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः ॥

इति ? तत् किमिवात्राश्चर्यं यद् वृक्षा अपि आरोग्यकामनया वा कारणान्तरतो वा जगतस्तस्थुषश्चात्मानं देवदेवं सूर्यं प्रणमेयुः। इदानीं (२४।४।१९५४) वृत्तान्तपत्रेषु प्रकाशितं यदुत्कलदेशे वारिपदान्तर्गतनन्दपुरग्रामे कश्चन तालवृक्षः प्रतिदिवसं प्रभाते पूर्वस्यां दिशि समवनतकायो भूमिं स्पृशन् सूर्यं प्रणमति, सायं च पश्चिमायां दिशि भूतलन्यस्तशिखरस्तथैव सूर्यं प्रणमतीति ।

शापफलम्

भिक्षुकः। मातर्भिक्षां याचे ।

गृहिणी। तिष्ठ, भद्र, तिष्ठ। इयमहमागच्छामि। (आगत्य भिक्षवे तण्डुलमुष्टिं प्रयच्छति ।)

भिक्षुकः। मातः, परमात्मा ते दयताम्। धनैः पुत्रश्च लक्ष्मीवती भवतु भवती । (निष्क्रान्तः)

विंशतितमो भिक्षाकः । (प्रविश्य) मातर्भिक्षां याचे ।

गृहिणी। अद्य बहुभ्यो दत्ता भिक्षा। इदानीं पाककर्मणि व्यापृतास्मि। नास्त्यवसरो भिक्षां दातुम्। अपरत्र गम्यताम्।

भिक्षुः। मातर्भिक्षां याचे।

गृहिणी। अपि त्वं बधिरोऽसि ? सहस्रशो मयोच्यते साम्प्रतमवसरो नास्ति तथापि त्वं रारट्यसे। सत्वरमपसर।

भिक्षुः। मातर्भिक्षां याचे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(गृहिणी क्रोधस्य परां काष्ठामारूढा ज्वलदुल्मुकं भिक्षुगात्रे निक्षिपति ।)

भिक्षुः । यथा सर्वथानपराधस्य मे गात्रं भवत्या ज्वलदुल्मुकेन दग्धम् , तथा भवत्या अपि सर्वस्वमनलेन धक्ष्यते । सरित्पतिर्वा रासायनिको वा कोऽप्यनलं तं न प्रभविष्यति निर्वापयितुम् । (निष्क्रान्तः)

गृहिण्याः पुत्रः । अविहा अविहा । अनलः ! अनलः !

सर्वे (प्रविश्य) । क्व क्व ?

पुत्रः । अत्रैव पेटिकाभ्यन्तरे स्वयमेव समिद्धोऽनलः, दग्धानि च पेटिकाभ्यन्तरवर्तीनि बहुमूल्यानि पत्राणि ।

(सर्वैः सम्भूय महतायासेन निर्वापितोऽनलः ।)

द्वितीयं दृश्यम्

आरक्षिकाध्यक्षः । किमत्र संवृत्तम् ?

गृहपतिः । आर्य, प्रतिदिनमेव परःशता भिक्षवः समागच्छन्ति । न खलु कार्तवीर्यार्जुनस्येवास्माकं बाहुसहस्रं वर्तते । अत एव न प्रभवामो वयं प्रतिदिनं सर्वेभ्यो भिक्षां दातुम् । कस्यचन निर्बन्धातिरेकेण क्रुद्धा मे गृहिणी तं भर्त्सितवती । तत आरभ्य दिवसस्य शतकृत्वस्तत्र तत्र स्वत एवाग्निर्ज्वलति । किमत्र कर्तव्यम् ?

आरक्षिकाध्यक्षः । स्वत एवानलस्य ज्वलनं कदापि न सम्भवति । केनापि प्राणभृता कर्त्रा प्रज्वल्यते । मन्ये परिचारकेण केनचित् परिचारिकया वा कयाचिदग्निः संयोज्यते । तत् सर्वे परिचारकाः सर्वाश्च परिचारिकाः सपदि निष्कास्यन्ताम् ।

परेद्यवि प्रातः

गृहपतिः । आर्य, बहुत्रास्माकं गृहेषु वर्तन्ते रक्षापुरुषाः, परिचारकाश्च सर्वे निराकृताः, भगवतो वह्नेः कोपः पुनः कथमपि शमं न याति । किंवा कर्तव्यमस्माभिः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमः प्रातिवेशिकः। भवतः पूर्वजस्य कस्यापि प्रेतात्मनैवं विधीयते। तद् गयां गत्वा सर्वान् पूर्वजानुद्दिश्य यथाविधि पिण्डः प्रदीयताम्।

द्वितीयः प्रातिवेशिकः। भौतिकः कश्चन समाहूयताम्, तेन मन्त्रबलेन भूता निष्कासयिष्यन्ते।

तृतीयः प्रातिवेशिकः। पुरोहितमाहूय भूतापसारणमन्त्राः प्रवाच्यन्ताम्।

गृहपतिः। अनुगृहीतोऽस्मि। भवतामुपदेशान् पालयिष्यामि।

[ततश्च गृहपतेर्भ्रात्रा गयां गत्वा स्ववंश्येभ्यः सर्वेभ्यो यथाविधि परमया श्रद्धया पिण्डानि प्रदत्तानि। भौतिकोपाध्यायेनागत्य मन्त्रोच्चारणपुरःसरं समन्तात् सर्षपा निक्षिप्ताः। पुरोहितेन च यथाशास्त्रं शान्तिकर्मानुष्ठितम्। अग्निः पुनर्यथापूर्वं तत इतः प्रज्वलति मूल्यवन्ति पत्राणि च वसनानि च द्रव्याणि चाङ्गारशेषतां नयति।]

महाभाष्यादि-पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः [पा० ३।४।२] इति सूत्रस्य भाष्ये दृश्यते—स भवाल्लुनीहि-लुनीहीत्येवायं लुनाति। (कील्हर्न् पृः १६९ पं ६) सोऽहं लुनीहि लुनीहीत्येवं लुनामि (कील्हर्न् पृः १६९, पं १७) इति च। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् [पा० ३।१।२२] इति सूत्रस्य भाष्ये दृश्यते—स भवाञ्जागृहि जागृहीत्येवायं जागर्ति, स भवानीहस्वेहस्वेत्येवायमीहते (की० पृः २९, पं २६), स भवाल्लुनीहि लुनीहीत्येवायं लुनाति (पृः ३०, पं २), स भवाल्लोलयस्व लोलयस्वेत्येवायं लोलयते (कीः पृ ३०, पं ३) इति च। ईशः से। ईडजनोर्ध्व च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[पा० ७।२।७७-७८] इति सूत्रयोर्भाष्ये दृश्यते—स भवानीशिष्वेशिष्वेत्येवायमीष्ट इति [की० पृः ३०२, पं १७]। प्रकारे गुणवचनस्य [पा० ८।१।१२] इति सूत्रस्य भाष्येऽपि दृश्यते—स भवाल्लुनीहि लुनीहीत्येवायं लुनाति [की० पृः ३८९ पं २५] इति।

अस्माभिर्दृष्टेषु सर्वेष्वेव भाष्यपुस्तकेषु प्रथमपुरुषस्थले 'एवायम्' इति उत्तमपुरुषस्थले च 'एवम्' इत्युपलभ्यते। एतत्तु न समीचीनम्। 'स भवाल्लुनीहि लुनीहीत्येवायं लुनाति' इति वाक्ये स भवान् इत्यस्य क्रिया न दृश्यते। अत एव स भवाल्लुनीहि लुनीहीत्येवं लुनाति इति पठनीयम्।

इदानीं तेषु तेषु व्याकरणेषु दृष्टान्युदाहरणानि प्रदर्श्यन्ते।

काशिका। लुनीहि लुनीहीत्येवायं लुनाति, इमौ लुनीतः, इमे लुनन्ति। लुनीहि लुनीहीत्येव त्वं लुनासि युवां लुनीथः यूयं लुनीथः। ....लुनीहि लुनीहीत्येवाहं लुनामि आवां लुनीवः वयं लुनीमः। अधीष्वाधीष्वेत्येवायमधीते। ३।४।२।

चन्द्रवृत्तौ [१।३।१२८], कातन्त्रवृत्तौ [३।१।२१], जैनेन्द्रवृत्तौ [२।४।२], शाकटायनवृत्तौ [४।४।१३९], सरस्वतीकण्ठाभरणवृत्तौ [२।४।२२५], हेमचन्द्रवृत्तौ [५।४।४२], संक्षिप्तसारवृत्तौ [२।६३३], मुग्धबोधटीकायाम् [९५८], सुपद्मवृत्तौ [३।२।७६], प्रयोगरत्नमालायाम् [१४।६५२] अप्येवम्। चन्द्रवृत्तौ विस्पष्टमेवोक्तम्—एवमसौ त्वरावान् यदन्यानपि प्रेरयन्निव तां क्रियां करोतीति।

अत एव "स भवाल्लुनीहि लुनीहीत्येवं लुनाति" इत्यस्य 'लुनीहि लुनीहीत्येवायं लुनाति" इत्यस्य च सङ्करेण "स भवाल्लुनीहि लुनीहीत्येवायं लुनातीति" भाष्ये लिपिकर-प्रमादपाठ इति प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

मुद्रितासु कातन्त्रवृत्तिषु दृश्यते—लुनीत लुनीत इत्येवायं यू

Digitized by Arya Samaj Foundation Chennai and eGangotri

लुनीथ, अधीध्वमधीध्वमेत्येवायं यूयमधीध्वे इति। एतदपि लिपिकर-प्रमादविजृम्भितम्। इत्येवायमित्यत्र इत्येवमिति पठनीयम्।

संक्षिप्तसारवृत्तौ "लुनीहि लुनीह्ययं लुनाति" इति, प्रयोगरत्नमाला-वृत्तौ च "लुनीहि लनीहि शत्रून्नृपतिर्लुनाति" इति इतिकारशून्यमुदा-हरणं समीचीनतया न प्रतिभाति।

पुरीमवस्कन्द लुनीहि नन्दनं
मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा बली
य इत्थमस्वास्थ्यमहर्दिवं दिवः॥ [१।५१]

इति माघपद्यव्याख्याने मल्लिनाथसूरिणोक्तम्—यो बली बलवान् रावणो नमुचिद्विषा इन्द्रेण विगृह्य विरुध्य पुरीम् अमरावतीम् अवस्कन्द अवरुरोध। नन्दनमिन्द्रवनम्..लुनीहि चिच्छद। रत्नानि श्रेष्ठवस्तूनि मणीन् वा मुषाण मुमोष।..अमराङ्गनाः हर जहार। **सर्वत्र पौनः-पुन्येनेत्यर्थः**। इत्थम् अनेन प्रकारेण। अहनि च दिवा च अहर्दिवम्। अहन्यहनीत्यर्थः।..दिवः स्वर्गस्य अस्वास्थ्यम् उपद्रवं चक्रे। अत्राव-स्कन्देत्यादौ "क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः" इत्यनु-वृत्तौ "समुच्चयेऽन्यतरस्याम्" इति विकल्पेन कालसामान्ये लोट्।.. पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः। अवस्कन्दनादिक्रियाविशेषाणां समुच्चयः क्रियासमभिहारः। इति।

व्याख्यातृभिः "समुच्चये सामान्यवचनस्य" इत्यत्र क्रियासमभि-हारे इत्यस्यानुवृत्तिर्नानुमन्यते, अत एव "सर्वत्र पौनःपुन्येनेत्यर्थः" इत्यंशः, "पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः" इत्यंशश्च न समीचीनः। "अवस्कन्दनादिक्रियाविशेषाणां समुच्चयः क्रियासमभि-हारः" इत्यत्र अवस्कन्दनादिक्रियाविशेषाणां समाहारः समुच्चय इति पठनीयमिति प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्णमृगः

[स्वर्गत-रवीन्द्रनाथ-ठाकुरस्य]

अनिश्चयेन व्यतीतानि बहूनि दिवसानि। केवलम् अनिद्रया वृथायासेन च तस्य सन्तोषस्निग्धे वदनमण्डले व्यग्रतायास्तीव्रत्व रेखाङ्कितं सञ्जातं कोटरनिविष्टयोश्चकितयोश्च नेत्रयोः माध्याह्निकीष्विव सिकतासु काचन ज्वाला प्रकाशिताभूत्।

अन्ततश्चैकदा द्विप्रहरवेलायां सर्वाणि द्वाराणि निरुद्ध्य निखिले गृहकुट्टिमे महाखनित्रेणाहते पार्श्ववर्त्तिनः कस्माच्चन क्षुद्रप्रकोष्ठात् शून्योदरस्येव शब्दः समुद्भूतः।

अथ समागते निशीथे सुषुप्तिसुखमनुभवति त्रिभुवने, वैद्यनाथ एकक एव जाग्रत् कुट्टिमस्य खननकर्मणि संप्रवृत्तः। प्रभातप्रायायां च निशीथिन्याम्, विवरखननं सम्पूर्णतामगमत्। ततश्च वैद्यनाथोऽपश्यत्, अधस्ताद् गृहमिव किञ्चन वर्तते इति, परं नोदसहतासौ नशे तमसि निर्विचारेण तत्र पदमवतारयितुम्। स तस्य विवरस्योपरि शय्यामास्तीर्याशयिष्ट। परं शब्दोऽसौ तथा परिस्फुटतामगच्छद् यथा भयेनासौ तत उत्थायाचलत्, अथच गृहमरक्षितं विधाय द्वारं परित्यज्य दूरगमने तस्य प्रवृत्तिर्नासीत्। लोभश्च भयञ्च द्वाभ्यां दिग्भ्यां द्वयो र्हस्तयोर्धृत्वा तं समाकर्षताम्। एवञ्च निशा व्यतिचक्राम।

अद्य दिवसभागेऽपि शब्दोऽश्रूयत। गृहाभ्यन्तरे भृत्यस्यागमनम् अननुमन्य बहिरेवासौ निरवर्तयद् भोजनादिकम्। परिसमापिताहारश्च गृहं प्रविश्य द्वारं तालकबद्धमकरोत्।

दुर्गानामोच्चारणपुरःसरं गह्वरमुखादपसारिता तेन शय्या। सलिलस्य छलत्कारो धातुद्रव्यस्य च ठनत्कारो विस्पष्टमेव श्रयते स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भीतभीतोऽसौ विवरसमीपे शनैः शनैर्वदनमण्डलमभिमुखीकृत्या पश्यत् अनत्युच्छ्रितस्य प्रकोष्ठस्याभ्यन्तरे सलिलस्रोतः प्रवहतीति। तमसि तत्र विशेषतोऽपरं किमपि नासौ प्रबभूव द्रष्टुम्।

बृहतीमेकां यष्टिमवतार्यापश्यत् जानुदघ्नमेव जलम् इति। दीपशालाकाधानीं वर्तिकां च गृहीत्वानायासेनैवासौ तस्मिन्नगभीरे गृहे न्यपतत्। कदाचिन्मुहूर्तमात्रेण सर्वैवाशाप्रभा निर्वायात् इति वर्त्तिकां प्रज्वलयतस्तस्य पाणिश्चकम्पे। बहुदीपशलाकापायानन्तरमन्ततो ज्वलिता वर्त्तिका।

सोऽपश्यत्—स्थूले लौहशृङ्खले सुबृहत् ताम्रफलकं बद्धन्तिष्ठति। अन्तरान्तरा सलिलस्रोतश्च प्राबल्यमधिगच्छति, शृङ्खलं च सलिले निपत्य शब्दायते। इति।

वैद्यनाथः सलिलोपरि शप्शपाशब्दमुत्थापयन् सत्वरं तं कलशमुपागच्छत्, गत्वा चापश्यद् रिक्तः स कलश इति। (क्रमशः)

देवानांप्रियः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ये तावद् यथाकालं यथाविधि च स्वधर्ममनुतिष्ठन्ति त एव देवानां प्रियाः। समासे पुनरेकार्थीभावादर्थस्य वैशिष्ट्यमुपलभ्यते। दृश्यते च मूर्खा एव प्रायेणेह देवानामनुग्रहभाजो भवन्तीति। अत एव वङ्गीयानामाभाणकः—

आनाड़ीर पाशा
पड़े खाशा।

सम्यगेव पतन्तीह मूर्खस्य खलु पाशकाः।

Fools have fortune (मूर्खाः खलः भाग्यवन्तः). Fortune favet fatuis. Fortune favours fools (मूर्खाः खल दैवस्यानुग्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाजनम्) इति चाङ्लादीनामाभाणकाः। फरासीसानामपि जागर्त्याभाणकः—Dieu aide à trois sortes de personnes, aux fous, aux enfants, et aux ivrognes. (God protects three sorts of persons, fools and children and drunkards.) Montaigne-महोदयेनाप्युक्तम्—Fortune, to show us her power and abate our presumption, seeing she could not make fools wise, has made them fortunate. स्वशक्तिं नः प्रदर्शयितुम् अभिमानं च नः प्रशमयितुं विधिर्मूर्खान् प्रज्ञान् विधातुमशक्नुवंस्तान् भाग्यवतो व्यदधात्।

महाभाष्यप्रयोगपर्यालोचनया प्रतीयते प्रथमतस्तावद् देवानांप्रियशब्दः महोदय-महाशयायुष्मत्प्रभृति-शब्दवद् युष्मच्छब्दसमानार्थक आयुष्मच्छब्देन तुल्ययोगक्षेमश्चासीत्। ततश्च व्याजस्तुतिरूपेण प्रयुक्तोऽयम् आयुष्मद्-महाब्राह्मणादिशब्दवन्निन्दितार्थं बोधयति। अत एवार्वाचीनै वैयाकरणैरस्य मूर्खार्थित्वमभिमतम्। अत एव प्रक्रियाकौमुद्यां तदनुसारिण्यां सिद्धान्तकौमुद्यां च देवानांप्रिय इति च इति कात्यायनीयं वार्त्तिकम् देवानांप्रिय इति च मूर्खे इति संस्कृतम्। वचनकाले यदा व्याजस्तुत्या प्रतिवक्ता देवानांप्रिय इति सम्बोध्यते तदा प्रायेण प्रकृतविषये तस्याज्ञतैव प्रतिपादयितुमिष्यते इति। न खल्वेतावता सर्वत्रैव समस्तस्य देवानांप्रियशब्दस्य मूर्खोऽर्थः कल्पनीयः। अत एव रामचन्द्रभट्टोजिप्रभृतिभिः संस्कृतं वार्त्तिकं पुनरपि "देवानांप्रिय इति च मूर्खे प्रायेण" इति संस्कर्तव्यम्। "विशेषतो हि रक्षन्ति मूर्खान् देवा धरातले" इत्यस्य समानार्थकं वाक्यं सर्वेषु देशेषु सर्वासु च भाषासूपलभ्यते इति।

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम्।
अवन्ध्यं दिवसं कुर्यादृष्टाभ्यामर्थसञ्चयम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुलीभूताः प्रमादाः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

श्रीमच्चैतन्यदेवस्य वदनकमलाद्विनिर्गतः श्लोकः—

तृणादपि सुनीचेन तरोरिव सहिष्णुना ।
अमानिना मानदेन कीर्तनीयः सदा हरिः ॥

इति वङ्गेषु प्रसिद्धिः । अत्र तरोरिव सहिष्णुना इति व्यक्तमेव प्रामादिकम् । इवशब्देन यत्र सादृश्यं बोध्यते तत्रोपमानोपमेययोः समानविभक्तिकत्वं तन्त्रमिति हि वयाकरणानां सिद्धान्तः । अत एव तरोरपि सहिष्णुना इति शुद्धः पाठः । तरुणेव सहिष्णुना इत्यपि व्याकरणसङ्गत एव, परं प्रक्रमानुरोधेन तरोरपीत्येव पाठः समीचीनः ।

एवमेव हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम् इत्यस्यापि प्रामादिकत्वं बोद्धव्यम् । अर्वाचीनैष्टीकाकृद्भिः कुशं काशं वावलम्ब्यास्य साधुत्व-संसाधनाय प्रयत्यते, परमस्य प्रामादिकत्वे नास्ति लेशतोऽपि संशयावकाशः ।

नामरहस्यम् (६)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सरमेति सुप्रसिद्धस्य नाम्नः को वार्थ इति पृच्छन्ति बहवः । आपातदृष्ट्यास्यार्थो लज्जावतीति प्रतीयते, भाषायां पारसीकस्य शरम्-शब्दस्य (आवेस्ता फ्शरेम्, आङ्ग्ल harm, सं श्रम्) लज्जार्थे प्रसिद्धेः । वस्तुतस्तु सृ गतौ इति धातोः सरमाशब्दो निष्पन्न इति व्यक्तमेव । अत एव सरमा सरणात् इति निरुक्तम् (११।२५) । सृधातोर्मन्प्रत्यये (उ० १।१०९) सर्मो भवति, तस्य चार्थो गमनमिति प्रवाह इति च । इमनिच-प्रत्ययेन इमनिन्-प्रत्ययेन च सरिमन् भवति, तस्यार्थो वायुरिति । एवमेव सृधातोः कर्तरि अमप्रत्ययात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रियां टापि सरमेति पदं निष्पन्नम्। अमप्रत्ययस्वरेण मध्योदात्तोऽयं शब्दः। अस्य च यौगिकोऽर्थः—शीघ्रगामिनीति। ऋग्वेदे देवशुन्या नाम सरमेति। चतुश्चक्षुषौ शबलवर्णौ श्वानौ तस्यास्तनयौ सारमेय-समाख्यया परिचितौ। क्रमेण च सरमाशब्दः सामान्यतः शुनीवाचकः संवृत्तः सारमेयशब्दश्च सामान्यतः शुनकवाचकः सञ्जातः। विशेष-वाचकानां शब्दानां सामान्यपरत्वं सुप्रसिद्धं शब्दशास्त्रेषु।

यत्तु टीकासर्वस्वकारेणोक्तम्—सर्वेर्बाहुलकात् प्रथेरमच् इति, तन्न, अमचश्चित्त्वात् सरमाशब्दस्यान्तोदात्तत्वप्रसङ्गात्।

जिज्ञासा मीमांसा च

प्रश्नः। Dustbin-शब्दस्य कः संस्कृत-प्रतिशब्दः।

उत्तरम्। धूलिधानी।

प्रश्नः। Inheritory-शब्दस्य कः संस्कृतः प्रतिशब्दः?

उत्तरम्। Inheritory-शब्दोऽयं सर्वथा गगनकुसुमकल्प एव। मन्ये inherited-शब्दस्य hereditory-शब्दस्य च सङ्करेण inheritory शब्देन कृतं पदम् इति। Inherited—वंशानुक्रमेण प्राप्तम्, hereditory—परम्परीणम्।

प्रश्नः। व्याकरणग्रन्थेषु प्रसज्यते इति पदं दृश्यते। तत् पदं साधु वा प्रामादिकं वा?

अस्योत्तरं वारान्तरे प्रकाशयिष्यते।

व्याकरणविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सर्वं गुणकात्स्न्ये [६।२।९३] इति सूत्रस्य भाष्ये दृश्यते—गुणान्तरेण समासस्तत्रलोपश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणात्तरेण समासस्तरलोपश्च वक्तव्यः । सर्वेषां श्वेततरः सर्वश्वेत इति ।

याजकादिभिश्च [२।२।९]-सूत्रस्य काशिकायां दृश्यते—गुणात्तरेण तरलोपश्चेति वक्तव्यम् । सर्वेषां श्वेततरः सर्वश्वेतः । सर्वेषां महत्तरः सर्वमहान् । न निर्धारण इति प्रतिषेधे प्राप्ते वचनमिदम् । इति ।

सर्वस्य द्वे [८।१।१] इति सूत्रस्य भाष्ये दृश्यते—इह व्याकरणे यः **सर्वाल्पीयान्** स्वरव्यवहारः स मात्रया भवति, नार्धमात्रया व्यवहारोऽस्ति इति ।

सर्वषां श्वेततर इत्यादिषु तरप्प्रत्ययः सर्वाल्पीयान् इत्यत्र च ईयसुन्-प्रत्ययो नोपपद्यते, द्विवचनविभज्योपपदे तरबीयसुनौ [५।३।५७] इत्यस्याप्रवृत्तेः । तथा च भाष्यकृतोक्तम् [५।३।५५]—"न खल्वपि बहूनां प्रकर्षे तरपा भवितव्यम् । केन तर्हि ? तमपा ।" इति ।

परं तरबीयसुनोस्तमबिष्ठनोश्च सङ्करः प्रायेण सर्वास्वेव भाषासु प्रत्यक्षीभवति ।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः । वत्स विद्याविलास, संपाठः पठ्यताम् ।

विद्याविलासः । (पठति)

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः ॥

अध्यापकः । सुचारुशब्दस्य कोऽर्थः ?

विद्याविलासः । न जाने जानकीजाने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यापकः। वत्स, किं वक्तुकामोऽसि।

विद्याविलासः। आर्य, नाहं जाने, परं विद्वद्वर्येण जानकीनाथ-भट्टाचार्येण व्याख्यातं भट्टिकाव्यमस्माभिरधीयते। स एव जानातीति।

अध्यापकः। जानकीति प्रथमपुरुषः, कथमुत्तमपुरुषक्रियया तस्यान्वयः स्यात्।

विद्याविलासः। आर्य वङ्गभाषायां जाने इति प्रथमपुरुषं क्रियापदम्। अन्तरान्तरा देशभाषापदान्यपि देवभाषायां प्रयुज्यन्ते।

अध्यापकः। वत्स, प्रशस्यं ते प्रत्युत्पन्नमतित्वम्। इत ऊर्ध्वं पाठष्ववधातव्यम्। कथं वा जानकीनाथेन व्याख्यातोऽयं श्लोकः?

विद्याविलासः। (पठति) तत् जलं न यत् सुचारूणि अतीव हृद्यानि पङ्कजानि यत्र तथोक्तं रम्यकमलं न बभूवेत्यध्याहारः, न द्रव्यं सत्तां व्यभिचरतीति न्यायात्। सर्वाण्येव सरांसि पद्मैर्मण्डितानीति प्रौढोक्तिः। यत्तदोर्व्यत्यासः दार्ढ्याय। एवमुत्तरत्रापि। तत् पङ्कजं न, यत् लीना निषण्णाः षट्पदा यत्रेति भ्रमराधिष्ठितं, तथा न भवतीति तथोक्तम्। नञ्समासः। नन्वत्र निषेधस्य प्राधान्यात् समासे नञो गुणीभावः अयुक्त एवेति चेत्, सत्यम्, परं प्रसज्यप्रतिषेधेऽपि क्वचित् समास इष्यत इति सोढव्यम्। अथवा, यन्न निलीनषट्पद-मित्येष पाठः स्वीक्रियताम्। असौ षट्पदो न यः कलं मनोहरं यथा स्यात् तथा न जुगुञ्ज झङ्कारं न कृतवान्। सर्वं जलं प्ररूढपद्ममित्य-समञ्जसम्, अत एव यत् जलं सुचारुपङ्कजं न, तत् प्रशस्तजलं न इति व्याख्यानमेव साधीय इति केचित्। भूतमात्रप्रणयवतां हालिकानां कथं चित्रोक्तिप्रवेश इत्यास्तां तेषां प्रबोधने प्रयासः। ननु तदा (तच्छब्देन) प्रक्रम्य कथमत्र अदस्-शब्दे प्रणयः कृत इति चेत् सत्यम्, तथापि इदमेतददःशब्दानां तच्छब्दसमानार्थकतया सोढव्यम्, गुणसन्नि-पाते दोषलवो निमज्जतीति। त्रस्यते चेदालङ्कारिकतनयेभ्यः, न षट्पदः सः(?)कलगुञ्जितो न यः इति पठ्यताम्। तत् गुञ्जितं भृङ्गरुतं न। नपुंसके भावे क्त इति क्तः। यत् मनः श्रोतुश्चित्तं न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जहार आनन्देन अवशं न चकार। दूषणकातरश्चेत् न गुञ्जितं तच्च न यन्मनोहरमिति पठ। मनोरञ्जनविधौ न किञ्चिदप्यहीयत। सरसि पद्मम्, पद्मे भृङ्गैः, भृङ्गे गुञ्जितम्, गुञ्जिते च माधुर्यमव्यभिचारेण रेजे इत्यहो शरद्विभूतेः समग्रतेति पर्यवसितोऽर्थः। सोपानश्रेणीन्यायेन विशेषणसंयोगादेकावल्यलङ्कारः, नञः प्रयोगादपोहरूपः। गुणक्रियायौगपद्यात् समुच्चयोऽपि। अङ्गाङ्गिभावेन सङ्करः। भङ्ग्या च शरत्सौन्दर्यमेव गम्यते।

अध्यापकः। अहो प्रौढत्वं रमणीयत्वं च व्याख्यानस्य! अहो पाण्डित्यं वङ्गीयविद्वद्वरेण्यस्य!

विद्याविलासः। आर्य, एतदनुरूपं पद्यं Spenser-विरचिते The Faery Queene-काव्यस्य षष्ठसर्गे दृश्यते—

No tree, whose braunches did not bravely spring;
No braunch, wheron a fine bird did not sit:
No bird, but did her shrill notes sweetly sing;
No song but did containe a lovely dit. इति।

पुस्तकपरिचयः

Nadi Jyotisha or the Stellar system of Astrology by Sri Gopal Krishna Row ("Meena"), Part I Rs. 2/8, Part II Rs. 2/8/-. 29, Arimuthu Achari Street, Triplicane, Madras 5 इत्यतो ग्रन्थकृतः सकाशाल्लभ्यम्।

अत्र प्रथमखण्डे तिथिनक्षत्रभावादीनां विशदं विस्तृतं च विवरणमुपनिबद्धम्, ततश्च प्रतिभावं ग्रहसन्निवेशफलं संक्षेपतो विलिखितम्। ततश्च द्वादशभावानां विचारः प्रवर्तितः। द्वितीये भागे प्रथमतो भूमिका, ततो दशाफलकाण्डः, ततो भावफलकाण्डः, ततो मिश्रफलकाण्डस्ततो योगफलकाण्ड एवंरीत्या काण्डपञ्चकं सन्निवेशितम्। अत्र च फलनिर्णये नक्षत्राणां प्राधान्यं प्रतिपादितम्। अतिमात्रं चित्ताकर्षकं पुस्तकद्वितयमवश्यमवलोकनीयं ज्योतिषशास्त्ररसिकैरिति शिवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. SUNITI KUMAR CHATTERJEE, M.A., D.Litt. (London) *Chairman, Bengal Legislative Council*, writes :—

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enlist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as-dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistics he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bonmots*, wise sayings, *Mahavakyas*, etc, from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patanjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Professor, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit*, etc. have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra.

VISVANATH CHATTERJI

81 Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B.A., from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 53, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

अष्टम-वर्षे] August, 1954 [द्वादशी संख्या

मञ्जूषा

सम्पादकः—श्रीचितीशचन्द्र-चट्टोपाध्यायः

Works of Dr. K. C. Chatterjee

Candra Vyakarana—The First Great Revised Edition of Pāṇini, critically edited with Vṛtti, rules of Pāṇini and Bhoja, etc. etc. Part I Rs. 12/-

Patanjali's MAHABHASHYA (Paspasha) with English translation, exhaustive critical and explanatory notes, commentaries etc. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Five.

Single copy : Eight annas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মঞ্জূষায়া নিয়মাবলী

মঞ্জূষায়া বার্ষিকং মূল্যং রূপকত্রিতয়ম্। আশ্বিন (September) মাসতো বর্ষারম্ভঃ। গ্রাহকৈর্বর্ষস্য প্রথমসংখ্যাত এব গ্রহীতব্যম্।

২। প্রতিসৌরমাসং দশমদিনে (আঙ্লমাসস্য চতুর্বিংশে দিবসে) 81, Shyambazar Street, Calcutta 4 ইত্যতো মঞ্জূষা প্রকাশ্যতে।

স্ত্রীপ্রশংসা—বরাহমিহিরস্য শ্লোকাঃ ভট্টোৎপলটীকয়া বিদ্যাবাচস্পতিবিরচিতাভিনববিস্তৃতব্যাখ্যয়া চ বিভূষিতা। মূল্যং রূপ্যকমাত্রম্।

Convocation Address in Ancient India As. 12

Popular Etymology— Re. 1/-

শব্দকথা—সরস, সরল ভাষাতত্ত্ব ২৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া**, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওতপ্রোতশব্দে বিসর্গ আছে কি না; যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে; সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরল ও সরসভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঋগ্বেদীয়ম্ আনোভদ্রসূক্তম্ পঞ্চভাষ্যসমন্বিতম্ ২॥০

ঊষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/০

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

শ্রীবিশ্বনাথ-চট্টোপাধ্যায়ঃ।

Phone :—B. B. 4049. ৪১ শ্যামবাজার ষ্ট্রীট, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

सज्जूषा

August, 1954 | १८७६-शकीयभाद्रस्य ८म-वर्षस्य द्वादशी संख्या | Vol. VIII No. 12

अनुरूपोक्तयः

आश्रयामि यदि कल्पपादपं
सोऽपि याति सहसावकेशिताम् ।
मादृशां नयनकोणगोचरः
सागरोऽपि मरुभूमिसोदरः ॥

'If I resort to the wish-fulfilling tree, forthwith it becomes barren. The sea also coming within the range of vision of unfortunate people like myself assumes the form of a desert.'

Lord Lytton (1803-1873) विरचिते Money नाटके दृश्यते If I had been bred a hatter, little boys would have come into the world without heads.

अहञ्चेदुष्णीषविक्रयव्यापारे विनीतोऽभविष्यम्, शिशवः शिरःशून्या एव भूमिष्ठा अभविष्यन् ।

त ाच वङ्गीयानामाभाणकः—

अभागा येदिके याय
समुद्र शुकाये याय ।

यां दिशमाश्रयति भाग्यहतकस्तत्रत्यः सागरोऽपि परिशुष्यति ।

वार्धक्ये वर्धते स्पृहा । योगवाशिष्ठम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Like our shadows
Our wishes lengthen as our sun declines.
YOUNG, *Night*.

यथा यथा नः सूर्यस्य तेजो ह्रसति तथा तथा छायेव नः स्पृहा दीर्घतामापद्यते ।

द्वेषं हन्ति न विद्वेषः

[श्रीफटिकलाल-दासः]

पुरैकदाभवज्जन्यं काशीकोशलराजयोः ।
तत्र पराजितो जातः कोशलानामधीश्वरः ॥
भ्रष्टराज्यः सपत्नीकः सोऽविशद् गहनं वनम् ।
अगूढ तत्र चात्मानं कथञ्चिद्दैवदुर्गतः ॥
जीवग्राहं ग्रहीतुं तौ काशीराजो व्यघोषयत् ।
दत्तवार्ताय यच्छामि लक्षं मुद्राः शिरः प्रति ॥
घोषितं तत् समाकर्ण्य लोभेन हृतचेतनः ।
राजानं ग्राहयामास सुहृत्तस्यैव कश्चन ॥
बन्दिं कृत्वा सभार्यं तं कोशलेशं सुकौशलम् ।
काशीराजस्तयोश्चक्रे प्राणदण्डं निदारुणम् ॥
कुठारेण शिरश्छेत्तुं घातकेन तयोस्ततः ।
श्मशानं तौ समानीतौ घोरमेकं नृपाज्ञया ॥
प्राप्योदन्तं तयोरेकः सुतस्तत्र समागतः ।
पतित्वा च पदे पित्रोर्विललाप भृशं रुजा ॥
कोशलेशस्तमुत्थाप्य सान्त्वयन्निजगाद तम् ।
मोहं वत्स त्यजैनं नौ शरीरे पाञ्चभौतिके ॥
मा स्म शोचीर्निवर्तस्व लब्ध्वाशिषं पितुस्तव ।
श्रुत्वा च प्राप्तकालस्य व्याहृतिमन्तिमां शुभाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा भूः शीघ्री विलम्बी वा मतिश्छन्ना यदा भवेत् ।
द्वेषं हन्ति न विद्वेषो द्वेषोऽद्वेषेण शाम्यति ॥
वदतस्तस्य वाक्यानि छिन्नं शिरो भुवं गतम् ।
अहो दैवी गतिश्चित्रा नियतिः केन बाध्यते ॥
शिरसि पातिते मातुः पुत्रस्ततो न्यवर्तत ।
निखाय हृदये दृश्यमरुन्तुदं निदारुणम् ॥
तस्थौ नित्यं स्मरन् वाक्यं पित्रोदितं मुमूर्षुणा ।
न तु तस्याशयं हन्त बुबुधे स्तोकमेव सः ॥
कालेन गच्छता सोऽभूत् काशीराजाङ्गसेवकः ।
नृपं च प्रीणयामास गिरा भक्त्या स्वकर्मणा ॥
एकदाह्नि स काशीशस्तदङ्के न्यस्तमस्तकः ।
स्वपिति स्म सुविश्वस्तं कक्षे रक्षिविवर्जिते ॥
सहसा तस्य पुत्रस्य कोशलेशस्य मानसे ।
विद्युद्भातिरिवाखेलद्दृश्यं पितृवियोगजम् ॥
पितृशत्रुरयं शेते मदङ्के मे वशं गतः ।
पितृणं शोधयाम्यद्य हत्वैनं हतचेतनम् ॥
खड्गं निष्कास्य कोषात्तं यावद्धन्तुं समुद्यतः ।
हृदि समुदितं तस्य वचनं सहसा पितुः ॥

'मा भूः शीघ्री विलम्बी वा'—तस्यार्थोऽपि स्फुटोऽभवत् ।
'सहसा मा कृथाः कार्यं चिरं द्वेषं च मा पुषः' ॥

कोषे न्यस्तमसिं कृत्वा तूष्णीमास्त नृपात्मजः ।
काशीराजः क्षणे तस्मिन् निद्रां त्यक्त्वा समुत्थितः ॥
सुप्तोत्थितं तमालोक्य काशीशं नृपसूनुना ।
निष्कोषं तमसिं कृत्वा पुनरुन्नमितः करः ॥
तदवस्थं जिघांसुं तं मत्वा काशीनरेश्वरः ।
प्राणभिक्षां ययाचेऽसौ कातरं तं कृताञ्जलिः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञस्तस्य पदे खड्गं निधाय स नृपाङ्गजः ।
स्मितेनोद्भासयन् वक्त्रं वचनं व्याजहार तम् ॥
"मत्तो राजन्न भेतव्यं त्वं हि पितापरो मम ।
जहि मां प्राङ् महापापं क्षमस्व वा क्षमापते ॥
दृष्ट्वा सुप्तं निजाङ्के त्वां पितृशत्रुं पुरातनम् ।
जिघांसा मेऽभवच्चित्ते तेन हन्तुं समुद्यतः ॥
सहसा नामशेषस्य स्मृतं पितुर्वचो मया ।
'मा भूः शीघ्री विलम्बी वा मतिश्छन्ना यदा भवेत्' ॥
नाबुध्यत तदा योऽर्थः स स्फुटो मे क्षणादभूत् ।
'सहसा मा कृथाः कार्यं चिरं द्वेषं च मा पुषः' ॥
ज्ञातमात्रे करादर्थे शिथिलादसिरस्खलत् ।
सद्यो जातः स विद्वेषो हृदयाच्च लयं गतः ॥
एवं स्थिते प्रमाणं त्वं यथावृत्तं न्यवेदयम् ।
क्षन्तव्योऽस्मि त्वया राजन् भूषणं हि क्षमा तव ॥"

राजोवाच

सपदि त्वां क्षमे वत्स यथाक्षमत मां भवान् ।
क्षमा शस्त्रं करे यस्य तस्य क्षमा पदानता ॥

राजपुत्र उवाच

अहनिष्यं भवन्तं चेदहनिष्ये जनैस्तव ।
मामकैश्च पुनस्तोऽपि—द्वेषाद् द्वेषोऽजनिष्यत ॥
स्मरामि मे पितुर्वाचमन्तिमां तां शुभङ्करीम् ।
'द्वेषं हन्ति न विद्वेषो द्वेषोऽद्वेषेण शाम्यति' ॥
त्वत्तो मयासवः प्राप्ता मत्तः पूर्वं यथा त्वया ।
परस्पर-क्षमाधर्माद् द्वेषो निर्वाणतां गतः ॥
फलितः पितृनिर्बन्धो मया प्रेम्णा जितो भवान् ।
इदानीमावयोः संख्यमूर्ध्वादूर्ध्वं विवर्धताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्णमृगः

[स्वर्गत-रवीन्द्रनाथठाकुरस्य]

तथापि न प्राभवदसौ स्वे चक्षुषी श्रद्धातुम्, उभाभ्यां पाणिभ्यां कलसमुत्तोल्य सुभृशमान्दोलितवान्। अभ्यन्तरे किमपि नासीत्। कलसं पर्यावर्तितवान्। किमपि नापतत्। अपश्यच्च कलसस्य ग्रीवा भग्नेति। एकदा कलसस्यास्य मुखं सर्वथा बद्धमेवासीत्, अनन्तरं च केनापि भग्नमिति प्रतीयते स्म।

ततश्च वैद्यनाथो मत्त इव पाणिभ्यां सलिलाभ्यन्तरं परामष्टुं प्रवृत्तः। कर्दमस्तरेषु किमपि हस्ते स्पृष्टम्, उत्तोल्यापश्यत् मृतस्य मस्तकमिति। तदपि सकृत् स कर्णयोः समीपं नीत्वान्दोलितवान्, अभ्यन्तरे किमपि नासीत्। स तद् दूरं न्यक्षिपत्। वहुधान्विष्य नरकङ्कालगतान्यस्थीन्यन्तरेणापरं किमपि न लेभे।

स चापश्यत् नद्यभिमुखीनाया भित्तेः स्थानविशेषो भग्नः, तेनैव द्वारेण जलं प्रविशतीति। तस्य च पूर्ववर्तिनो यस्य तपस्विनो जन्म-कुण्डल्यां दैवधनलाभो लिखित आसीत् सोऽप्यनेनैव च्छिद्रण प्राविशदिति सम्भाव्यते स्म।

अन्ततश्च सर्वथा नैराश्याक्रान्तहृदयो "हन्त मातः" इति मर्मभेदिनं निःश्वासं मुमोच। प्रतिध्वनिः समतीतकालस्येतरेषामपि बहूनां हताश्वासानां जनानां निःश्वासान् समाहृत्य भीषणगम्भीरारावेण रसातलतलात् स्तनित इवाभवत्।

कर्दमविलिप्ताखिलावयवो वैद्यनाथ उपर्यागच्छत्।

जनपूर्णा कोलाहलमयी मेदिनी तस्मा आपादचूडं मिथ्या शृङ्खलिता भग्नघटीव च शून्या प्रत्यभात्।

यत् पुनरपि द्रव्यादिकं बन्धनीयम्, शुल्कपत्रं क्रयणीयम्, शकटमा-रोहणीयम् गृहं प्रत्यावर्तनीयम्, पत्न्या सह वाग्वितण्डादिकं करणीयम्, जीवनं च प्रतिदिनं वहनीयम्, तत् तस्यासह्यमेव प्रत्यभात्। मनसि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च तस्य समुदितेच्छा सरित इव जीर्णस्तटः विभज्य झुपिति सलिले निपतेयमिति ।

परं तथापि तथैव द्रव्यादिकमबध्नात्, शुल्कपत्रमक्रीणात्, शकटमप्यारोहत्। एकदा च शीतर्त्तौ सायाह्ने गृहद्वारं सम्प्राप्तः, पूर्वमाश्विने मासि शारदप्रभाते द्वारोपान्ते निषण्णो वैद्यनाथो बहून् प्रवासिनो गृहं प्रत्यावर्तमानानपश्यत् सदीर्घश्वासं च विदेशतः स्वदेशप्रत्यावर्तनसुखाय स्पृहयमाणोऽभवत्, तदानीं चाद्यतनी सन्ध्या स्वप्नस्याप्यगम्यासीत् ।

प्रविश्यैव भवनाभ्यन्तरं प्राङ्गणस्थे काष्ठासने निर्बोध इव निषण्णोऽतिष्ठत्, न खलु प्राविशदसौ शुद्धान्तःपुरम् । सर्वप्रथमतः परिचारिका तं दृष्ट्वानन्दकोलाहलं प्रार्वतयत्, पुत्रावपि द्रुतं समापतताम्, गृहिणी च परमुखेण तमाह्वयत् ।

भग्नमिव वैद्यनाथस्य तिमिरावरणम् । पुनरप्यसौ प्रबुद्ध इव पूर्वेषु गार्हस्थव्यापारेषु ।

विशुष्कवदने म्लानहास्यमास्थाय पुत्रमेकमङ्केकृत्य द्वितीयं च हस्ते धृत्वा प्राविशदसावन्तःपुरम् ।

तदानीं च प्रज्वलितो भवनप्रदीपः, यद्यपि रात्रिर्न समागता तथापि शीततोः सन्ध्या रात्रिरिव क्रमेण निस्तब्धा सञ्जाता ।

वैद्यनाथः कियन्तञ्चित् कालं किमपि नावदत्, ततश्च मृदुस्वरेण पत्नीमपृच्छत्, कच्चित् कुशलिन्यसि इति ।

पत्नी तु प्रश्नस्योत्तरमप्रतिपद्यैवापृच्छत्, किं वृत्तम् ? इति ।

वैद्यनाथस्तूष्णीं ललाटमाघ्नत । मोक्षदाया मुखं भारवत् कठिनञ्च सञ्जातम् ।

पुत्रौ च महतोऽमङ्गलस्य छायां सन्दृश्य शनैः शनैरुत्थाय चलितौ, गत्वा च दासीसमीपं नापितस्य तदाख्यानं ब्रूहि इत्युक्त्वा शय्यामधिशिश्याते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजनी वर्धते स्म, परं द्वयोर्मुखे एकमपि वचनं नासीत्। गृहाभ्यन्तरे किमपि छम्छमायते स्म, मोक्षदायाश्चौष्ठौ क्रमेण वज्रलेपेनेव सुदृढं संसक्तौ जातौ।

व्यतीते च बहुतिथे काले मोक्षदा किमप्यनुक्त्वैव शनैः शनैः शयनमन्दिरं प्रविश्याभ्यन्तरतो निरुद्धवती भवनकवाटम्।

वैद्यनाथस्तूष्णीं बहिर्दण्डायमानोऽवतस्थे। यामिकः प्रहरमुद्घुष्य प्रतस्थे। श्रान्ता पृथिवी सुषुप्तिमग्ना स्थिता। आ स्वजनेभ्यो निःसीमगगनगतनक्षत्राणि यावत् कोऽप्यवमानितं भग्ननिद्रं वैद्यनाथं वाक्येनैकेनापि न सम्भावितवान्।

गभीरनिशीथे मन्ये स्वप्न्यात् समुत्थाय वैद्यनाथस्य ज्येष्ठतनयः शय्यां विहाय शनैः शनैरलिन्दमुपगम्याह्वयत्, तात इति।

तदानीं तस्य तातस्तत्र नासीत्। किञ्चिदुच्चैस्तरकण्ठेन रुद्ध-द्वाराद् बहिरवस्थाय पुनरप्याह्वयत्—तात इति। परं किमप्युत्तरं नोपनतम्।

स च भीतभीत इव पुनरपि शय्यां गत्वाशयिष्ट।

पूर्वां रीतिमनुसृत्य परिचारिका प्रातः तमाखुं सज्जीकृत्य तमन्विष्टवती, क्वापि च नापश्यत्। वेलायां च वर्धमानायां प्रातिवेशिका गृहप्रत्यागतस्य बान्धवस्य वार्त्तोपलम्भाय समागताः, परं वैद्यनाथेन साकं तेषां साक्षात्कारो नाभवत्।

नामरहस्यम् (१०)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

व्याकरणग्रन्थेषु शाकटायनस्य नामोपलभ्यते। पाणिनेः पूर्ववर्तिषु वैयाकरणेषु तस्य प्राथम्यं निर्विवादम्। तेनैव प्रथमत उपदिष्टम्—सर्वाणि नामानि धातुजानीति। शाकटायनशब्दस्य को वार्थ इतीदानीं विचार्यते। तत्र शकटशब्दो नडादिगणे पठ्यते वैयाकरणैः। नडादिभ्यश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोत्रापत्ये फक्-प्रत्ययो भवति । अत एव शकटस्य गोत्रापत्यं पुमान् शाकटायनः । शकटस्यापत्यं पौत्रादि शाकटायन उच्यते । शकटस्य पुत्रः पुनः शाकटिरिति व्यपदिश्यते । शाकटायनस्य पूर्वजः कश्चन शकट इव भारक्षम आसीत् । अत एव प्रीतैर्लोकैस्तस्मिन् शकटत्व-मारोपितम् इति प्रतीयते । ततश्च स शकटनाम्नैव कदाचित् परिचितोऽभवत् । तस्य पौत्रादिः शाकटायनः । स च "शकटस्य तोकम्" इत्याख्यायते । शकटाङ्गजः इत्यपि समाख्यानं तस्य वैयाकरण-निकाये प्रसिद्धम् । महाभाष्ये स्मर्यते—अथवा भवति वै कश्चिज्जाग्रदपि वर्तमानकालं नोपलभते । तद् यथा । वैयाकरणानां शाकटायनो रथमार्गं आसीनः शकटसार्थं यान्तं नोपलेभे । इति । अत एव शकटसार्थानुपलम्भाच् शत्रुभिः स शकटस्य वंशधर इति शाकटायननाम्ना व्यपदिष्ट इति केचनाशेरते ।

सत्यमुपाख्यानतोऽद्भुततरम्

कस्य वा न विदितं मञ्जूषावाचकस्य हितोपदेशगतं जरद्गवोपा-ख्यानम् ? तत्र दीर्घकर्णो नाम मार्जारो ब्रूते, अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतमाचरंस्तिष्ठामीति । अत्र मार्जारस्योक्तिः सर्वथा मिथ्यैव । स्वार्थसाधनमुद्दिश्य धूर्तेन मार्जारेण स्वात्मनो निरामिषाशित्वं महता कण्ठेन समुद्घोषितम् । साम्प्रतं पुनर्वृत्तान्तपत्रेषु निरामिषाशिनो मार्जारस्य प्रवृत्तिः प्रकटिता । न केवलमयं मत्स्यमांसादिकं न भुङ्क्ते, यस्मिन् पात्रे मांससूपादिकं संरक्ष्यते तस्मिन् पात्रे प्रदत्तमन्नमपि प्रत्याचष्टे । पूर्वजन्मार्जित-संस्कारो निसर्गतोऽपि गरीयान् । अवितथं खलूक्तं कविप्रवीरेण वायरणेन—

'Tis strange but true ; for truth is always strange,—
Stranger than fiction.

एतद् विचित्रं परं सत्यम् । सत्यं हि सदैव विचित्रम् , प्रबन्ध-कल्पनातोऽपि विचित्रतरम् । इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुलीभूताः प्रमादाः (४)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

दशकुमारचरितस्य तृतीयोच्छ्वासे दृश्यते—तौ चेद्राजपुत्रौ निरुपद्रवावेवावर्द्धिष्येताम इयता कालेन तवेमां वयोऽवस्थामस्प्रक्ष्येताम् इति। Apte's Guide to Sanskrit Composition इत्यत्राप्ययमेव पाठः। अत्र अवर्द्धिष्येतामित्यत्रैकारोऽस्तीति अस्प्रक्ष्येतामित्यत्राप्येकारः समागतः। शुद्धस्तु पाठः—अस्प्रक्ष्यतामिति, स्पृशतेः परस्मैपदित्वात्।

जिज्ञासा मीमांसा च

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

विद्वद्वर्येण केनचन पृष्टम्—व्याकरणादिप्रबन्धेषु सन्दृश्यमानानां प्रसज्यते-प्रसज्येतादि-पदानां कथं साधुत्वम्? न हि दिवादिषु सजतिरुपलभ्यते इति। अत्रोत्तरम्। प्रपूर्वः सजतिः प्रथमतः सकर्मक एवासीत्। तथाच शतपथब्राह्मणे [१।७।३।२१] श्रूयते—रुद्रियेण पशून् प्रसजेत् इति। संयोजयेत् इति व्याख्यातारः। छान्दोग्योपनिषद्यप्याम्नातम्—ज्योतिराततम्। तन्मा प्रसाङ्क्षीरिति। स्प्राक्षीरिति व्याख्यातारः।

प्रसज्यप्रतिषेध इति सुप्रसिद्धपदेऽपि प्रसजतिः सकर्मकः। तथाच महाभाष्यम् [१।१।४५।७-८]—प्रसज्य किञ्चिन्नवेत्युच्यते।....न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति। अत एव आडाम्भावः प्रसज्यते इति श्लोकवार्त्तिके [१।२।१९।१] दृश्यमानं प्रसज्यते इति पदं (यत् खलु प्राप्नोतीति महाभाष्यकारेण व्याख्यातम्) व्यक्तमेव कर्मकर्तरि निष्पन्नम्। एवम् इको यणचि इति यणादेशः प्रसज्येत, इतरेतराश्रयः प्रसज्येत इत्यादिषु बोद्धव्यम्।

कार्मुकम् (४)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

प्रतिपादितमेवास्माभिः पूर्वं धनुर्वाचकः कार्मुकशब्दः क्रमुकशब्दादणि निष्पन्न इति। इदानीं क्रमकविषयो शतपथब्राह्मणगताख्यायिकोद्धृयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सा कार्मुकी स्यात्। देवाश्चासुराश्चोभये प्राजापत्या अस्पर्धन्त। ते देवा अग्निमनीकं कृत्वासुरानभ्यायन्। तस्यार्चिषः प्रगृहीतस्यासुरा अग्रं प्रावृश्चन्। तदस्यां प्रत्यतिष्ठत्। स कृमुकोऽभवत्। तस्मात् स स्वादुः। रसो हि। तस्मादु लोहितः। अर्चिर्हि। स एषोऽग्निरेव यत् कृमुकः। अग्निमेवास्मिन्नेतत् सम्भूतिं दधाति।" [६।६।२।११] इति।

व्याख्यातञ्चैतत् सायणाचार्येण—आधातव्यायाः समिधो वृक्षविशेषसम्बन्धमाह—सा कार्मुकी स्यादिति। धनुरुपादानभूतो वृक्षविशेषः कृमुकः। तद्विकारत्वं समर्थयितुमाख्यायिकामाह—देवाश्चासुराश्चेत्यादिना। स्पर्धमानानां मध्ये ते देवा अग्निम् अनीकं मुखं कृत्वा असुरान् अभिगताः। तस्मिन् समये असुराः प्रत्यावृत्य अग्नेरर्चिः प्रगृह्य यावन्मात्रं गृहीतमासीत् तावन्मात्रमर्च्चिषोऽग्रं प्रावृश्चन् छिन्नवन्तः। छिन्नं तदग्रमस्यां पृथिव्यां प्रतिष्ठितमभूत्। स च तत्र कृमुकाख्यो वृक्षः सम्पन्नः। कृमुको नाम धनुष उपादानभूतः सारवान् वृक्षविशेषः। उक्तमर्थं प्रत्यक्षबलेन द्रढयति—तस्मात् स स्वादुरिति। तस्मादित्युक्तम्, कस्मादित्याह—रसो हीति। यस्मादग्नेः सारांशः, तस्मादित्यर्थः। तस्मिन्नेवार्थे प्रत्यक्षान्तरं दर्शयति—तस्मादु लोहितोऽर्च्चिर्हीति। अर्चिषो लोहितवर्णत्वात् तदात्मको वृक्षोऽपि लोहितः। यत एवं कृमुकः यः अस्ति स एषः अग्निरेव, वक्षरूपेण परिणामात्। एतत् एतेन कृमुकसमिदाधानेन अग्निमेव सम्भूतिं दधाति स्थापितवान् भवति। इति

चरकसंहितायां दृश्यते—बहुशो गुलिकाः कार्याः कार्मुकाः स्युस्ततोऽधिकम् [चिकि० ५।८४] इति। अत्रत्यः कार्मुकशब्दो व्यक्तमेव कर्मन्-शब्दात् उकञा निष्पन्नः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छात्रहितैषिणी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः। वत्स ज्ञानानन्द, संपाठः पठ्यताम्।

ज्ञानानन्दः। (पठति)

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥

अध्यापकः। सामान्यप्रतिपत्तिपूर्वकम् इत्यत्र कः समासः?

ज्ञानानन्दः। आर्य, सामान्या प्रतिपत्तिरिति कर्मधारयः, ततः सामान्यप्रतिपत्तिः पूर्वा यस्मिन् तद् यथा स्यात् तथा इति बहुव्रीहिः। शेषाद्विभाषा इति सूत्रण पाक्षिकः समासान्तः कप्।

भूमानन्दः। आर्य, एतत्तु न समीचीनम्। कप् चेत् समासान्तस्तर्हि केऽणः [७।४।१४] इति ह्रस्वो न स्यात्, न कपि [७।४।१४] इति प्रतिषेधात्। अत एव केनचनाधुनिकेन व्याख्यात्रा विलिखितम् "सामान्या प्रतिपत्तिः पूर्वा यस्मिन् कर्मणि तत् सामान्यप्रतिपत्तिपूर्वम् (बहुव्री)। स्वार्थे कन्। This roundabout process is necessary, as otherwise with समासान्त 'कप्' [by "शेषाद् विभाषा" 5. 4. 154] the form will be "सामान्यप्रतिपत्तिपूर्वाकम्"। Read कपि परे अणो ह्रस्वो न स्यात्। कल्याणपञ्चमीकः पक्षः। भट्टोजिदीक्षितः।" इति।

शुद्धानन्दः। आर्य, आधुनिकेन व्याख्यात्रा तदनुसारिणा च भूमानन्देन आपोऽन्यतरस्यामिति सूत्रं सर्वथा विस्मृतमेव।

ज्ञानानन्दः। अहो व्यामोहः! अत्र ह्रस्वार्थं केऽणः इति सूत्रस्यापेक्षैव नास्ति, येन न कपि इति तस्य प्रतिषेधः स्यात्, आपोऽन्यतरस्यामिति वा विकल्पः स्यात्। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः इति भाष्यकारेष्टात्र पुंवद्भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमानन्दः। भवत एव व्यामोहः। यस्य शिरो नास्ति कथं तस्य शिरोव्यथा स्यात् ? अत्र सर्वनामत्वमेव नास्ति, कथं सर्वनाम्न इति पुंवद्भावः स्यात् ? स्मर्यतां तावत् सूत्रं न बहुव्रीहाविति, वार्त्तिकं च—संज्ञोपसर्जनीभूतास्तु न सर्वादय इति।

महानन्दः। यद्यप्यत्र सर्वनामत्वं नास्ति तथापि भूतपूर्वसर्वनामत्वमादाय भाष्यकारेष्टिः प्रवर्तते। तथाहि "दिङ्नामान्यन्तराले" [२।२।२६] इत्यत्र भाष्यम्—ननु चोक्तं दक्षिणपूर्वा दिक्। समानाधिकरणलक्षणः पुंवद्भावो न प्राप्नोतीति। नैषः दोषः, सर्वनाम्नो वृत्तिमात्र पुंवद्भावेन परिहृत इति। व्याख्यातञ्च वासुदेवदीक्षितेन बालमनोरमायाम्—यद्यप्युपसर्जनत्वान्न सर्वनामत्वम्। तथापि भूतपूर्वगत्या सर्वनामत्वमादाय पुंवत्त्वं भवति, अत एव भाष्यात् इति।

अध्यापकः। वत्साः, सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया' इत्यस्य श्रवणमात्रेणैव प्रतीति र्भवति बहुव्रीहिरेवात्र समासः, स्वार्थिकस्य कन्प्रत्ययस्य गन्धोऽप्यत्र नास्तीति। अत एव व्याकरणसूत्रानुरोधेन कन्प्रत्ययस्वीकरणगौरवं परिहर्तव्यम्। नासिका प्रदर्श्यतामित्युक्ते नासिकैव ऋजुमार्गेण प्रदर्शनीया, न खलु शिरोवेष्टनपूर्वकं नासिकाप्रदर्शनं कमपि गुणमावहति। (क्रमशः)

मञ्जूषायाः प्रशस्तिः

[स्वामी लक्ष्मणशास्त्री]

(१)

स्व ज न्मतो या विगताष्टवर्षैः
प्र य त्नपूर्वं सततं चरन्ती।
भू ति प्रवृद्धयै सुरलोकवाण्याः
सु म न्त्रितार्था लघुमूल्यलभ्या ॥१॥
म ञ्जू पदेशैः कलिकालजातान्
दो षा नशेषान् पठतां हरन्ती।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सु **सं** स्कृतिप्राप्तिकरैकलक्ष्या
सं **स्कृ** त्रिमा कृत्रिमभावशून्या ॥२॥
स्व **त** न्त्रशास्त्रार्थविवेचनाढ्या
सु **प** द्यगद्यात्मकसूक्तिरम्या ।
सा **त्रि** स्वपद्यस्थशुभाभिधाना
प्र **का** शते मासिकपत्रिका वै ॥३॥

(२)

नानागुणालङ्कृतेषु,
भवतः स्वार्थशून्यस्य ज्ञानदानव्रतस्य च ।
सविधे गुणमुग्धस्य प्रणयेन निवेदनम् ॥
श्रीमतो रामकृष्णस्य प्रमुखाद्भवतः कथाम् ।
ज्ञात्वा प्रायेण हृष्टोऽस्मि भाग्यवानसि सुव्रत ॥
प्रातरद्य समासाद्य मञ्जूषां नाम पत्रिकाम् ।
भवता प्रेषितां हृद्यां पश्याम्यवहितात्मना ॥
प्राच्यविद्याप्रसारार्थं मञ्जूषां तां प्रकाशयन् ।
निजार्थव्ययतो विद्वन् वदान्योऽसि विदां वरः ॥
अज्ञानतमसां हन्तुः सूर्यस्येव जगद्गुरोः ।
चिरायुष्ट्वं तथारोग्यमर्थैस्ते सह जायताम् ॥
भवदीय-श्रीयोगेन्द्रमोहनदेवशर्मणः ॥

पुस्तकपरिचयः

Historical Grammar of Inscriptional Prakrits by Madhukar Arvant Mehendale, M. A., Ph. D. Deccan College Post-Graduate and Research Institute, Yeravada. Poona 6. Price : Rupees Twenty-one only.

यद्यपि बहूनि प्राकृतव्याकरणानि विरचितानि भारतीयैश्च वैदेशिकैश्च विपश्चिद्भिस्तथापि प्राकृतशिलालेखादीनां भाषामधिकृत्येदमेव प्रथमं पुस्तकमिति विशेषतोऽभिनन्दनीयमस्माकम् । अत्र च परमरमणीयाः Introduction, Comparative Study of Asoka inscriptions,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Historical Linguistics of the Western Group, Historical Linguistics of the Southern Group, Historical Linguistics of the Central Group, Historical Linguistics of the Eastern Group, Synoptic Tables, Morphology, Conclusion, Kharoṣṭhī Inscriptions इत्येतेऽध्याया वर्तन्ते। अत्र च प्राच्यादिप्राकृतविशेषाणां स्वरान् व्यञ्जनानि शब्दरूपाणि धातुरूपाणि च विशेषतो विवेचितानि। अन्ते च विचारसारोऽपि सन्निविष्टः। अतिमात्रमुपकारकमिदं पुस्तकं प्राकृतानुरागिणां विशेषतश्च छात्राणां चाध्यापकानां च, अवश्यमेव च रक्षणीयमिदं महाविद्यालयानां पुस्तकागारेषु।

अनेकार्थतिलकः। महीपविरचितः। श्रीमधुकरमङ्गेशपातकरेण संस्कृतः। Deccan College Post Graduate and Research Institute. Poona 6 इत्यतः प्रकाशितः। मूल्यं रूप्यकषट्कम्।

नानार्थतिलकापरनामानेकार्थतिलकोऽयं मेदिन्यादिवदनेकार्थकानां शब्दानामर्थप्रतिपादको ग्रन्थः। ग्रन्थकारोऽयं खृस्तीये चतुर्दशशतके प्रादुर्भूत इति Stein-महोदयस्याभितम्। ग्रन्थान्ते महीपेनोक्तम्—

पाणिन्यहीन्द्रगुरुभागुरिभोजभेड-
हेमामरादिसमुदीरितशास्त्रसारात्।
नानार्थरत्नतिलकं स च सिद्धशब्द-
रत्नाकरः समतनोत् सुमतिर्महीपः॥

इति। अत्राहीन्द्रशब्देन पतञ्जलिरभिप्रेत इति प्रतिभाति। अनेन पद्येन हेमचन्द्रतो ग्रन्थकारस्यार्वाचीनत्वं प्रतीयते। शतपथब्राह्मणभाष्ये (७।२।२।९) सायणाचार्येण "कीनाशश्च कदर्ये स्याद्राक्षसे कर्षुके यमे" इति पङ्क्तिर्महीपनाम्नैवोद्धृतम्। अत एव सायणाचार्यात् पूर्ववर्ती महीप इति सिध्यति।

पुस्तकमिदं मङ्गेशपातकरमहोदयेन यत्नेन परिश्रमेण च सम्पादितम्। प्रथमपृष्ठे "चतुष्काण्डा"पदं चतुःकाण्डारूपेण मुद्रितम्, षष्ठे पृष्ठे "अकाराद्यादिभिः शब्दैरस्मिन् वर्णद्वयाभिधः" इति ससन्धिः पाठोऽपेक्ष्यते।

एकादशपृष्ठे दृश्यते—काव्यं ग्रन्थे च काव्योभे(?) ज्ञे काव्या पूतनाधियोः इति। अत्र काव्यो भे इति पठनीयमिति प्रतिभाति। पुंलिङ्गःकाव्यशब्दस्य शुक्रग्रहः (भ=नक्षत्रम्, ग्रहः, ग्रहविशेषः=शुक्रः) इत्यर्थः।

अत्र पातकरमहोदयेन ग्रन्थान्ते व्याख्येयशब्दाः स्थूलाक्षरैर्मुद्रिता व्याख्यानवन्दाश्च सूक्ष्माक्षरैरिति शब्दसूचिरतिमात्रमुपकारिणी संवृत्ता। प्रतिपत्रं पादद्वेशे हेमचन्द्रादिकोशतः समुद्धृतानि वाक्यान्यपि वाचकानामुपकरिष्यन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A History of the Saṅskṛta Literature by V. Varadachari, M. A. Ram Narayan Lall, Bookseller and Publisher, Allahabad. Royal 8 vo. 300 pages. Price *Rupees five* only.

परमरमणीयेऽस्मिन् प्रबन्धे विद्वद्वर्येण वरदाचार्यमहोदयेन संस्कृतसाहित्यस्येतिहासः समुपनिबद्धः। अत्र लौकिकग्रन्थानां वैदिकग्रन्थानां च विवरणं सरलया सुबोधया चाङ्गलभाषया प्रदत्तेति परमोपादेयोऽयं ग्रन्थः परीक्षार्थिनाम्। Introductory, The Vedas, The Vedas as understood by the critics of the West, A criticism of their views, Saṁhitā, Brāhmaṇa, Āraṇyaka, Upaniṣads, Vedāṅgas, Rāmāyaṇa, Mahābhārata, Purāṇa, The Kāvya period—pre-Kālidāsa, Kālidāsa, post-Kālidāsa, the lyrics, the gnomic and didactic poetry, anthology, prose, campū, popular tales, didactic tales, drama—its origin, characteristics and types, pre-Kalidasian and Kalidasian periods, post-Kalidasian dramatists, history, theories of poetry and drama, scientific literature—characteristic features, grammar, prosody and lexicography, jyautiṣa, dharmas'āstra, the Upavedas—Ayurveda, Gāndharvaveda, Dhanurveda and Arthas'āstra, Indian philosophy and religion, general principles and systems of thought, the Nāstika systems, the Āstika systems—Nyāya, Vais'eṣika, Sāṁkhya and Yoga, Mīmaṅsā, conclusion इत्याख्याः षट्त्रिंशदध्याया विलसन्ति। यद्यपि सर्वत्र ग्रन्थकृता साकमस्माकमैकमत्यं नास्ति तथापि पुस्तकेनानेन च्छात्राणां महानेवोपकारः स्यादित्यत्र लेशतोऽपि संशयो नास्ति।

Astrological Magazine edited by Dr. B. V. Raman. January, 1954. Sheshadripuram. Bangalore 3. Price : Rs. 3/12/-

कस्य वा न विदितं भारतवर्षीयस्य विद्ववृन्दवन्दनीयं विश्वजनीनमिदं पत्रम्? अस्याञ्च नव्यवर्षस्य प्राथमिकसंख्यायां न केवलमेकैकराशिमधिकृत्य वर्षफलमुवर्णितम्, समग्रस्य च भूमण्डलस्य समासेन वर्षफलं विवृतम् द्वादशराशीनां च मासफलादीनि समीचीनतया प्रसञ्चितानि अपि तु Scientific concepts and the problematic Astrology, Recent parapsychological speculation on human mind, To heaven or hell through astrology, New developments in Astronomy, Physics, probability and prediction, Ayanāṁs'a and World Events, Rectification of the Ascendant, Estimate of the Chandra Nāḍī, Mālefic role of Mars in marriage, Are other Planets populated? Mapping matrimonial misadventures,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

practical application of phrenology, Some astrological laws of Yavanāchārya, unseen causes of disease, Jaimini's method of judging wealth इत्यादयो बहवः प्रबन्धा अत्र सन्निवेशिताः। Your Scientific Difficulties Solved समाख्ये प्रकरणे वाचकानां फलित-ज्योतिषगतानां प्रश्नानां समीचीनान्युत्तराणि प्रदत्तानि। अवश्यं पत्रिकाया अस्या ग्राहकत्वमङ्गीकर्त्तव्यम् ज्योतिषशास्त्रवेदिभिर्ज्योतिषं च जिज्ञासुभिः। परमरमणीयस्यास्य पत्रस्य च वार्षिकं मूल्यं द्वादशरूप्यकमात्रम्।

वेतालपञ्चविंशतिः। जम्भलदत्तकृता। Edited by N. A. Gore, M.A., Ph. D. 43+73+22. Price Rs. 0-8-. Published by the author from 12 Vishnusadana, 329 Sadashiv Peth, Poona 2.

सुप्रथितो गद्यभाषामयो वेतालपञ्चविंशतिग्रन्थो गोरेमहोदयेन सुसंशोध्य प्रकाशितः। अत्र च ४३-पृष्ठमिते उपोद्घाते ग्रन्थस्येतिवृत्तं कथासारादिकं चाङ्ग्लभाषया सन्निविष्टम्। ततः ७३-पृष्ठामयं मूलम्, ततश्च टिप्पणं विषमशब्दानामकारादिक्रमेणाङ्ग्लव्याख्यानं च। मूले च ग्रन्थकृतो जम्भलदत्तस्य संस्कृतभाषायामपाटवं पदे पदे स्फुटीभवति। यद्यपि गोरेमहोदयेन विद्वद्वर्येण महता यत्नेन संस्कृतमिदं पुस्तकं तथापि संस्कृतभाषामधीयानानां बालानामनेन लेशतोऽप्युपकारो न स्यात्। वैचित्र्यविशेषसद्भावात् प्रामादिकपदानां च बाहुल्याद् व्युत्पन्नानामध्यापकानां परमां प्रीतिं जनयेदेव पुस्तकमिदम्।

नवमपृष्ठे दृश्यते—वज्रमुकुटस्तत्र गत्वा....धुस्तूरादिकरचितं मोदकं तां भक्षयितवान्, सापि तं खादित्वा निर्भयं निद्रां गतवती इति। अत्र प्रथमतस्तावद् भक्षयितवान् इति पदं दृष्टिमाकर्षति। चौरादिकस्य भक्षयतेर्निष्ठायां भक्षितवान् इति रूपं स्यात, णिजन्तस्यापि तस्य तदेव रूपं स्यात्, न पुनर्भक्षयितवान् इति। एवमेव २८-पृष्ठे जीवयितौ इति। जीवितौ, भक्षितवान् इति पदे साधुनी। जम्भलदत्तेन विस्पष्टतया णिचं प्रदर्शयितुकामेन भक्षयित-वानित्यादिकं प्रयुक्तम्। काममेवंविधेन प्रयोगेण बोधसौकर्यं स्यात्, तथापि वैयाकरणानामननुमतमेतत्। किञ्च "भक्षेरहिंसार्थस्य" इति वार्त्तिकेन (१।४।५२।७) अत्र प्रयोज्ये कर्मणि तृतीयया भाव्यम्। अत एव "तां भक्षयितवान्" इत्यत्र "तया भक्षितवान्" इति स्यात्। किञ्च, सापि तत् खादित्वा निर्भयं निद्रां गतवती इत्यत्र निर्भरं निद्रां गतवतीति ग्रन्थकृतोऽभीष्टमिति प्रतीयते। एवंविधाः प्रमादा अत्र बहवो वर्तन्ते, अत एव पुस्तकमिदं पार्श्वे रक्ष्यते चेत् परीक्षकाणामशुद्धवाक्यान्वेषणे लेशतोऽपि प्रयासो न स्यात्। अवश्यं संरक्ष्यमिदं पुस्तकं पुस्तकागारेष्वित्यभिप्रैमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. SUNITI KUMAR CHATTERJEE, M.A., D.Litt. (London)
Chairman, Bengal Legislative Council, writes :—

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enlist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as-dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistics he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bonmots*, wise sayings, *Mahavakyas*, etc, from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patanjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt

Professor, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra.

VISVANATH CHATTERJI

81 Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0 In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

नवम-वर्षे] September, 1954 [प्रथमा संख्या

भाञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Works of Dr. K. C. Chatterjee

Chandra Vyakarana—The First Great Revised Edition of Panini, critically edited with Vrtti, rules of Panini and Bhoja, etc. etc. Part I Rs. 12/-

Patanjali's MAHABHASHYA (Paspasha) with English Translation, exhaustive critical and explanatory notes, commentaries etc. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Five.

Single copy : Eight annas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) मासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्ग्लमासस्य चतुर्विंशे दिवसे) 81, Shambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

स्त्रीप्रशंसा—वराहमिहिरस्य श्लोकाः

भट्टोत्पलटीकया विद्यावाचस्पतिविरचिताभिनवविस्तृतव्याख्यायां च विभूषिता। मूल्यं रूप्यकमात्रम्।

Convocation Address in Ancient India As. 12

Popular Etymology— Re. 1/-

शब्दकथा—सरस, सरल भाषातत्त्व २৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া**, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওত-প্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে। সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরল ও সরসভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ऋग्वेदीयम् आनोभद्रसूक्तम् पञ्चभाष्यसमन्वितम् ২॥০

উষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸০

नक्षत्रमाला—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/০

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ-चट्टोपाध्यायः।

Phone :—B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

September, 1954 | १८७६-शकीयाश्विनस्य ९म-वर्षस्य प्रथमा संख्या | Vol. IX No. 1

श्रीश्रीसरस्वती-स्तोत्रम्

[पण्डितप्रवरेण श्रीरामरूपविद्यावागीशेन व्याख्यातम्]

ह्रीँ ह्रीँ कृत्यैकबीजे शशिरुचिकमलाकल्पविस्पष्टशोभे
भव्ये भव्यानुकूले कुमतिवनदवे विश्ववन्द्याङ्घ्रि-पद्मे ।
पद्मे पद्मोपविष्टे प्रणतजनमनोमोद-सम्पादयित्रि
प्रोत्प्लुष्टाज्ञानकूटे हरिनिजदयिते देवि संसार-सारे ॥१॥

हे देवि सरस्वति, नमस्ते। किम्भूता सरस्वती इत्याह। ह्रीँ ह्रीँ कृत्यैकबीजे ह्रीँ ह्रीमिति गूढार्थकं मन्त्राक्षरं तत् एव कृत्या देवता मन्त्र-देवतयोरेकत्वं शास्त्रसिद्धम्, सा एव एकं बीजं यस्याः सा। अत्र हृद्यैकेति पाठान्तरं हृद्यं मनेरममेकं बीजं यस्याः सा। तत्सम्बोधने। पुनः किम्भूता? शशिरुचिकमलाकल्प-विस्पष्टशोभे शशिनः चन्द्रस्य रुचिः दीप्तिः इव रुचिः यस्य तत्। शुभ्रमित्यर्थः। तथाविधं कमलमेव आकल्पः भूषणं तेन विस्पष्टा व्यक्ता स्फुटा शोभा यस्याः सा, तत्सम्बोधने, श्वेतपद्माभरणे इत्यर्थः। पुनः किम्भूता? भव्या, शान्ता शुभकरी वा तत्सम्बोधने। भव्यानुकूले भव्यानां साधूनाम् अनुकूले हितकारिणि। कुमतिवनदवे कुमतिरेव वनं तस्य दवः अग्निः, कुबुद्धि-नाशकारिणि। विश्ववन्द्याङ्घ्रि पद्मे सर्वलोकपूज्यचरणकमले। पद्मे पद्मेति सरस्वत्या देव्या नामान्तरं, तत्सम्बोधने। पद्मोपविष्टे पद्मासीने। प्रणतजनमनोमोदसम्पादयित्रि भक्तानां चित्तानन्दविधायिनि। प्रोत्प्लुष्टाज्ञानकूटे प्रोत्प्लुष्टः सम्यक् दग्धः अज्ञानस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐँ ऐँ ऐँ इष्टमन्त्रे कमलभवमुखाम्भोजभूतिस्वरूपे
रूपारूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे ।
न स्थूले नापि सूक्ष्मेऽप्यविदितविषये नापि विज्ञाततत्त्वे
विश्वे विश्वान्तराले सुरवरनमिते निष्कले नित्यशुद्धे ॥२॥

ह्रीँ ह्रीँ ह्रीँ जापतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते
मातर्मातर्नमस्ते दह दह जड़तां देहि बुद्धिं प्रशान्ताम् ।
विद्ये वेदान्तगीते श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे
मार्गातीतप्रभावे भव मम वरदा सारदे शुभ्रहारे ॥३॥

अविद्यायाः कूटः राशिः यया सा, तत्सम्बोधने । हरिनिजदयिते हरेः विष्णोः निजदयिता प्रियतमा भार्य्या, तत्सम्बोधने । देवि द्योतनशीले । संसारसारे लोकानां श्रेष्ठाराध्ये ॥१॥

ऐँ ऐँ ऐँ इष्टमन्त्रे ऐमितिगूढ़ार्थकः सरस्वत्या इष्टमन्त्र स्तत्स्वरूपे, मन्त्रदेवतयोरेकत्वं शास्त्रसिद्धम् । कमलभवमुखाम्भोजभूतिस्वरूपे, कमलभवः पद्मयोनिर्ब्रह्मा, मुखम् अम्भोजमिव पद्ममिव (उपमितसमासः) ब्रह्मणो मुखपद्मस्य भूतिर्वाणीरूपो महिमा तत्स्वरूपे । रूपारूपप्रकाशे मायया रूपधारिणि गुणातीतावस्थायामरूपे रूपवर्जिते । सकलगुणमये सृष्टौ सत्त्वरजस्तमोगुणमयि । विसृष्टौ सृष्टिरूपा त्वम् इति चण्डी । सकलगुणमये इत्यार्षम् सकलगुणमयि इति शुद्धं मयट्प्रत्ययान्तस्य स्त्रियामीपो विधानात् । निर्गुणे प्राक् सृष्टेः तुरीयावस्थायां गुणवर्जिते । निर्विकारे परिणामविहीने निर्गुणत्वादिति बोद्धव्यम् । देवि न त्वं स्थूला, न त्वं सूक्ष्मा, न त्वम् अज्ञातविषया सर्वज्ञत्वात्, न त्वं विज्ञाततत्त्वा, तव स्वरूपनिर्णयासमर्थत्वात् । स्थूलत्वसूक्ष्मत्वादिधर्मा गुणमयेषु पदार्थेषु सम्भवन्ति गुणातीतायां त्वयि एतेषां सत्ताभावात् । विश्वे निखिलस्वरूपे । विश्वान्तराले विश्वाभ्यन्तरस्थे । अभ्यन्तरं त्वन्तरालमित्यमरः । सुरवरनमिते सुरवरैर्ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैर्वन्दिते । निष्कले पूर्णे । नित्यशुद्धे आद्यन्तरहिते काले दोषलेशसंस्पर्शशून्ये । ऋतञ्च सत्यञ्चेतिपरमब्रह्मस्वरूपे इत्यर्थः ॥२॥

ह्रीँ ह्रीँ ह्रीँ जापतुष्टे ह्रीँ ह्रीँ ह्रीमितिगूढ़ार्थकमन्त्रस्य पुनः-पुनरुच्चारणेन प्रीते । हिमरुचिमुकुटे हिमस्य तुषारस्य रुचिः कान्तिः तद्वत् मुकुटं किरीटं यस्याः सा तत्सम्बोधने तुषारशुभ्रकिरीटं बिभ्रति इत्यर्थः । वल्लकीव्यग्रहस्ते व्यग्रः वामः, वल्लकी वीणा व्यग्रहस्ते यस्याः सा, तत्सम्बोधने "रौक्मपद्मव्यग्रकरां वरदां दक्षिणेन तु" इति लक्ष्मीध्याने द्रष्टव्यम् । मातर्मातः आत्यन्तिकभक्तिजनिताभ्यन्तरप्रणोदनेन मातृशब्दस्य सम्बोधने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीर्धीर्धी धारणाख्ये धृति-मति-नुतिभिर्नामभिः कीर्तनीये
नित्येऽनित्ये निमित्ते मुनिगणनमिते नूतने वै पुराणे।
पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे
मात्रे मात्रार्धतत्त्वे मतिमति मतिदे माधवप्रीतिदाने ॥४॥

द्विरुक्तिरिति बोध्यम्। विद्ये ज्ञानस्वरूपे वेदान्तगीते वेदान्तेषु उपनिषत्सु कीर्तिते। श्रुतिपरिपठिते न केवलमुपनिषत्सु अपितु श्रुतिषु मन्त्रेष्वपि परिपठिते कीर्तिते। मोक्षदे मुक्तिदायिके। मुक्तिमार्गे, देवि सरस्वति त्वं न केवलं मुक्तिदात्री अपितु संसार-बन्धनान्मुक्तेः पन्था एव त्वम् अविद्याध्वंसेन ज्ञानविधायकत्वादिति हृदयम्। मार्गः पन्थाः। मार्गातीतप्रभावे मार्गम् अन्वेषणं त्वत्स्वरूपज्ञानचेष्टाम् अतीतः अतिक्रान्तः प्रभावः यस्याः सा, तत्सम्बोधने। नालं कोऽपि त्वत्प्रभावं ज्ञातुमित्यर्थः। वरदा अभीष्टदात्री। सारदे सरस्वति ॥३॥

धीर्धीर्धीः धी-शब्दस्य सम्बोधनैकवचने धीः। किंभूता धीः? धारणाख्या धारणा आख्या यस्याः सा। तत्सम्बोधने, धारणावती धीः मेधा तत्सम्बोधने, मेधास्वरूपे इत्यर्थः। महामेधा महास्मृतिः इति चण्डी। आन्तरभक्तिजनितावेगवशाद् धीरितिसम्बोधनपदं त्रिरुक्तमिति ज्ञेयम्। धृति-मति-नुतिभिः धृतिः विघ्नादौ आप्रारब्धकर्मसमाप्ति धारणरूपा चित्तवृत्तिश्च मतिर्बुद्धिश्च नुतिः स्तुतिश्च इत्येतैस्त्रिभिर्नामभिः कीर्त्तनीया उपास्या त्वं विपदि धारणाचित्तवृत्तिस्वरूपा च ज्ञानरूपा च स्तवस्वरूपा च इति भावः। नित्ये सनातनि उत्पत्तिविनाशशून्ये इत्यर्थः। अनित्ये नश्वरे मायया व्यक्तरूपायास्तव नाशस्यावश्यम्भावि-त्वादिति भावः। निमित्ते निखिलकारणानां कारणस्वरूपे। नमिते वन्दिते। नूतने मायया पुनः पुनः जन्मग्रहणाद् नूतनत्वं बोद्धव्यम्। पुराणे चिरन्तनि अनादिसिद्धे। पुण्ये निर्मले। पुण्यप्रवाहे पुण्यः पवित्रः प्रवाहः स्रोतः यस्याः सा, तत्सम्बोधने, सरिद्वरायाः सरस्वत्याः पापिनां कलुषविध्वंसित्वादिति बोद्धव्यम्। लक्ष्मीः सरस्वती गङ्गा चेति तिस्रो भार्या हरेरासन्। अथैकदा वागधिष्ठात्री देवी सरस्वती सपत्न्यां गङ्गायां पत्युरधिकं प्रेम मन्यमाना कोपान्विता हरेरनुपस्थितौ गङ्गां श्रवणदुष्करं वाक्यमुवाच तस्यामसद्व्यवहारञ्च चकार। तेन देवी गङ्गा वाण्यै वक्ष्यमाणमभिशापं ददौ—कलावधो मर्त्यं भारतं गत्वा पापिनां कलुषहारिणी सरित्स्वरूपा भवेति। इत्यत्र पौराणिकी वार्तानुसन्धेया। सुवर्णे सु शोभनः वर्णः तुषारशुभ्रवर्ण इत्यर्थः यस्याः सा, तत्सम्बोधने। मात्रे मात्रा इतिशब्दस्य सम्बुद्धौ, मात्रा वर्णोच्चारणकालः, ह्रस्वदीर्घप्लुतस्वररूपा त्वम्, तत्सम्बोधने। मात्रार्धतत्त्वे अर्ध-मात्राख्यव्यञ्जनवर्णस्वरूपा अपि त्वं, तत्सम्बोधने, पञ्चाशद्वर्णात्मिका मातृकास्वरूपा त्वमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्री क्षी धी ह्रीँ स्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते
सन्तुष्टाकारचित्ते स्मितमुखि सुभगे स्तम्भिनि स्तम्भविद्ये ।
मोहे मुग्धप्रवाहे कुरु मम कुमति-ध्वान्तविध्वंसमीड्ये
गीर्गौर्वाग्भारती त्वं कविवृषरसनासिद्धिदा सिद्धविद्या ॥५॥

स्तौमि त्वां त्वाञ्च वन्दे भज मम रसनां मा कदाचित्त्यजेथा
मा मे बुद्धिर्विरुद्धा भवतु न च मनो जातु मे यातु पापम् ।
मा मे दुःखं कदाचिद् विपदि च समयेऽप्यस्तु मे नाकुलत्वं
शास्त्रे वादे कवित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदाचित् ॥६॥

हृदयम् ; स्वरवर्णं विना व्यञ्जनवर्णानामनुच्चार्यत्वाद् व्यञ्जनवर्णानामर्धमात्राख्यत्वं ज्ञेयम्। मतिमति ज्ञानवति । मतिदे ज्ञानदात्रि । माधवप्रीतिदाने विष्णुप्रिये ।४।

ह्रीँ क्षीँ धीँ ह्रीँ स्वरूपे ह्रीँ क्षीँ धीँ ह्रीमिति चतुरक्षरपुटितमन्त्रदेवतास्वरूपे। दुरितं पापम्। पुस्तकव्यग्रहस्ते पुस्तकं ग्रन्थः। व्यग्रे वामे हस्ते यस्याः सा तत्सम्बोधने। सन्तुष्टाकारचित्ते सन्तोषसूचकमुखभङ्ग्यादिचिह्नोपलक्षिते तथा प्रसन्नचित्ते। स्मितमुखि ईषद्धासभूषितवदने। सुभगे मनोहराकारे। अत्र शुभगे इति पाठान्तरम् शुभं कल्याणं गायति इति शुभ–गै+ड, स्त्रियामाप्, तत्सम्बोधने। स्तम्भिनि बाधादायिनि दुष्टजनानामिति शेषः। स्तम्भविद्ये दुष्टजनानां बुद्धेर्जड़तासम्पादनज्ञानस्वरूपे। मोहे भ्रान्तिस्वरूपे "या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता" इति चण्डी। अथवा जनमनःसम्मोहदायिनि। मुग्धप्रवाहे मुग्धः मनोहरः प्रवाहः कर्मशक्तिर्यस्याः सा, तत्सम्बोधने, विचित्रकर्मकुशले इत्यर्थः। कुमतिध्वान्त-विध्वंसम् कुमतिरेव ध्वान्तमन्धकारस्तस्य विध्वंसो नाशस्तं कुरु इत्यस्य कर्मपदम्। ईड्ये स्तवार्हे। गीर्गौर्वाग्भारती गीः वाणी वाक् वाणी भारती वाणी "ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती" इत्यमरः। एताश्चतस्रः वागधिष्ठातृदेवताः, गीरित्यादिचतुष्टयं समानार्थं पदं सरस्वतीवाचकम्। कविवृषरसनासिद्धिदा कवयः वृषा इव तेषां रसना तस्याः सिद्धिः तां ददाति या सा कविश्रेष्ठानां वाक्यानि सफलतां नयसि त्वमेवेत्यर्थः। किं तवैतावता गुणकीर्तनेन, त्वमेव सिद्धविद्या ज्ञानस्य साक्षात्फलस्वरूपा ।५।

भज मम रसनां 'सा मे वसतु जिह्वायां वीणापुस्तकधारिणी' इति देव्याः पुष्पाञ्जलिमन्त्रे। विरुद्धा धर्मार्थकाममोक्षलाभे प्रतिकूला। विपदि च समयेऽप्यस्तु मे नाकुलत्वं विपत्काले धृतिरस्तु मे इति प्रार्थना। शास्त्रे वादे कवित्वे शास्त्रे वादे कवित्वे चेति वक्तव्यम् शास्त्रे कार्याकार्यव्यवस्थिते निर्धारकग्रन्थे वादे यथार्थविचारे कवित्वे काव्ये रसात्मकवाक्यरचनायाम्। कुण्ठा सङ्कोचः व्याहतता इत्यर्थः ।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्येतैः श्लोकमुख्यैः प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो
वाणीं वाचस्पतेरप्यभिमतविभवो वाक्पटुर्मृष्टपङ्कः ।
स स्यादिष्टार्थलाभी सुतमिव सततं पाति तं सा च देवी
सौभाग्यं तस्य गेहे प्रसरति कविताविघ्नमस्तं प्रयाति ॥७॥

ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ।
सारस्वतो नरः पाठात् स स्यादिष्टार्थलाभवान् ॥८॥

पक्षद्वयेऽपि यो भक्त्या त्रयोदश्यैकविंशतिम् ।
अविच्छेदं पठेद् धीमान् ध्यात्वा देवीं सरस्वतीम् ॥९॥

शुक्लाम्बरधरां देवीं शुक्लाभरणभूषिताम् ।
वाञ्छितं फलमाप्नोति स लोके नात्र संशयः ॥१०॥

इति ब्रह्मा स्वयं प्राह सरस्वत्याः स्तवं शुभम् ।
प्रयत्नेन पठेन्नित्यं सोऽमृतत्वञ्च गच्छति ॥११॥

इति श्रीश्रीसरस्वतीस्तोत्रं समाप्तम् ॥

'सा च देवी' वाणी इत्यस्य विशेषणम् । वाणी सरस्वती पाति इत्यस्य कर्तृपदम् । वाचस्पतेः बृहस्पतेः 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी, अभिमत इत्यस्य कर्तृपदम् ; अभिमतः विभवः सम्पत्तिः यस्य सः सापेक्षत्वेऽपि गमकत्वाद् बहुव्रीहिः । वाक्पटुर्मृष्टपङ्कः वाचि पटुः कुशलः वाक्पटुः । मृष्टं शोधितं पङ्कं पापं येन स मृष्टपङ्कः । विघ्नम् इत्यार्षं विघ्न इति शुद्धम् । विपूर्वाद्धन्तेर्घञर्थे के विघ्नः, प्रयाति इत्यस्य कर्तृपदम् । अस्तमित्यव्ययपदम् प्रयाति इत्यस्य कर्मपदम् । अस्तम् नाशम् । ७ ।

सारस्वतः सरस्वत्युपासकः । अन्यत् सर्वं सुगमम् । ८ ।

त्रयोदश्यैकविंशतिम् इत्यार्षश्छन्दोऽनुरोधात् "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेदिति" न्यायात्, त्रयोदश्यामेकविंशतिम् इति शुद्धम् । एकविंशतिं वारान् इत्यूह्यकर्मपदस्य विशेषणम् । ९ ।

शुक्लाम्बरधरां शुभ्रवस्त्रं परिदधानाम् । अन्यत् सुगमम् । १० ।

शुभं मङ्गलदायकम् । सोऽमृतत्वञ्च गच्छति स सर्वथा कीर्तिमान् भवति । कीर्तिर्यस्य स जीवति इति कीर्तिमतश्चिरञ्जीवित्वं प्रसिद्धम् । ११ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामंगलसूत्रम्

[श्रीफटिकलाल दासः]

एकदा भगवान् बुद्धः श्रावस्तीनगरे यदा ।
अवस्थितस्तदा कश्चिद् देवः परमसुन्दरः ॥
स्वत्विषा भास्वरं कृत्वा जेतारण्यं निशाक्षये ।
भगवन्तं समागम्य पप्रच्छ तं प्रणम्य च ॥
"स्वस्तिकामा नरा देवाः पुरान्वोषुः स्वमङ्गलम् ।
आचष्टां मां भवानद्य महामङ्गलमेव यत् ॥"

श्रीभगवानुवाच ।

(१)

मूर्खानुसरणं नैव बुधानामनुवर्तनम् ।
पूज्यपूजाविधानञ्च महामङ्गलमेव तत् ॥

(२)

प्रतिरूपस्थले वासः सुकृतिश्च पुराकृता ।
सम्यगात्मसमाधिश्च महामङ्गलमेव तत् ॥

(३)

बहुश्रुतिः कलाज्ञानं विनयश्च सुशिक्षितः ।
सुभाषितं तथा वाक्यं महामङ्गलमेव तत् ॥

(४)

पित्रोः सेवा सयत्नं च स्त्रीपुत्रप्रतिपालनम् ।
अनुद्वेगकरी वृत्तिर्महामङ्गलमेव तत् ॥

(५)

ब्रह्मचर्यं तथा दानं ज्ञातीनां परिपालनम् ।
अदोषकर्मनिष्पत्तिर्महामङ्गलमेव तत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(६)

पापेऽरतिर्निवृत्तिर्वा मद्यपाने विरागता ।
कर्तव्यपरता चैव महामङ्गलमेव तत् ॥

(७)

विनयश्च तथा भक्तिः सन्तोषोऽथ कृतज्ञता ।
धर्मश्रुतिर्यथाकाले महामङ्गलमेव तत् ॥

(८)

धैर्यं प्रीतिप्रदं वाक्यं श्रमणानां च दर्शनम् ।
धर्मचर्चा यथाकाले महामङ्गलमेव तत् ॥

(९)

ब्रह्मचर्यं तपोवृत्तिरार्यसत्यनिषेवणम् ।
निर्वाणस्योपलब्धिश्च महामङ्गलमेव तत् ॥

(१०)

विषयासङ्गसत्त्वेऽपि यावस्थाऽकम्पचेतसाम् ।
अशोका विरजाः शान्ता महामङ्गलमेव तत् ॥

(११)

भवन्त्येवं प्रकुर्वन्तो विष्वगेवापराजिताः ।
स्वस्तिप्राप्ताश्च सर्वत्र महामङ्गलभागिनः ॥

आभाणकमाला

(वङ्गीयः) दाँत थाकते लोके दाँतेर मर्यादा बोझे ना ।
न खलु दन्तेषु विद्यमानेषु तन्माहात्म्यमवबुध्यते जनः ।
[मञ्जूषायाः सप्तमवर्षस्य पञ्चमी संख्यापि द्रष्टव्या ।]
यावदास्ये स्थिता दन्तास्तावत्तेषामनादरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The cow knows not what her tail is worth till she hath lost it.

यावत् पुच्छं न नष्टं तावद् गौस्तस्य सारं न विजानाति ।

(फरासीसः) La vache ne sait que vaut sa queue jusque a ce qu'elle l'ait perdut.

The worth of a thing is best known by the want.

कस्यचन वस्तुनोऽभाव एव तस्य माहात्म्यमवबोधयति ।

(फरासीसः) Bien perdu, bien connu.

अत्यन्ताय नष्टम्, अत्यन्ताय ज्ञातम् ।

(फरासीसः) Chose perdue est lors continue.

The worth of things is known when they are lost.

Worth is best known by want.

"It so falls out
That what we have we prize not to the worth
Whiles we enjoy it, but being lack'd and lost,
Why, then we rack the value ; we find
The virtue that possession would not show us
Whiles it was ours."

SHAKESPEARE, *Much Ado About Nothing.*

एषा हि वस्तुस्थितिर्यद् यत् खल्वस्माकमायत्तं तद्बुञ्जाना वयं न खलु तद् गुणानुगुणं बहुमन्यामहे, परं यदा तत् प्रणश्यति, यदा तस्याभावोऽनुभूयते, तदैव तस्य सारमतिमात्रं समाकलयामः, तदैव प्रादुष्कुर्महे तस्य तं गुणं यं खलु यावदिदमस्मदीयमासीत्तावद्भुक्तिर्नास्मभ्यं प्रादर्शयत् ।

"The ebb'd man,.....
Comes dear'd by being lack'd.

SHAKESPEARE, *Antony and Cleopatra.*

परिक्षीणविभवे पुरुषे जनोऽनुरज्यते, तस्याभावोऽनुभूयत इति ।

"I shall be lov'd when I am lack'd."

SHAKESPEARE, *Coriolanus.*

मिशरप्रदेशान्तर्गताया आलेक्जान्द्रायाः पुर्याः प्रख्यातस्य पुस्तकागारस्य द्वारे समुत्कीर्णं वर्तते—

२ । (ग्रीसीयः) Psukhes iatreion.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A sanatorium for the mind.

मनस आरोग्यशाला ।

३ । शर्मण्यदेशान्तर्गतबेर्लिननगरस्य राजकीयपुस्तकागारेऽप्युत्कीर्णम्—Nutrimentum spiritus. आङ्गलभाषायामेतत् food for the soul, संस्कृतभाषायां च आत्मनः खाद्यम् इति स्यात् ।

नामरहस्यम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

शाकटायनशब्दस्यार्थः प्रतिपादितः, इदानीं शर्ववर्मशब्दस्यार्थौ विचार्यते । शर्वशब्दः देवादिदेवस्य शिवस्यैव नामान्तरम् वर्मशब्दस्यार्थः कवचमिति । भगवान् भूतभावनो रक्षको यस्य स शर्ववर्मा । तस्य च व्याकरणस्य नाम कातन्त्रमिति । पाणिन्यादिविरचितानि व्याकरणानि विस्तरेण शब्दान् व्याकुर्वन्ति, अत एव तानि बृहत्तन्त्राणि, कातन्त्रे पुनः सार एव सन्निविष्टः, अतस्तत् स्वल्पतन्त्रम् ईषत्तन्त्रं वा ।

ग्रामीणस्य स्वामित्वम्

आनन्दमन्दाकिनीद्वीपतः (Andaman Island) महेन्द्रनाथः कलिकातां सम्प्राप्तः । ततश्च वासशकटयोगेन श्यामबाजाराख्यमापणमासाद्य पण्यशालामेकां प्राविशत् । तत्र च प्रथमतः काष्ठफलके तस्य दृष्टिर्निपतिता । तत्र विश्वभाण्डार इत्युत्कीर्णमासीत् । तद्दर्शनेन भृशं संक्रुद्धोऽसौ कथमियता भूरिलवेन विश्वत्वं सम्पन्नमिति वदन् बभञ्ज तत् काष्ठफलकम् । तत्रत्येन च पुरुषद्वयेन पृष्टम्—किमित्येवं पिशाचवच्चेष्टते भवानिति ? तेनोक्तं तूष्णीं तिष्ठतमिति । ततश्च कोलाहलं संश्रुत्य विनिर्गतः पण्यशालाध्यक्षः । अपरिचितं पुरुषमेकं क्रोधेन नृत्यन्तं दृष्ट्वा तेन पृष्टं को भवान् ? किमित्येवमाचरति ? इति । तेनोक्तं त्वं तावत् कः—नृपो वा मन्त्री वा ? इति । अध्यक्षेणोक्तम्—अहं तावत्पण्यशालाया अस्या अध्यक्षः । एवं चेत् त्वयात्रत्यान्युपकरणानि भज्येरन् त्वामारक्षिकपुरुषाणां हस्ते समर्पयिष्यामि इति । तेन च क्रोध-संरक्तनयनेनोक्तम्—अहमस्याः पण्यशालायास्तथा सर्वस्यास्य श्यामबाजारस्य स्वामी । बास-शकटे *कण्ट्राकटारेणोक्तं

* कण्डाकटारेणेति वक्तव्ये तेन कण्ट्राक्टारेणेत्युक्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"श्यामबाजार चतुरानकम्" "श्यामबाजार चतुरानकम्" इति। मया पृष्टम्—किं चतुर्भिरानकैः श्यामबाजारः प्राप्यते इति। तेनोक्तं बाढं प्राप्यते। ततश्च तस्माया-नकचतुष्टयं प्रदत्तम्। तेन च मम स्वत्वप्रतिपादकं पत्रं प्रदत्तम्। इदं तत्पत्रम्। दृश्यताम्। इत्युक्त्वासौ चतुरानकसम्मितं शुल्कपत्रं (bus ticket) प्रादर्शयत्, अवदच्च, नितरामुद्धतोऽसि त्वम्। न मे त्वादृशेन कर्मकरेण प्रयोजनम्। अत इदानीमेव त्वां कर्मणः प्रच्यावयामि। अपसर त्वम्। इति।

बहुलीभूताः प्रमादाः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

कस्य वा न विदितः सुप्रथितः श्लोक :—

रात्रौ जानुर्दिवा भानुः कृशानुः सन्ध्ययोर्द्वयोः।
एवं शीतं मया नीतं जानु-भानु-कृशानुभिः॥

इति। जानुशब्दस्य क्लीबत्वं लौकेषु वेदेषु च प्रसिद्धम्। ग्रीक्भाषायां gonu लाटिन्भाषायां च genu अपि नपुंसकम्। अतोऽत्र 'रात्रौ जानु दिवा भानुः' इति पठनीयम्। भानुकृशानुसाहचर्येण जानुनाप्यत्र विसर्जनीयोऽजित इति प्रतिभाति। राजतरङ्गिण्यां दृश्यते—

इत्युदीर्य निजं जानुं रक्षः पारात् प्रसारयत्।
तन्महासरितो वारि सेतुसीमन्तितं व्यधात्॥ २।२४५

इति। अत्रापि महाभारतानुसारेण प्रयुक्तं जानुमिति पदं प्रामादिकम्।

शकुन्तला-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः। वत्स महेन्द्र, "अस्मान् साधु विचिन्त्य संयमधनान्" इति श्लोके 'संयमधनान्' इत्यस्य को वार्थः?

महेन्द्रः। आर्य, संयम एव धनं येषामिति बहुव्रीहौ संयमधन-शब्दो निष्पन्नः, तस्य द्वितीया-बहुवचने संयमधनानिति भवति। दुष्यन्तेन गान्धर्वेण विधिना शकुन्तलां परिणीय स्वनगरं प्रतिनिवृत्तेनान्तःपुरसमागतेन लेखमात्रमपि न विसृष्टम्। तत्र केनापि कारणेन भवितव्यम्। अविदितशापवृत्तान्तेन कुलपतिना सम्भावितम्—तपोवनपालिता शकुन्तला सर्वथाऽयोग्यैव महिषीपदस्येति मत्वा राज्ञेत्थमाचरितमिति, अतस्तेनोच्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न खलु वयं वसुमन्त इति मत्वा दुहिता मे न प्रत्याख्यानीया। काममस्माकं सुवर्णरजतादिकं निष्कदीनारकार्षापणादिकं नास्ति, तथापि वयं धनिन एव। संयम एवास्माकं परमा सम्पत्, तयैव सम्पन्ना वयम्। अस्मद्दुहितापि तस्याः सम्पदोंऽशभागिनी। सापि सुशीलानामग्रगण्या, अत एव दरिद्रतनयेति सा न परिभवनीया, विवादश्च विवाहश्च समयोरेव शस्यत इत्युच्चार्य वाऽयोग्येति न प्रत्याख्यानीया। सम्पदा सा सर्वथा भवतः समकक्षैव। किञ्च, इह खलु संसारे दरिद्रः सर्वत्र परिभूयते, मृदुः सर्वत्र बाध्यते। त्वया तु दरिद्रा इति वा मृदव इति वा न वयं दुहितृप्रत्याख्यानेन परिभवनीयाः। संयमधनेष्वस्मासु निग्रहमाचरतः स्वर्गं वा पातालं वा प्रयातस्यापि ते नास्ति निस्तारः, किं पुनर्मर्त्य एव तिष्ठतः। वयं तावत् संयमिनः। न खलु वयं क्रुध्यामो वा शपामो वा, देवास्तु न क्षमिष्यन्ति। निग्रहीता देवैरेव महतानिष्टेन संयोजितो ध्रुवमेवानुशयपरम्परामनुभविष्यति। एवं स्वेच्छाचारितायाः फलं विशेषतो विमर्शनीयम्।

अध्यापकः। साधु वत्स, साधु। उद्घाटितं श्रीमता कालिदासस्य हृदयम्। यद्यपि राघवभट्टेनोक्तम्—मुन्यादिपदत्यागेन संयमधनग्रहणम् अङ्गीकारानङ्गीकारयोर्भयानुग्रहौ दर्शयतीति, अभिरामेण चोक्तं संयमे धनत्वारोपणेनार्जनरक्षणतात्पर्यं व्यज्यते, तेन तत्प्राचुर्यम्, तेन निग्रहानुग्रहसामर्थ्यमिति। तथापि तवैव व्याख्यानं नो रोचते। यद्यपि—

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति॥

इति, तथापि संयमधनानिति विशेषणेन दुहितुः सौशील्यमात्मनश्च तटस्थत्वं व्यज्यते इति प्रतिभाति। क्व वयं मह्यामेव महेन्द्रस्यैश्वर्यमुपभुञ्जानाः, क्व चेयमस्वस्तनिकवृत्तेरकिञ्चनस्य दुहितेति न मन्तव्यमिति कवेराशयः।

वत्स नरेन्द्र, अस्मानित्यत्र कथं बहुवचनम्?

नरेन्द्रः। आर्य, अस्मदो द्वयोश्च [पा० १।२।५९] इति सूत्रेण। एकत्वे द्वित्वे वा विवक्षितेऽस्मदो बहुवचनं वा स्यादिति तदर्थः।

सुरेन्द्रः। नहि नहि, नेदं सूत्रमत्र प्रवृत्तिमर्हति। सविशेषणस्य प्रतिषेध इति हि वर्तते वार्त्तिकम्। अत्र च 'संयमधनान्' इति विशेषणस्य सद्भावात् प्रतिषिद्धं बहुवचनम्। एवम् "एते क्लान्तमनसः पुनर्नवीकृताः स्मः" इत्यत्रापि बोद्धव्यम्।

अध्यापकः। अस्मदो द्वयोश्चेत्यत्र नास्ति किमपि वार्त्तिकम्। सूत्रमपीदं प्रत्याख्यातं भाष्यकृता। तथाहि तद्वचनम्। अयमपि योगः शक्योऽवक्तुम्। कथमहं ब्रवीमि, आवां ब्रूवः, वयं ब्रूमः? इमानीन्द्रियाणि कदाचित्स्वातन्त्र्येण विवक्षितानि भवन्ति। तद्यथा, इदं मेऽक्षि सुष्ठु पश्यति। अयं मे कर्णः सुष्ठु शृणोतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचित् पारतन्त्र्येण। अनेनाक्षणा सुष्ठु पश्यामि। अनेन कर्णेन सुष्ठु शृणोमीति। तद् यदा स्वातन्त्र्येण विवक्षा तदा बहुवचनं भविष्यति यदा पारतन्त्र्येण तदैकवचन-द्विवचने भविष्यतः। इति। जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् [पा० १।२।४८] इति पूर्ववर्तिनि सूत्रे दृश्यते वार्त्तिकम् [संख्याप्रयोगे प्रतिषेधः ।४।] अस्मदो नामयुवप्रत्यययोश्च ।५। इति। व्याख्यातश्चेदं भाष्ये—अस्मदो नामप्रयोगे युवप्रत्ययप्रयोगे च प्रतिषेधो वक्तव्यः। नामप्रयोगे। अहं देवदत्तो ब्रवीमि। अहं यज्ञदत्तो ब्रवीमि। युवप्रत्ययप्रयोगे। अहं गार्ग्यायणो ब्रवीमि। इति। वार्त्तिकमिदं तु भाष्यकारस्य न सम्मतम्। अत एव तेनोक्तम्—युवग्रहणेन नार्थः। अस्मदो नामप्रत्यय-प्रयोगे नेत्येव। इदमपि सिद्धं भवति। अहं गार्ग्यो ब्रवीमि, अहं वात्स्यो ब्रवीमि इति। ततश्च मतान्तरं भाष्यकृतोल्लिखितम्—अपर आह। अस्मदः सविशेषणस्य प्रयोगे नेत्येव। इदमपि सिद्धं भवति। अहं पटुर्ब्रवीमि। अहं पण्डितो ब्रवीमि। इति। अविप्रतिषिद्धं परमतमनुमतं भवतीति न्यायेन जयादित्येनेदमपि भाष्यकारस्य मतमिति निर्धार्य कृतं वार्त्तिकम्—सविशेषणस्य प्रतिषेधो वक्तव्य इति। अत्र न्यासकृता विशिष्य किमपि नोक्तम्। हरदत्तेन पुनः पदमञ्जर्यामुक्तम्—त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः [वैराग्यशतके] इत्यत्रोन्नतत्वमेव विधीयते, न च विधेयोऽर्थो विशेषणमित्यतिदेशो भवत्येव। इति। इदमेवानूद्य भट्टोजिदीक्षितेनोक्तं शब्दकौस्तुभे—अनुवाद्यविशेषण-परत्वात्प्रतिषेधस्येति हरदत्त इति।

अत एव सूत्रमतेन वार्त्तिकमतेन भाष्यकारपरिशोधितवार्त्तिकमतेन च 'एते श्रान्तमनसः पुनर्नवीकृताः स्मः' 'अस्मान् साधु विचिन्त्य संयमधनान्' इत्यादिप्रयोगाणां साधुत्वं सुव्यवस्थितम्। भाष्यकारोद्भूतैकीयमतेन पुनरेषामसाधुत्वम्।

सुरेन्द्रः। आर्य, किमुद्दिश्य विधिरेष प्रणीत आचार्येण ?

अध्यापकः। प्राचीनेऽस्माकं भारते वर्षे आर्याः स्वत एव निरभिमाना अविक-त्थनाश्चासन्। उत्तमपुरुषस्यैकवचनं प्रायेणाहङ्कारमेव वक्तुः प्रत्याययति। तथाहि—'इदं वयं मन्यामहे' 'इदमहं मन्ये' 'इदं देवदत्तो मन्यते' इति देवदत्तस्योक्तित्रयं यथोत्तमभिमानसूचकम्। अत एव प्रायेणोत्तमपुरुषस्यैकवचनं परिह्रियते विद्याविनयादि-सम्पन्नैः। किं च राजानस्तावदष्टानां लोकपालानां मात्राभिर्निर्मिताः प्रजानां न्न प्रतिनिधय इति राजभिः प्रायेण स्वात्मानमुद्दिश्य बहुवचनमेव प्रयुज्यते। किञ्च, बहुषु स्थलेषु वक्ता स्वाभिमतप्रकटनकाले स्वसधर्मणामपि तन्मतमिति वक्तुमिष्यते, अत एव बहुवचनं प्रयुज्यते। अत एव Macdonell-महोदयेन Vedic Grammar for Students-ग्रन्थे विलिखितम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The 1 pers. pl. is sometimes loosely used instead of the sing. or du. ; thus Yama in his dialogue with Yamī says : न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम how pray can we, what we have never done before, speaking of righteous things now talk of what is unrighteous ? (x. 10. 4.)....This occasional looseness is probably due to the situation for the moment being regarded more generally so as to include others ; *we* would then mean *I and those present, we two and others in like circumstances.* In B. [*i. e.* the Brahmanas] the use of the pl. for the sing. of the first pers. of the personal pronoun is not infrequent, both when the pronoun is expressed and when it is latent in the verb ; e. g. ; स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मः, he replied : *we* (=*I*) show reverence to the most learned man (*S'B.*) ; वरं भगवते गौतमाय दद्मः We (=*I*, Jaivali) offer a boon to His Honour Gautama (*S'B.*) इति ।

सुरेन्द्रः । आर्य, कथं वा बहुवचनेन स्वाहङ्कारः परिहृतो भवति ?

अध्यापकः । बहुवचनेन समुत्कर्षं स्वातन्त्र्यं सन्तक्तं भवतीति कृत्वा ।

सुरेन्द्रः । किमिति तर्हि गौरवे बहुवचनं प्रयुज्यते ?

अध्यापकः । यः खलु सम्बोध्यते स एकोऽपि प्रज्ञादिभिः शतसहस्रसम्मित इति बहुवचनेन बोधयता गौरवं प्रख्याप्यते ।

सुरेन्द्रः । किमिति स्वनाटकस्य प्रारम्भे भवभूतिना "वन्देम देवतां वाचमस्तामात्मनः कलाम्" इत्यत्र बहुवचनं प्रयुक्तम् ?

अध्यापकः । अत्र वाङ्मनःकायकर्तृकं वन्दनमुद्दिष्टम्, अत एव बहुवचनम् । ईदृशेषु स्थलेषु बहुवचनमन्तरेणापि वाङ्मनःकायानां प्रतीतिर्भवति, अत एव कविकुलचूडामणिना कालिदासेन--

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

इत्यत्र,

ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥

इत्यत्र चैकवचनं प्रयुक्तम् । प्रायेण यत्रैकवचनं छन्दोऽनुगुणं तत्रैकवचनं प्रयुज्यते, यत्र पुनर्बहुवचनं छन्दसः पोषकं तत्र बहुवचनमिति रहस्यम् ।

सुरेन्द्रः । आर्य, किमिति ग्रन्थकारैर्वृत्तान्तपत्रसम्पादकैश्च बहुवचनं प्रयुज्यते ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यापकः। ते हि प्रतिनिधय एव जनानामिति कृत्वा बहुवचनेनात्मानं निर्दिशन्ति।

सुरेन्द्रः। आर्य, निखिलव्याकरणशिरोरत्नायमाने महाभाष्ये सविशेषणस्यास्मदो बहुवचनमुपलभ्यते वा?

अध्यापकः। बाढमुपलभ्यते। तथाहि पंक्तिविंशतीतिसूत्रे [५।१।५९] भाष्यकारेणोक्तम्—"इमे ब्रूमो द्विशब्दादयं दशदर्थाभिधायिनः स्वार्थे शतिच्-प्रत्ययो निपात्यते विन्भावश्च" इति। किञ्च "तस्य भावस्त्वतलौ" [५।१।११९] इति सूत्रस्य भाष्ये दृश्यते—यो यत्राप्रधानं भवति स आह गुणभूता वयमत्रेति। अत एकीयमतं भाष्यकारस्य न सम्मतमिति प्रतीयते।

सुरेन्द्रः। आर्य, एवं मतभेदे किं वा बीजम्?

अध्यापकः। प्राचीनेषु प्रयोगेषु केवलस्यैवास्मच्छब्दस्यैकत्वे द्वित्वे वा बहुवचनं सन्दृश्यते। अत एव भगवता पाणिनिना विशेषणमनुल्लिख्यैव सूत्रं प्रणीतम्—अस्मदो द्वयोश्च इति। ततश्चान्तरान्तरा विशेषणयोगेऽप्यस्मच्छब्दस्यैकत्वे द्वित्वे वा बहुवचनं प्रयुज्यते स्म। तत्तु केषाञ्चन सम्मतं नासीत्। अत एव तैरुक्तम्—अस्मदः सविशेषणस्य प्रयोगे न इति।

तेषामयमाशयः—यदा विशेषणेन किमपि परिच्छिद्यते तदा वस्तुगतिरेवानुसर्तव्या, नतु विवक्षावशतोऽन्यथाकरणीयेति। वार्त्तिककृतः कात्यायनस्याविर्भावकाले प्रयोगा इमे बहुलीभूताः, अत एव तेन सविशेषणस्य प्रयोगो न प्रतिषिद्धः, केवलं देवदत्तादिभिर्गार्ग्यादिभिश्च नामभिः साकं यदा प्रयुज्यते तदा व्याहतत्वदोषापातात्प्रतिषिद्धं बहुवचनम्। कात्यायनेन गोत्रप्रत्ययस्थले एव निषिद्धं बहुवचनम्, भाष्यकारेण पुनर्गोत्रयुवप्रत्यययोः प्रायेण समानयोगक्षेमत्वाद् अर्धजरतीयन्यायाङ्गीकरणस्य चायुक्तत्वाद् युवप्रत्यययस्थलेऽपि बहुवचनस्य प्रसरोऽवरुद्धः।

सुरेन्द्रः। आर्य,

वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीवितच्छिदः।
सहापकृष्टैर्महतां न सङ्गतं भवन्ति गोमायुसखा न दन्तिनः॥

इति भारविपद्ये वयमित्यत्र बहुवचनं समीचीनं वा?

अध्यापकः। बाढं समीचीनम्। अत्र "अस्मदो द्वयोश्च" इति सूत्रस्य प्रसर एव नास्ति, प्रतियोगिनि मृगजीवितच्छिदापि बहुवचनस्य सद्भावात्। अत एव मल्लिनाथेन व्याख्यातम्—वयं राजानः क्व इति।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदमञ्जरीपाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

यावदधारणे [६।१।८] इति सूत्रस्य पदमञ्जर्यां दृश्यते—यावदित्यव्ययं चास्ति तद्धितान्तं च विद्यतेऽतो नित्यसमासेऽपि तद्धितान्तेन विग्रहः इति। एतद् गद्यरूपेण मुद्रितम्। वस्तुतस्तु श्लोकोऽयमित्थं पठितव्यः—

यावदित्यव्ययं चास्ति तद्धितान्तं च विद्यते।
अतो नित्यसमासेऽपि तद्धितान्तेन विग्रहः॥ इति

पृच्छा

यावदिच्छमन्नं भुङ्क्ष्व इति वाक्ये यावदिच्छमित्यत्र अनतिक्रमार्थेऽव्ययीभावो वा, 'यावदवधारणे' इत्यव्ययीभावो वा, यावती इच्छास्मिन् कर्मणि तद् यथा स्यात् तथा इति बहुव्रीहिर्वा ? इति पृच्छति कश्चन जिज्ञासुः।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः। वत्स वरेन्द्र, संपाठः पठ्यताम्।

वरेन्द्रः। आर्य, पाठे मे मनो न लगति। राजेन्द्रेण मम पुस्तकं रोचितमिति।

अध्यापकः। किमिति ? किमिति ?

वरेन्द्रः। आर्य, दुष्टः शब्दः सर्वथा समुच्चारणं नार्हतीति वर्णयोर्विपर्ययं कृत्वोक्तं रोचितमिति।

अध्यापकः। चोरितमिति वक्तुमिच्छसि ?

वरेन्द्रः। आर्य, अथ किम्।

अध्यापकः। अरे रे राजेन्द्र, अपि "रोचितं" त्वया वरेन्द्रस्य पुस्तकम् ?

राजेन्द्रः। बाढं गृहीतम्।

अध्यापकः। अरे रे दुर्वृत्त, किमिति त्वयैवंविधं दुष्टं कर्मानुष्ठितम् ?

राजेन्द्रः। आर्य, महर्षेः पाणिनेरनुशासनेन।

अध्यापकः। वत्स, उन्मत्तोऽसि। गच्छ गृहान् सेवस्व च भेषजानि।

राजेन्द्रः। आर्य, सर्वथा स्वस्थ एवाहमस्मि। न खलु मम पितृकुले मातृकुले वा कदापि केनाप्युन्मत्तायितम्।

अध्यापकः। तर्हि किमित्येवमसम्बद्धं प्रलपसि ?

राजेन्द्रः। आर्य, श्रूयताम्। ह्यः किलास्माभिः 'तोर्लि' इति सूत्रमधीतम्। अत्रभवता च तोः नाम तवर्गस्य, लि नाम लकारे परे इत्येवंरीत्या कल्पितोऽस्यार्थः। परं प्रत्यक्षे परिपन्थिनि कल्पना न साध्वी भवति। अत्र च विस्पष्टमेव दृश्यते तोर नाम तव, लि नाम लइ नाम नयामि नाम गृह्णामि। माल्यमिव महर्षेरनुशासनमस्माभिः शिरसि धार्यते, अत एव निर्विशङ्कं गृहीतं मया वरेन्द्रस्य पुस्तकम्।

अध्यापकः। अरे रे मूर्ख, वङ्गभाषायां तोर-शब्दस्यार्थस्त्वदीयमिति, महर्षिणा पुनर्देवभाषायां रचितानि सूत्राणि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजेन्द्रः। त्रिकालदर्शिना सर्वभाषाविदा मुनिप्रवरेण सर्वजनानुकम्पयान्तरान्तरा देशभाषयापि विरचितानि सूत्राणि।

भूपेन्द्रः। आर्य, महर्षिणा सम्यगुक्तमिति प्रतिभाति। पाश्चात्त्यकविना Wordsworth-महोदयेनाप्युक्तम्—the good old rule...the simple plan, that they should take who have the power and they should keep who can. प्राचीनं सूत्ररत्नमिदम्, सरलोऽयमभ्युपायः, येषां शक्तिरस्ति तैर्ग्रहणीयम्, ये च प्रभवन्ति तैः परिरक्षणीयमिति।

महेन्द्रः। आर्य, अलं पाश्चात्त्योक्तिगवेषणेन। अस्मदीयेन भारविणाप्युक्तम्—अथास्ति शक्तिः कृतमेव याच्ञया न दूषितः शक्तिमतां स्वयंग्रह इति।

नरेन्द्रः। आर्य, धर्मशास्त्रकारैरप्युक्तं परद्रव्येषु लोष्ठवदिति। रथ्यासु स्थितानि लोष्टानि यथा निर्विशङ्कमेव ग्रहीतुं शक्यन्ते तथा परद्रव्याण्यपि। तत्र कोऽपि दोषो न भवति, ततः किमपि पापं नोपजायते।

अध्यापकः। इतः पूर्वं कदापि मयैतत्सर्वं न चिन्तितम्। सुष्ठु खल्विदमुच्यते—यथाध्यापकश्छात्राञ्छिक्षयति, तथा छात्रा अप्यध्यापकं शिक्षयन्तीति। परं देवधिया विचिन्त्यतां वत्साः किमस्य सूत्रस्य तात्पर्यमिति। वङ्गभाषायां देवगुर्वादयो यदा बोद्धव्या भवन्ति, तदा त्वदीयमित्यस्यार्थे आपनार इति चतुरक्षरः शब्दः प्रयुज्यते। यदा वक्तुः समानमाना बोद्धव्या भवन्ति तदा त्र्यक्षरः 'तोमार'शब्दः प्रयुज्यते। यदा निहीना बोद्धव्या भवन्ति, तदा द्व्यक्षरः तोरशब्दः प्रयुज्यते। गच्छता कालेन चान्त्यस्वरस्य लोपेन क्रमेणेमानि त्र्यक्षरद्व्यक्षरैकाक्षराणि सञ्जातानि। एवं च यथा यथा गौरवस्य ह्रासो भवति तथा तथाक्षरस्यापि ह्रास उपजायते। एवमेव देवगुरुप्रभृतिषु प्रयुक्तं भगवानिति पदं समानमानेषु भवानिति सञ्जातम्। 'लि' इति पदमपि वङ्गप्रदेशान्तर्गतचट्टग्रामादिषु हीनजनेष्वेव प्रसिद्धम्। अत एव यैस्तावदहोरात्रम् "आय तोर् नि" "आय तोर् नि" (आयाहि गृह्णामि त्वदीयं सर्वस्वम्) इत्युच्यते ते attorney इति व्यपदिश्यन्ते, एवं च तोलिसूत्रेण भगवता पाणिनिना पामराणां स्वाभाविकी प्रवृत्तिः प्रदर्शिता। स्वो हि भावः पामराणां परद्रव्येषु स्पृहयालुत्वं नाम। स च स्वभावः शास्त्रेण संस्कर्तव्यः, सा स्पृहा समूलमुन्मूलनीयेति शास्त्रार्थः।

राजेन्द्रः। आर्य, ज्ञानाञ्जनशलाकयेदानीमुन्मीलिताऽज्ञानतिमिरान्धस्य मे दृष्टिः। इदं प्रत्यर्प्यते मया वरेन्द्रस्य पुस्तकम्।

अध्यापकः। एवमेव सत्यं वदन् धर्मं च चरंश्चिरं जीव।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. SUNITI KUMAR CHATTERJEE, M. A., D., Litt. (London)

Chairman, Bengal, Legislative Council, writes :—

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enlist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his meutal make-up a dry-as-dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistics he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bonmots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Lafin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patanjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M. A., D. Litt

Professor, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc, etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit,* etc., have beeu traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers"**

Price Rupees Twelve only. *Foreign Rs. 14/-*
Postage Extra

VISVANATH CHATTERJI
81 Shyambazar Street,
CALCUTTA—4
Phone : B. B. 4049

Printed and published by Sri Visvanath Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Gupta Press, 37/7, Baniatola Lane, Calcutta—9.
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

Special Dipavali Number

नवम-वर्ष] November, 1954 [तृतीया संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Works of Dr. K. C. Chatterjee

Chandra Vyakarana—The First Great Revised Edition of Panini, critically edited with Vrtti, rules of Panini and Bhoja, etc. etc. Part I Rs. 12/-

Patanjali's MAHABHASHYA (Paspasha) with English Translation, exhaustive critical and explanatory notes, commentaries etc. Rs. 3/12/-

A boon to students of languages is **Greek Proverbs** in Roman character with their Latin and English analogues and parallel proverbs and sayings from Sanskrit, Marathi and Bengali. All the grammatical forms have been clearly explained and the student of Sanskrit will not only acquire some knowledge of the glorious Greek language but will be struck with the resemblance it bears to Sanskrit. *Price : Rupees Two only.*

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Three only.

Foreign—Rupees Five.

Single copy : Eight annas.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषाया नियमावली

मञ्जूषाया वार्षिकं मूल्यं रूपकत्रितयम्। आश्विन (September) मासतो वर्षारम्भः। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

स्त्रीप्रशंसा—वराहमिहिरस्य श्लोकाः

भट्टोत्पलटीकया विद्यावाचस्पतिविरचिताभिनवविस्तृतव्याख्यया च विभूषिता। मूल्यं रूप्यकमात्रम्।

Convocation Address in Ancient India As. 12

Popular Etymology— Re. 1/-

শব্দকথা—সরস, সরল ভাষাতত্ত্ব ২৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া**, বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওত-প্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে। সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরল ও সরসভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঋগ্বেদীয়ম্ আনোভদ্রসূক্তম্ পঞ্চভাষ্যসমন্বিতম্ ২॥০

উষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/০

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

শ্রীবিশ্বনাথ-চট্টোপাধ্যায়ঃ।

Phone—B. B. 1049 ৮২ শ্যামবাজার ষ্ট্রীট্, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

सज्जूषा

November, 1954 | १८७६-शकीयाग्रहायणस्य ९म-वर्षस्य तृतीया संख्या | Vol. IX No. 3

श्रीशिवाशिवस्तुतिः

[पण्डित-श्रीतर्कतीर्थनीलकण्ठशिवाचार्यः]

शिवा तनूर्यस्य शिवा च या सती
शिवा शरव्या च शिवश्च यः शरः ।
शिवं धनुर्यच्च शिवाश्च या गिरः
शिवः स नित्यं शिवमातनोतु नः ॥

(पूर्व्वल्ली पदावलिचरित्रे)

सः प्रसिद्धः वेदागमोपनिषत्पुराणेषु प्रतिपाद्यमानः, शिवः भगवान् महेश्वरः "शिवः शूली महेश्वरः" इत्यमरः । "शिवमद्वैतं चतुर्थ मन्यन्ते" "ध्यात्वा शिवं शान्तिमत्यन्तमेति" इत्यादिश्रुतिशतैः "शिवेति मङ्गलं नाम यस्य वाचि प्रवर्तते । तस्य हस्तस्थितं विद्धि सम्पदामास्पदं पदम् ॥" "विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशनी श्रुतौ । तस्यां पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम् ॥" इत्यादिशिवागमवाक्यैश्च संस्तूयमानः शिवशब्दवाच्यः, अनितरसाधारणमङ्गलवाचकशिवशब्दाभिधेय इत्यर्थः । शक्तिविशिष्टपरब्रह्माभिधः परमशिव इति परमार्थः ॥ नः अस्माकं नित्यं सर्वदा शिवं मङ्गलम् आतनोतु विस्तारयतु ददातु इति भावः । "श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" इत्यमरः । सर्वदा शिवमयत्वेन सदाशिव इति प्रसिद्धमङ्गलनामोद्धितस्य भक्तानां मङ्गलप्रदायकत्वं स्वतःसिद्धम् आशुतोषस्य भगवतो महादेवस्येति विशदार्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सः कथंभूतः शिवः ? यस्य तनूः दिव्यशरीरं शिवा मङ्गलमयी, "या ते रुद्र शिवा तनूरघोराऽपापकाशिनी" इति श्रुतेः। अग्रे यस्येति सर्वत्रान्वयः। या च सती, सती-शब्दाभिधेया भार्या दाक्षायणी, सतीशब्दाभिधेयत्वं प्रसिद्धं भगवत्याः, यत् स्वभर्तुर्भगवतो महादेवस्य सम्मानरक्षार्थं दक्षाध्वरे दाक्षायणीतनूसमर्पणं ततः। सेयं भगवती शिवभार्या शिवा मङ्गलस्वरूपा। "शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला" इत्यमरकोशात्, "सर्व-मङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥" इतिदुर्गासप्तशतीप्रमाणाविरोधेन, सर्वतन्त्रानुरोधेन, सर्वमङ्गलेति पवित्रनामसाहचर्येण च शिवेति सर्वार्थसाधकमङ्गलनामाभिरामा वा इत्यर्थः। तथा शरव्या त्रिपुरमर्दन-समये शिवशरासनरूपः सागरः। शिवा मङ्गलात्मिका। "शिवा शरव्या या तव तया नो रुद्र मृडय" इति श्रुतेः। यश्च शरः विष्णुरूप बाणः शिवः, तथा यच्च धनुः मेरुगिरिरूपचापः शिवं मङ्गलस्वरूपं "या त इषुः शिवतमा शिवं बभूव ते धनुः" इति श्रुतेः। याश्च गिरः वाचः शिवाः क्षेमङ्करा मङ्गलमय्य इत्यर्थः। "शिवेन वचसा त्वा गिरि-शाच्छ वदामसि" इति श्रुतेः॥ प्रसिद्धमेतच्छिवपचनं वेदागमशब्दराशिरूपं सर्वदा मङ्गलकरमिति सर्वमनवद्यम्।

The Derivation of Pravina

[Kshitish Chandra Chatterji]

Pravīṇa is a well-established word and is listed in the s'auṇḍādi-gaṇa of Pāṇini. Sanskrit grammarians generally regard the word as a prādi compound of pra and vīṇā (प्रकृष्टो वीणायाम्). Rhetoricians point out that the sense of the word has become generalized and from meaning an adept at the lute it has come to mean an adept or expert in any science or art. But this explanation is hardly satisfactory. The word appears to be formed from *pra* with the suffix -īna and an intrusive *v* after the analogy of *navīna*. Exactly in the same way we have *suvita* as the antonym of *durita* in Vedic.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the printed editions of Patañjali's "Mahābhāṣya" we find under v.4.30 :

नवस्य नूत्नप्तनखाश्च ॥६॥

नवस्य नू इत्ययमादेशो वक्तव्यः, त्नप्तनखाश्च प्रत्यया वक्तव्याः। नूत्नम् नूतनम् नवीनम्।

नश्च पुराणे प्रात् ॥७॥

नश्च पुराणे प्राद् वक्तव्यः, त्नप्तनखाश्च प्रत्यया वक्तव्याः। प्रणम् प्रत्नम् प्रतनम् प्रीणम्।

In the case of Vārttika 6, Mss. read नप्तनखाश्च, but it is clear from the examples that the first suffix is *-tnap* and not *-nap*. As the accents are not marked in the Mahābhāṣya it is not evident from the text as to whether the suffix is *-tana* or *-tanan* or *-tanap*. If the suffix be *-tana*, then the word "nūtana" would be accented on the second syllable, if it be *-tanap* or *-tanan*, then the word would be accented on the first syllable. As the word is found invariably accented on the first syllable, the suffix must be either *-tanap* or *-tanan*. The Kāśikā has *-tanap*, but Sāyaṇa reads *-tanan*. In the case of the next Vārttika also the reading appears to be vicious. In the first place the examples "praṇa", "pratana" and "prīṇa" are not met with in literature. Secondly, "pratna", formed according to this Vārttika would be accented like "nūtna" on the first syllable. But it is accented on the second syllable from the Rigveda downwards. Thirdly, the Vārttikakāra appears to extend the suffixes of "nū" to "pra". But the word corresponding to "navīna", which consists of three syllables, can hardly be "prīṇa" which contains two syllables only. It is likely to be "pravīṇa" as in the case of "suvita" formed after "durita". So the reading of the Vārttika has to be re-considered.

There is not the slightest doubt that the first syllable is *tna* and not *na*. In one Ms. the reading *tnaśca* is actually found and several Mss. read *nnaśca* which unmistakably

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

points to *tnas ca*, In many Mss. "pratnam" occurs first and then "praṇam". And in one Ms. above the first example "pratnam" there is the numeral 2. All these support our reading of the Vārttika. As regards the Bhāṣya, I am inclined to read : त्नश्च पुराणे प्राद् वक्तव्यः । प्रत्नम् । If we read त्नश्च पुराणे प्रात् and accept the meaning given in the Bhāṣya, the examples will be प्रत्नम् प्रत्नम् प्रतनम् प्रीणम्, the first प्रत्नम् formed with *-tna*, being accented on the second syllable and the second formed with *-tnap* on the first syllable. So the word "praṇam", which is found in most lexicons and grammars, vanishes into the realm of the unreal. Another difficulty still remains. No dictionary or grammar has been able to quote a single instance of "pratana" or "prīṇa" or of "pratna" accented on the first syllable. I am therefore inclined to drop *ca* from the Vārttika altogether. If it is to be retained, it may be taken as mentioning another case and not as bringing up the previous suffixes.

आभाणकमाला

अधिकन्तु न दोषाय ।

Plenty is no fault.

Plenty never wrings its master by the ear.

Store is no sore.

French. Abondance de biens ne nuit pas.

German. Doppelt reisst nicht.

Scotch. Plenty is nae plague.

एतद्विपरीतार्था अप्याभाणका सन्दृश्यन्ते ।

Inopem me copia fecit. OVID.

Plenty has made me poor.

Plenty makes us poor.

Plenty begetteth want, for he that hath much needs much.

प्राचुर्यमस्मान् दरिद्रान् विदधाति ।

प्राचुर्यमभावं प्रसूते । यस्य हि बहुलं विद्यते तस्याभावोऽपि बहुलो भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

आपद्यभग्नधैर्यत्वं सम्पद्यनभिमानिता ।
यदुत्साहस्य चात्यागस्तद्धि सत्पुरुषव्रतम् ॥
महान्तश्च महान्त्येव कृच्छ्राण्युत्तीर्य धैर्यतः ।
महतोऽर्थान् समासाद्य महच्छब्दमवाप्नुवन् ॥
अनम्राक्रमणं शौर्यं धनं निजभुजार्जितम् ।
भार्या रूपानुरूपा च पुरुषस्येह पूज्यते ॥

———

अपूर्वो विचारः

धर्माधिकरणे विचारः प्रवर्तते । बधिरः प्राड्विवाको विचारकर्मणि व्यापृतः । नियतेः परिहासेन वादी च प्रतिवादी चोभावेव बधिरौ ।

वादी प्राह, प्रतिवादिना भाटकमवश्यमेव प्रदेयम् । तच्छ्रुत्वा प्राड्विवाकः प्रतिवादिनमपृच्छत्, किमत्र तव वक्तव्यं वर्तते ?

प्रतिवादिना प्रत्युक्तम्, प्रतिदिनमेवाहं रात्रौ सस्यानि विचूर्णयामि ।

अन्ततश्च प्राड्विवाकेनोक्तम्, उभाभ्यामेव भ्रातृभ्यां मातुर्भरणपोषणेऽवधातव्यमिति ।

———

अर्धं त्यजति पण्डितः

आसीत् कश्चन प्राज्ञम्मन्यो वणिक्पुत्रः । स चैकदा वणिज्यार्थं कटाहद्वीपमगच्छत् । तस्य च भाण्डमध्ये महान् अगुरुसञ्चय आसीत् । परं महतापि प्रयत्नेन तेन प्रोद्घोषितोत्कर्षमपि कोऽपि तस्य तदगुरु नाक्रीणात् । इतरेषां वणिजां भाण्डानि विक्रीतानि, तस्य पुनरगुरुराशिर्यथावदेव स्थितः । अविदितमेवागुरु तत्रत्यानां जनानामिति । अन्ततश्च तेन दृष्टम्—जनाः काष्ठिकेभ्योऽङ्गारानक्रीणन्निति । ततस्तेन सर्वं तदगुरु दग्ध्वा अङ्गारत्वमापादितम् । तच्चाङ्गारं मूढोऽसावङ्गारमूल्येनैव व्यक्रीणीत । ततश्च स्वदेशं प्रत्यागत्य सुहृदां पुरतः स्वं कौशलं शंसन् सर्वेषामुपहासास्पदमभवत् ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्रा सूत्रस्य कृतिः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

भगवतः पाणिनेरष्टाध्याय्यां वर्तते सूत्रम्—वेरपृक्तस्य [६।१।६९] इति। क्विप्-क्विन्-प्रभृतीनां प्रत्ययानां वेर्लोपो भवतीति तदर्थः। एकवर्णघटितः प्रत्ययोऽपृक्त इत्युच्यते। वर्णान्तरसम्पर्कविरहितः अपृक्तः। अत्र च सूत्रम्—अपृक्त एकाल्प्रत्ययः [१।२।४१] इति। पाणिनिना क्विप्-क्विन्-प्रभृतयः क्विँप् क्विँनादिरूपेणोच्चारिताः। अत एव 'उपदेशेऽजनुनासिक इत्' [१।३।२] इति सूत्रेणानुनासिकस्य इकारस्येत्संज्ञा सञ्जाता। इत्संज्ञकस्य च "तस्य लोपः" [१।३।१] इति सूत्रेण लोपो भवति। व् इत्येवावशिष्यते। तस्य च वर्णान्तरसम्पर्कशून्यत्वादपृक्तत्वं स्फुटमेव। अत एव वेरपृक्तस्येति लोपो भवति। अत एव क्विप्-क्विन्-विच्-विट्-प्रत्ययानां किमपि नावशिष्यते। अत एव निर्धनो जनः क्विप्प्रत्ययनिभ इत्युच्यते, अविद्यमानवदित्यर्थः।

अत्र स्वत एव समुदेति प्रश्नो विवेचकानां विपश्चितां मानसेषु—किमिति सत्सु परः-परार्धेषु शब्देषु विशब्दघटितस्यैव लोपो भगवता विहित इति। अत्रोत्तरम्—लोपशब्दो विनाशार्थकः। विनाशशब्दस्य च प्रथममक्षरं 'वि' इति। अत एव येषां प्रत्ययानां साकल्येन लोपः कर्तुमिष्टः, तेषु विनाशशब्दस्यैकदेशो 'वि' इति योजितः, नामैकदेश-ग्रहणे नाममात्रग्रहणमिति न्यायेन। इति।

सतीर्थो वा सतीथ्यो वा

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

वङ्गहिन्दीप्रभृतिषु भाषासु class-mate इत्यर्थे निर्यकारः सतीर्थशब्दो बाहुल्येनोपलभ्यते। स स्मृत्यनुगुणो वा न वेति विचार्यते। तीर्थशब्दस्य गुरुरित्यर्थः सर्वेषामेव सम्मतः। अत एव समानं तीर्थम् एकः गुरुः येषां ते सतीर्थाः। समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु [६।३।८४] इति योगस्य विभागेन सर्वेष्वेवेष्टेषु स्थलेषु समानस्य सभावः सिध्यतीति निर्यकारपाठप्रणयिनः।

एतत्तु पाणिनिसूत्रपर्यालोचनतो न लभ्यते। तथाहि तीर्थे ये [६।३।८७] इत्यष्टाध्यायीसूत्रम्। व्याख्यातश्चेदं कौमुद्याम्—तीर्थ उत्तरपदे यादौ प्रत्यये विवक्षिते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समानस्य सः स्यादिति। यादिप्रत्ययस्य च सूत्रम्—समानतीर्थे वासी [४।४।१०७] इति। व्याख्यातश्चेदं कौस्तुभे—समाने तीर्थे गुरौ वसतीति सतीर्थ्यः। तीर्थे ये इति समानस्य सभावः। तरन्त्यनेनेति तीर्थम्। तरतेस्थक्।...इह त्वध्यापकवाचिनो ग्रहणं नान्यस्य। इति। यथास्माभिर्दृष्टं तथा चन्द्रादीनां सर्वेषामेवार्वाचीनानां वैयाकरणानामत्रैकमत्यम्।

तीर्थे ये इत्यर्थकस्य सूत्रस्य प्रायेण सर्वेष्वेव व्याकरणेषु विद्यमानत्वात् केवलतीर्थशब्दे परे समानस्य सभावो न सिध्यति। अभिधानकोशेष्वपि प्राचीनेषु सतीर्थ्यशब्द एवोपलभ्यते न पुनः सतीर्थ इति। गच्छता च कालेन वङ्गेषु सयकारस्यापि तीर्थशब्दस्य निर्यकारवदुच्चारणात् सुधीभिरपि लेखनावसरे यकारः परिह्रियते स्म। अत एव शब्दरत्नावल्यां दृश्यते—"स्यात् सतीर्थः सतीर्थ्योऽपि तथैकगुरुरित्यपि" इति। एतदनुसारेण च शब्दकल्पद्रुमे सतीर्थसतीर्थ्यशब्दावुभावेवोपात्तौ। शब्दकल्पद्रुमानुसारेण Boehtlingk-Rothभ्याम्, तदनुसारेण च Monnier Williams-महोदयेन तदनुसारेण च Apte-महोदयेन सतीर्थ-शब्दस्य साधुत्वं स्वीकृतम्। वस्तुतस्तु सर्वथा शब्दस्यास्यासाधुत्वमेव।

ननु गुरुगृहवासः साम्प्रतं स्मृतिशेषतामापन्नः, कथं तर्हि समानतीर्थे वासीति सूत्रस्येदानीं प्रवृत्तिरिति चेत्, उच्यते। यथा चतुर्णां वेदानां प्रथममन्त्रोच्चारणेन स्वाध्यायाध्ययनं भवति तथैव समानशालायां युगपदध्यापकव्याख्यानादिश्रवणमेवेदानीं गुरुगृहवासत्वेन ग्रहीतव्यमिति सर्वमवदातम्।

सतीर्थ्य इत्यत्र कः समासः कर्मधारयो वा बहुव्रीहिर्वेति साम्प्रतं विचारपदवीमवतरति। सतीर्थ्यशब्दस्यैव सब्रह्मचारिणः सगर्भ्यसयूथ्यादिशब्दाः। तत्र पूर्वपदस्योदात्तत्वमवलोक्य Macdonell-महोदयेन तेषां बहुव्रीहित्वमास्थितम्। बहुव्रीहित्वस्फोरकत्वमात्रं प्रत्ययकृत्यमिति तदभिमतम्।

The suffix *-ya* is frequently added in Bahuvrihis; thus अन्योदर्य born from another womb (*udara*), दशमास्य ten months old, दीर्घजिह्व्य long-tongued, मधुहस्त्य honey-handed, मयूरशेप्य peacock-tailed, विश्वजन्य belonging to all men, विश्वदेव्य relating to all gods, विश्वाङ्ग्य being in all limbs, सगर्भ्य born from the same womb, सधन्य accompanied by gifts, सयूथ्य belonging to the same herd, सुहस्त्य fair-handed (beside सुहस्त), हिरण्यकेश्य golden-maned (beside हिरण्यकेश). MACDONELL, *Vedic Grammar*, pp. 152-153.

प्रायेणैषु शब्देषु बहुव्रीहिस्वर एव सन्दृश्यते। अत एव पाणिनिना 'सगर्भसयूथ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सनुतायन्' इत्यत्र नकारानुबन्धकः प्रत्ययो विहितः। सगर्भ-शब्दो यद्यपि संस्कृते नोपलभ्यते तथापि ग्रीक्भाषायां adelphos शब्दो वर्तते, स च सगर्भशब्दस्यैव ग्रीसीयं रूपम्।

सतीर्थ्यशब्दः स्वरविशिष्टेषु ग्रन्थेषु नोपलभ्यते, तथापि प्रत्ययस्वरेणास्यान्तोदात्तत्वं सिध्यति। अत एवात्र कर्मधारय एवाभ्युपगन्तव्य इति प्रतिभाति। एवं च पाणिनेः सूत्रमप्यर्थवद्भवति। ग्रीक्भाषायां *homo gastrios* (समजठर्यः, सोदर्यः) *homo-patrios* (समपित्र्यः) प्रभृतिशब्दा अपि कर्मधारययप्रत्ययान्ताः।

यच्च Boehtlingk-Wackernagel-प्रभृतिभिः पाश्चात्त्यैरुक्तम्—सतीर्थशब्दो वोपदेवस्य सम्मतः—इति, तत् प्रामादिकम्, मुग्धबोधव्याकरणे सतीर्थ्यस्यैव विधानात्।

नामरहस्यम् (११)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

घटोत्कचशब्दस्य को वार्थ इति पृष्टं केनचन जिज्ञासुना। उद्गताः कचा यस्य सः उत्कचः केशविहीनः। घट इवोत्कचः घटोत्कचः। यथा घटः सुमसृणः केशसम्पर्कविहीनः, तथा यः सर्वथा केशलेशशून्यः स घटोत्कच इत्युच्यते। यद्वा घटः शिरः उत्कचः केशशून्यः यस्य सः घटोत्कचः। तथा च महाभारत आदिपर्वणि—

घटो हास्योत्कच इति माता तं प्रत्यभाषत।
अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह॥ इति।

मुग्धबोधसंज्ञाविमर्शः (२)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

व्याकरणशिरोरत्ने वोपदेवेन धीमता।
व्यञ्जनानां विरामस्य फसंज्ञोद्भाविता नवा॥
विरामशब्दमध्ये हि रेफो देदीप्यते त्विषा।
विरामबोधकृज्जातं रेफस्यान्त्यमतोऽक्षरम्॥
अन्तर्भावः फकारस्य व्यञ्जनेषु व्यवस्थितः।
अतश्चापि फशब्दोऽयं व्यञ्जनप्रतिपादकः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शकुन्तलाविमर्शः (३)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

आचार्यः। मुष्टमिति पाठस्य साधुत्वं कथमपि साधयितुं शक्यते वा ?

ज्ञानानन्दः। आर्य, अष्टाध्याय्याम् "आदितश्च" [७।२।२६] इति वर्तते सूत्रम्। तस्य चार्थः—ये तावद् धातवो धातुपाठे आकारयोगेन पठितास्तेषां निष्ठायामिडागमो न भवति।

धीरानन्दः। आर्य, धातुपाठे मुष स्तेये इति पठ्यते। निपुणं खलून्विष्यमाणोऽपि तत्राकारो नोपलभ्यते।

ज्ञानानन्दः। मा मामन्तरा प्रतिबधान। सावशेषमासीन्मे वचः। 'आदितश्च' इत्यत्र चकारो देदीप्यते। अस्यैव चकारस्य बलेन ये तावद्धातवो निराकारानुबन्धकाः पठिताः सति प्रयोजने तेषामपि निष्ठायामनिट्त्वं स्यात्। अत एव "चकारोऽनुक्त-समुच्चयार्थः" इति काशिकायां वामनः।

धीरानन्दः। आर्य मदीयेन सतीर्थ्येनोपायश्चिन्तितः, अपायस्तु न चिन्तितः। आदितश्च इति सूत्रेण नित्यमेवेडागमः प्रतिषिध्यते। तत्र चकारस्यानुक्तसमुच्चयार्थता-स्वीकारेण मुष्टस्य साधुत्वेऽपि मुषितशब्दस्य सर्वजनस्वीकृतस्यासाधुत्वापातात् कवि-सम्प्रदायस्याकुलीभावः प्रसज्येत।

ज्ञानानन्दः। आर्य, प्रजापतिनेवापरेण वैयाकरणेन किं वा कर्तुं न शक्यते। अनन्तरवर्तिनो विभाषा भावादिकर्मणोः [७।२।२७] इति सूत्रात् विभाषापदस्यापकर्षः करिष्यते।

धीरानन्दः। पूर्वस्मात् सूत्रात् परस्मित् सूत्रेऽनुवृत्तिर्भवति इति बहुशः श्रुतम-स्माभिः। परस्मात् सूत्रात् कथं पूर्वस्मित् सूत्रे शब्दस्य समागमः स्यात् ? अपकर्षस्तु सपिण्डीकरणविषये एव श्रुतिपथं न आपतितम्।

ज्ञानानन्दः। "गरज बड वालाइ" इति वङ्गीयानामाभाणकः। "प्रयोजनं तावन्महती विपत्।" आपद्धर्मश्चायमपकर्षः।

धीरानन्दः। तर्हि सर्वत्रैव विभाषा प्रसज्येत।

ज्ञानानन्दः। व्यवस्थितविभाषाकल्पनेनातिप्रसङ्गो वारणीयः स्यात्।

आचार्यः। एतत्त्वतिमात्रं क्लिष्टम्। प्रकारान्तरेण समाधानं सम्भवति वा ?

ज्ञानानन्दः। अनित्यमागमशासनमिति जागर्ति परिभाषा। ये तावदागमाः शास्त्रेण विहितास्ते कदापि नैवागच्छन्ति इति तदर्थः।

धीरानन्दः। अत्र विकल्पः कथं सिध्येत् ?

ज्ञानानन्दः। अनित्यत्वेन किं वा साधयितुं न शक्यते ? (क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रवीन्द्रनाथस्य

स्पर्शमणिः

[श्रीफटिकलालदासेनानूदितः]

वृन्दावनेन्दोश्चरणारविन्दे
निधाय चित्तं करुणैकसिन्धुः ।
सनातनो भक्तकुलावतंस-
स्तस्थौ कदाचिद् यमुनोपकण्ठे ॥

कश्चिद्दरिद्रो द्विजवर्णलिङ्गी
समेत्य वेगेन पपात भूमौ ।
प्रक्षाल्य चक्षुःसलिलैर्गलद्भि-
र्जग्राह पादौ यमिनश्च तस्य ॥

उत्थाप्य तं प्राक् सदयं स वर्णी
पप्रच्छ विप्रं करुणावतारः ।
"किंनामधेयोऽसि कुतः प्रदेशात्
प्रपद्यसे मां च किमर्थमर्थी ॥"

प्रत्यब्रवीत्तं विलपंस्तदार्तो
"विलुप्तकीर्तेः कृतमेव नाम्ना
गौड़ेषु वासो बहुकायकष्टात्
प्राप्तोऽस्मि दिष्ट्या तव पादपद्मम् ॥

यन्मे बभूवाढ्यचरस्य वित्तं
दुर्दैवदोषात् सकलं विनष्टम् ।
या कर्मयागादिषु कीर्तिरासी-
ल्लेशोऽपि तस्या न हि विद्यतेऽद्य ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रनष्टलक्ष्मीं पुनराप्तुकामो
देवादिदेवं तपसा श्रितोऽहम् ।
स चैकदा दुःखनिशावसाने
मां स्वप्नयोगादिदमादिदेश ॥

'वृन्दावनं प्राप्य सनातनं त्वं
गोस्वामिवर्यं शरणं लभस्व ।
तस्यैव हस्ते तव वित्तलाभो
न्यस्तः स्थितो नास्ति तदन्यमार्गः ॥'

प्राणाः शरीराद् यदि यान्ति यान्तु
त्वगस्थिमांसं समदन्तु हिंस्राः ।
निधेरलब्ध्वाधिगतेरुपायं
स्थानादितो यास्यति नैव कायः ॥"

श्रुत्वा तदीयं वचनं स वर्णी
बभूव चिन्ताकुलचित्तवृत्तिः ।
यश्चीरवासाः स्वयमेव भिक्षु-
र्वित्तं द्विजाय कथमाप्नुयात् सः ॥

ततः स किञ्चिन्मनसा विचिन्त्य
प्रोवाच वाचं सहसा तमेताम् ।
"तेनादिदेवेन कृतोऽभ्युपायो
मनोरथस्ते सफलत्वमेतु ॥

मयैकदा तीरसमाश्रितेन
समुज्ज्वलः स्पर्शमणिः प्रपन्नः ।
सुरक्षितं न्यासमिवार्थिनोऽर्थे
तमद्य भद्र स्वकृते गृहाण ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तोऽथ तस्मै प्रभवो वसूनां
स्पर्शोपलस्तेन गतस्पृहेण ।
प्रत्यर्पितन्यास इवाप्तलोकः
स निर्वृतिं प्राप परां प्रहृष्टः ॥

लब्धोपलः सोऽपि फलं दिदृक्षुः
पस्पर्श लोहं मणिना च तेन ।
अहो विचित्रं पलकेन कालं
स्वर्णत्वमाप्तं वलवद् दिदीपे ॥

दिशां ततः स प्रचयेषु मत्तो
दधाव कृत्वा मणिलोहयोगम् ।
अनेन जातं क्षणकालमध्ये
तल्लोहजाताद्बहु जातरूपम् ॥

मनोरथस्याप्यविचिन्तनीयं
पर्याप्तवित्तं परिलभ्य कामम् ।
केनापि भावेन समाकुलोऽसौ
जगाम नद्यास्तटमेक एव ॥

तरङ्गभङ्गाहितशून्यदृष्टि-
स्तत्रैव किञ्चिन्मनसा विभाव्य ।
वेगादगाद् यत्र स भक्तवर्यो
नामानि कृष्णस्य जपन्नुपास्त ॥

निपत्य पादे पुनरेव तस्य
प्रोवाच विप्रस्तमुदारचित्तम् ।
विश्राणितः स्पर्शमणिस्त्वया मे
"लब्ध्वा मणिं यं न तृणाय मत्वा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याचे कणं तस्य न काचखण्डं
स्पर्शोपलाख्यं प्रसु हाटकानाम् ।"
उदीरयन्नेव वचः करस्थं
चिक्षेप रत्नं यमुनाम्बुगर्भे ॥

ततः स भक्तस्तमुवाच वाचं
"न मेऽस्ति चिन्तामणिमन्तरेण ।
मणिं द्वितीयं हृदयाद्बहिःस्थं
यच्छामि ते तं यदि रोचते सः ॥

अलोकसामान्यमचिन्त्यसत्त्वं
गृहाण चिन्तामणिनामजातम् ।
सङ्कीर्तितं तत् करतालतालै-
र्ददातु शान्तिं त्वदशान्तचित्ते ॥"

———

पारसीकभाणः

[श्रीकुञ्जन्राजः]

किंचिदूनपञ्चवर्षेभ्यः प्राक् पारसीकदेशेषु 'तहरान्'-नगरीस्थायां विश्वविद्याशालायां संस्कृताध्यापनं प्रारब्धं भारतीयप्रशासितृमण्डलान्तर्भूताद्विद्यावितरणमन्त्रिपदात् अयं जनो नियोज्य प्रेषितः । गतस्य च तत्र नूतनसंप्रदायानुवर्तिनीं जनताया आचाररीतिं दृष्ट्वा अस्मदीयसंप्रदायात् तस्या वैजात्यं चानुसन्धाय तामधिकृत्य भाणमेकं विरचयितुं मतिरजायत । तत्रत्यानां साहित्यरसिकानामपि कतिपयानां संस्कृतकाव्यरीतौ कौतुकं चाभूत् । उभयमप्येतत् प्रयोजनं मनसि निधाय सन्दर्भविशेषांस्तांस्तान् उपवर्णयन् विजातीयानि वृत्तानि च समाश्रयन् श्लोकाननेकान् निबद्धवानयं जनः । तेषां मध्ये कांश्चनाद्य उदाहरणरूपेण वाचकेभ्य उपायनीकरोमि ।

"तहरो"नति विपुलेयं
बहुविधजाज्वल्यमानविभवाढ्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नागरकेलिमनोज्ञा
मूलपुरी पारसीकदेशस्य ॥
गिरिरस्ति कोऽपि निकटेऽत्र नगर्यां
तपति प्रचण्डतपनेऽपि निदाघे ।
हिमसंवृतैरपहसन्निव शृङ्गैः
परतेजसामभिभवं निजराज्ये ॥
पट्टाम्बरैर्वेष्टितविग्रहाभि-
र्हसन्मुखीभिर्युवतीभिरत्र ।
कान्त्या स्वयोद्दीपितभूषणाभि-
र्मन्दीभवन्त्युज्ज्वलमार्गदीपाः ॥
उदारै र्नेपथ्यैर्मधुरहसितैरीक्षणशतै-
रमन्दैर्मन्दाक्षैरतिसरससंलापझरिभिः ।
हृदिस्थैराकूतैः प्रसभमवरुद्धैरिह गृहं
प्रविष्टानां यूनां हृदयमपहरन्ते युवतयः ॥
गृहीतकरपल्लवाः सरसमेव पार्श्वस्थितै-
र्निशासु युवकामुकैरतिमनोज्ञवेषोज्ज्वलाः ।
परस्परविजल्पितामृतझरीसमाप्लावितै-
रनङ्गरससंकुलां विदधते पुरीं योषितः ॥

पृच्छा

कश्चन जिज्ञासुः पृच्छति—

(१) ह्री ह्रीमिति सेप्टेम्बरसंख्यायां प्रकाशितस्य स्तोत्रस्य प्रथमचरणस्य पाठान्तरमुपलभ्यते वा ?

(२) ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः ।
सारस्वतो नरः पाठात् स स्यादिष्टार्थलाभवान् ॥

इत्यष्टमे श्लोके 'मौनी' 'पाठादिष्टार्थलाभवान्' इति 'विप्रतिषिद्धमिव प्रतिभाति। पाठेन मौनभङ्गः स्यादिति। किमत्र तात्पर्यम् ? इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरम्

(१) यथास्माभिर्दृष्टं तथात्र पाठान्तरमिदानीं नोपलभ्यते, कल्पयितुं तु शक्यते। ह्रीं ह्रीं ह्रीमेकबीजे इति पाठोऽत्र समीचीनः, उत्तरश्लोकानुरोधात्।

(२) अत्र विप्रतिषेधः कोऽपि नास्ति, पाठात् पूर्वं मौनमवलम्बनीयं पाठकाले तु मौनं त्याज्यमेव। यो वृथाभाषणशीलो न भवति स एव मौनीत्युच्यते।

इति मञ्जूषासम्पादकः।

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

आचार्यः (आङ्ग्लभाषामध्यापयन्)। वत्स, संपाठः पठ्यताम्।

शिष्यः। (पठति) He did good by stealth and blushed to find it fame.

आचार्यः। Stealth-शब्दस्य को वार्थः ?

शिष्यः। चौर्यम्, स्तेयम्।

आचार्यः। तर्हि He did good by stealth इत्यस्य को वार्थः ?

शिष्यः। तेन चौर्यं कुर्वता सम्यगेवानुष्ठितम् इति।

अन्यः शिष्यः। आर्य, तर्हि चौर्यमत्र प्रशस्यते ?

आचार्यः। न खलु त्वदर्थं मदर्थं वा चौर्य्यं प्रशस्यते। तेजीयसां न दोषाय।

द्रष्टा। (स्वगतम्) अवितथं खलूच्यते यथा गुरुस्तथा शिष्य इति। He did good by stealth इत्यस्यार्थः स निगूढं सत्कर्म परोपकारादिकं कृतवान्। न खलु डिण्डिममाहत्य सत्कर्माणि स्वानि समुद्घोषितवानिति।

पुस्तकपरिचयः

१। मेघदूतम्। सुबोधादिटीकासमन्वितम्। श्रीयतीन्द्रविमलचौधुरीकाव्यतीर्थेन संस्कृतम्। अन्वयवङ्गानुवादाङ्गलानुवादोपोद्घातसूच्यादिविभूषितम्। मूल्यम् अष्टौ रूपकाः।

२। मेघदूतम्। शाश्वतस्य कविप्रियया सनातनगोस्वामिनश्च तात्पर्यदीपिकया सनाथम्। अन्वयवङ्गानुवादाभ्यां युक्तम् पूर्वार्धमात्रम्। मूल्यं रूप्यकचतुष्टयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उभावेव ग्रन्थौ 3, Federation Street, Calcutta 9 इत्यतः प्राच्यवाणी-कार्यालयतः प्रकाशितौ।

विद्वद्वर्येण श्रीमता यतीन्द्रविमलचतुर्धुरीणेन बहून्यमुद्रितानि संस्कृतपुस्तकानि मुद्रणपथमवतार्य सुरभारत्याः समृद्धिर्विधीयत इति प्रायेण विदितमेव स्याद्वाचकमहाभागानाम्। यद्यपि मेघदूतस्य बहवष्टीका विराजन्ते तथापि भरतमल्लिकविरचिता मुग्धबोधानुसारिणी सुबोधातीव समीचीना। यद्यपि टीकेयं दक्षिणावर्त-मल्लिनाथादीनां व्याख्यानानां कथमप्यर्धासनमारोढुं न प्रभवेत् तथाप्यस्यां पूर्वटीकाकृतां मतानि बाहुल्येनोपलभ्यन्ते, अभिधानकोषाश्च नवनवाः समुद्धृता इत्यस्याः किमपि गौरवं वर्तते। चतुर्धुरीणमहोदयेन च निरतिशयेन परिश्रमेण परमेण च यत्नेन सम्पादितोऽयं ग्रन्थः। अत्र च प्रारम्भे षट्पञ्चाशत्पृष्ठसम्मित उपोद्घाते विविधा विषया विचारिताः, मेघदूतगत-श्लोकानां च पाठभेदाः प्रदर्शिताः। अतिमात्रमुपादेयोऽयं ग्रन्थोऽवश्यं संग्राह्यो रसिकैश्च छात्रैश्चाध्यापकैश्च।

यद्यपि सनातनकृता टीका तथाविधं वैशिष्ट्यं नावगाहते, अभिनवशाश्वतविरचितं च व्याख्यानं बहुषु स्थलेषु त्रुटितम्, तथापि मेघदूतस्य व्याख्या कस्य वा सहृदयस्य प्रीतये न भवति? आदिमषड्विंशतिश्लोकानां मल्लिनाथविरचिता सञ्जीवन्यप्यत्र सन्निविष्टा। चिरं स्वस्थस्तिष्ठत्वायुष्मान् श्रीमान् यतीन्द्रविमलश्चिरं चैतादृशग्रन्थसम्पादनेन सुरभारत्याः परिचर्यां विदधातु।

यज्ञतत्त्वप्रकाशः। श्रीचिन्नस्वामिशास्त्रिविरचितः। Government Sanskrit College, Calcutta 12 इत्यतो ग्रन्थकृतः सकाशाल्लभ्यः। मूल्यं रूप्यकत्रितयम्।

अहो सुमहदेव सौभाग्यं छात्राणां यत् कर्मकाण्डनिष्णातेनच्छात्रसंसदि लब्धकीर्तिना पण्डितप्रवरेण चिन्नस्वामिशास्त्रिमहोदयेन यज्ञतत्त्वप्रकाशोऽयं प्रकाशितः। अत्र प्रथमे भागे इष्टियागानां द्वितीये च सोमयागानां विवरणं सरलया सुबोधया च संस्कृत-भाषया वैशद्येन सन्निविष्टम्। तृतीये भागे राजसूयाश्वमेधादीनां विवरणमुपलभ्यते। अन्ते च सन्निविष्टानि अग्निहोत्रस्य दर्शपूर्णमासादीनां, वारुणप्रघासस्य वेद्योश्चित्रे अन्यानि च चित्राणि ग्रन्थस्योपयोगं वर्धयन्ति। अवश्यमनुशीलनीयमिदं पुस्तकं छात्रैश्चाध्यापकैश्च यज्ञतत्त्वमवबुभुत्सुभिश्च। मद्रास् ल जार्नाल प्रेसे सम्मुद्रितस्यास्य मुद्रणसौष्ठववर्णनं तीर्थोदकस्य पावित्र्यवर्णनमिव पुनरुक्तं स्यात्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टम्

मायाजालम्

[स्वर्गतायाः पण्डितायाः क्षमादेव्याः]

अस्ति किल रमणीयोत्तुङ्गशैलशिखरे लोकलोचनानन्दप्रदे गुर्जरावनिमण्डले विराजमानमाबुनाम-पर्वतावृत ग्रीष्मविहारस्थानम्। व्यराजत तत्र गोवर्धनोद्धारिणो दारुणदानवविदारिणो भगवतः सृष्टिसुन्दरीधम्मिल्लसुवर्णचूडायमानशिखरमतिसुन्दरं देवमन्दिरम्। परितो देवागारं व्यलसन्नानाविधा विटपिनः सुगन्धपुष्पाढ्याः। देवालय-स्यैकस्मिन् विविक्तकोणे मूकबधिरः कश्चिद्दैवज्ञो नित्यमुपाविशत्। विलक्षणान्तर्बोध-सम्पन्नस्यास्य सविधे नानादिग्भ्यो बालपुरुषयोषितां समूहः स्वस्वभाविदैवगतिं जिज्ञासुः समायात्। नैसर्गिकवैक्लव्ये सत्यपि मूकाभिनयेनैवात्मेङ्गितं जनाय बोधयामास स्फुटं स ज्यौतिषिको विचक्षणः। स सत्य-गवेषी देवागारस्य पृष्ठभागवर्तिनि विजने तमो-मयप्रकोष्ठे रजन्यां ध्यानजपादिसाधनैर्भगवन्तमाराधयन् दिवा स्वाश्रितजनमुपास्ते स्म।

अथैकदात्र समाययुश्चतस्रो वनिताः। दैवज्ञेन निर्दिष्टेषु पृथक्पृथक्स्थानेषु प्रमदा इमे गवेष्यमाणस्यात्मनः प्रियजनस्य नामधेयं प्रसूनैश्चित्रयितुमादिश्यन्त। अतस्ता देवमन्दिर-स्याङ्गने बकुलपुष्पसमाच्छादिते स्वस्वदयितनामविरचनाय पर्याप्तानि प्रसूनानि सञ्चित्य प्रदोषे सुरभिकुसुमानि जिघ्रन्त्यो विटपिनामभ्यन्तरे शब्दायमानं मरुत्सूत्कारं शृण्वत्यो विश्रान्तिसुखमुपाभुञ्जत। देवतायतनात्पुरोहितानामादौ स्तोत्रगानमश्रावि ततश्च घण्टातालभेरीमृदङ्गवीणादीनामाकर्णि मन्द्रस्तारोऽपि श्रोत्रमनोहरो निनदः।

अथाङ्गनासु चतसृषु संजाताः परस्परमालापाः। तास्वेकतमा ज्येष्ठा दयानाम्नी निजगाद। "प्रत्येकयाऽस्मासु यथाक्रममात्मीयकथा निवेद्यतामिति। कनिष्ठा तासु मुग्धाभिधाभ्यधात्। "भवतु। रम्यतमे रजनिसमयेऽस्मिन् परस्परवार्ताश्रवणेन प्रायोऽ-स्मदीयव्यथा शिथिलभावमापद्येत, सर्वासामस्माकं किञ्चित्परिसान्त्वनमपि भविते"ति। "तत्प्रारभ्यतां कनिष्ठया भवत्या स्वकथा" इत्यन्याभिर्युगपदभ्यर्थिता मुग्धा स्वचरिताख्यानं कथयितुमुपाक्रमत।

मुग्धा। गुर्जरदेशे क्वचित्पयोनिधेस्तटपरिसरवर्तिनि दुमसनामनि पुरे मम तातपादा न्यवसन्। ते च यथासंप्रदायं वंशपरंपरारूढ्या प्रवर्तिताः प्रतीता अभूवन् यदुद्वाह एव प्रयोजनं प्रमदानां जीवनस्येति। प्राहुः स्म च पठनलेखने अन्तरोचशिक्षणं नावश्यकं तासामिति। अतोऽनतिक्रान्तशैशवायामेव मयि कुमारं कश्चिदनाथ-बालाश्रमादवृणोन्मम जनको मत्पाणिग्रहणोद्देशात्। षोडशवर्षवयस्केन च साधर्मनेन यूना यथाविधि मे विवाहवाङ्निश्चयो व्यधायि। दिवं गतायां मे मातरि क्वचित्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिद् युवकोऽयमस्मदुपवने निभृतं मयामिलत्। अस्मत्सदनमभितस्तथाभूतमुद्यानं रमणीयं तया व्यलसन्निजसौन्दर्येण निर्जितनन्दनवनं यथा तापसस्य विषयव्यावृत्तस्यापि चित्तमभिनन्दयेत्। उद्यानेऽस्मिन् नानाविधशाखिनः कदलीनारिकेलाम्रदाडिमीनारङ्गा-क्षीरपनसादिका व्यराजन्त। पुरातनवटवृक्षाणामधो विश्रान्तिसुखोपभोगार्थं वेद्यः कल्पिता आसन्। सर्वतः कुसुमलतिकाः समुल्लसिता अनुत्तममामोदं प्रासारयन्। अथैकदा सायमावामुपवनेऽस्मिन् पिककूजननादिते निभृतं परस्परसमागमादमन्दानन्दसुखमुपभोक्तुं मिलितावास्व। धवलयति वसुधातलं हिमदीधितौ करैः सुधाधवलैः, बकुलमल्लिकादि-सुमनःसु सौरभमातन्वत्सु, मन्दं मन्दं वाति मरुति, यामिन्यां सौन्दर्यशालिन्यां वृद्धिं गतः प्रमोद आवयोः परां कोटिमारुक्षत्, व्यस्मरं साकल्येन पितुः शासनमुपदेशं च धात्रीदेव्या निद्रां च। प्रथमचुम्बनं वल्लभस्य मे राकायां मनोहारिण्यां तस्यां पुलकिताङ्गयष्टिं मां व्यमोहयत्तराम्। नैकवर्षेषु व्यतीतेष्वपि तत्स्मरणेनावर्णनीयभावो मय्युत्पद्यते, इदानीमपि रोमाञ्चमञ्चति च मे शरीरम्।

समाप्ताध्ययनः कुमारोऽयमष्टादशवर्षदेशीयस्तातपादैर्मे पाश्चात्त्यदेशमुच्चशिक्षणो-पलब्धये प्रेषितोऽभूत्। समाप्तकार्यमात्रः शीघ्रं निवर्तिष्ये भारतमिति प्रतिश्रुत्य स परदेशं प्रतस्थे। अलेखीत्सोत्साहं युवाऽसौ प्रतिसप्ताहं परं नचिरात्पत्रव्यवहाराद् व्यरंसीत्। अतिचिन्ताकुलो जनकदेवो मे तन्त्रीसन्देशान् प्रेषितवान् परं नोपलभ्योत्तरं चिराय नैराश्यात्तत्पुनर्दर्शनस्याशां जहौ। कियत्यसह्यव्यथा सोढा मया तत्समय इति वर्णयितुं न प्रभवेत्कोऽपि जनः। प्रियंकरस्य पुनर्दर्शनसुखमाशु मे भवेदित्येकयैव चिन्तया गृहीतान्तरात्मा स्थितास्मि। तदारभ्य च गतभर्तृकयेव जीवनयात्रा नीतासीन्मया, परं स पुनर्मत्सविधे ध्रुवमायास्यतीति बद्धाशयाऽवास्थिषि। दैवज्ञोऽयं निःशब्दोऽपि तथ्यं बोधयिष्यति माम्। इति समाप्तात्मकथाया युवत्याः स्वरो मन्दीभूय यवनपुरो-हितस्य सायन्तनाह्वानस्य भक्तेभ्यः प्रतिध्वनिपर्यवसानमिव सस्वने।

अथ तिसृष्वन्याङ्गना कृशाङ्गी श्यामवर्णा प्रियदर्शना सामि-पिहितमन्दाक्षी शोकाकुल-मन्दस्वरा मन्दानाम्नी व्याहरत्। "अयि मुग्धे! तव प्रेमवल्लरी सौन्दर्यामोदविषये हेपितनन्दनदिव्यलता स्वप्ने दृष्टेवादृश्यतां गता विना दंशं शोकभुजङ्ग्याः किल।" इत्युक्तवती मन्दाऽन्याभिस्तिसृभिर्नोदिता निजव्यथां निवेदयितुमारेभे।

मन्दा। महानगर्यां मोहमय्यां चिरात्कृतवासाभ्यां पितृभ्यां साकं न्यवसम्। प्राक्तनरूढ्या संवर्धिता ताभ्यां बाल्ये प्राथमिकपाठशालायां कृताध्ययनाऽसम्। उच्च-शिक्षणविरोधी जनको मेऽब्रवीद् यदनिष्टमेव खलु स्त्रीणामत्याभ्यासाज्जायेतेति। तथा-नुष्ठितेऽज्ञप्रायाऽहं स्थिता निखिलान्यहानि च बन्दीकृतेव सदने। कांक्षनाप्तान् विना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कोऽपि पुरुषो मे दृष्टिगोचरोऽभूत्। सामाजिकमण्डले कस्मिंश्चिन्मम सोदराणां केनचित् सुदर्शनेन तरुणेन यदृच्छया परिचयोऽभूत्। कृतार्धपृथ्वीपर्यटनोऽयं युवा वर्णेन गौरो विशाललोचनः शिष्टाचारोऽधिगतपाश्चात्त्यसंस्कारः स्वदेशाचारविद्वेषी विदेशानभिज्ञानान्मदीयबान्धवान् भृशमाचकर्ष। तेषु तेषु पाश्चात्त्येषु देशेषु वाणिज्य-व्यवहारे समधिगतदीर्घानुभवेन मया वाणिज्यनियोगोऽन्विष्यत इत्यकथयत् स ममाग्रजान्। समयेऽस्मिन् व्यवहारदक्षं सहकारिणं मार्गयन्तो जनकचरणा मे युवानमिमं स्वकार्यालये द्वतं न्ययोजयन्। अथ गच्छति काले सहकारिणोऽस्य वैवाहिकादिविषयानधिकृत्य पुरातनरूढेररुचिर्मत्पितृपादैरवेदि। तथा हि संप्राप्तपरिणयवयसि मयि योग्यवरगवेषणपरौ पितरौ मेऽभूतां परं मदीयकुरूपताकारणान्न कोऽपि कुमारो मामुद्वोढुं प्रत्यपद्यत। पर्यन्ते चिन्ताकुलो मे जनिता निजसहकारिणः सविधे मद्विवाहविषयमधिकृत्य समुदाहरत्। क्रमेण दैववशान्नचिरात्तरुणोऽयमदृष्टपूर्वामपि मां परिणेतुं प्रतिपेदे। विस्मयस्य परां कोटिमारूढः प्राप्तस्वर्गद्वारमिवात्मानममन्यत जनको मे। अथ स प्रहर्षपूरप्लावितः सुमहासंपत्तिभागिनीं मां विधाय युवानमेकमेव विधायकं व्यवास्थापयत्। अहं च परितुष्टा वशंवदा मदीयभाविपतिं तोषयितुमयतेतरां प्रत्यहम्। अथ निर्वर्तिते विवाहे यथाविधि भर्ता मामालोक्य शयनागारे प्रथमतो रजन्यां न बभौ भग्नाशो वातिबीभत्सितो वा। अहं तु तं वीक्ष्य मदीयहर्षोद्रेकं महदाश्चर्यं च गोपयितुं न प्राभवम्। पाद-नीरजयोरस्य प्रणिपत्याहमनुरागनिर्भरेण प्लावितात्मा प्रमोदाश्रुपूरेण तावक्षालयम्। स च किमप्यनुक्त्वा मामुत्थापयामास तूष्णीं चावास्थिष्वहि निशायामावाम्। अपाङ्गदृशा लावण्यजितकुमारं कुमारं दृशं दृशं पुलकिताङ्गयष्टिर्विस्मयसागरे न्यमज्जम्। क्व मदनमिश्रता क्व च तस्य वैचक्षण्यम्, क्व मत्कुरूपं क्व च तस्य सुरूपातिशय इति ध्यायं ध्यायं गाढं तमालिङ्गितुमुत्कण्ठिताभवं परं मत्कुरूपेण स जुगुप्सितः स्यादिति भिया कम्पमाना नतानना निःशब्दा च स्थिताहम्।

इत्युक्त्वा सहसेयं गद्गदस्वरा व्यरमत् क्षणं ततश्च कथानिवेदनमुपाक्रमत मन्दं मन्दम्। "अथ तस्यामेव नगर्यां पयोनिधेस्तटे साकं दयितेनात्यल्पनिलये न्यवसमहम्। आदौ भृशं सम्भावितासं तेन। वसनाभरणाङ्गरागादिप्रसाधनानि परिधानोचितो-पानत्पादुकाश्च स एवावृणोन्मदर्थम्। सहर्षं सगौरवं सर्वमनेन वृतमुररीकृतवत्यहम्। अपरिहितपूर्वपरदेशीयोपानत्काया मे पादौ संपीडितौ बभूवतुर्भृशं परं पतिं परितोषयितु-कामया सर्वा वेदनाऽसह्यत मया। प्रत्यहं सामाजिकक्रीडामण्डपं स मामनैषीत्। विवाहात् पूर्वं गृहाद्बहिर्निर्गमानभ्यासवशात्सामाजिकव्यवहारानभिज्ञां मामाधुनिकशिष्टा-चारमचिरेणाशिक्षयत्पतिर्मे। पाश्चात्त्यदेशाचारानुकारिणोऽस्य मतादिभिर्वशीकृतासमचि-

CC-0. In Public Domain. Gurukul-Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राक्किल। अथ क्रमेण प्रासविष्यर्भकमहम्। शिशुवर्धनादिकार्यबाहुल्याद् विहाराय सह तेन बहिर्गमनं परित्यज्य स्थितवत्यहमखिलाहो मन्दिरे। क्रमेण मदवस्थितिं न केवलमवागणयत् परं डिम्भमपि नौ कृत्स्नशः स उपैक्षत। दिवा कार्यालये व्यापृतः स न न्यवर्ततालयमामध्यरात्रम्। प्रतिदिनमीदृशविलम्बस्य कारणं प्रष्टुं तं न काप्य-धृष्णवमहम्। अथैकदा प्रत्यागत्य गेहं सूर्यास्तमयात्पूर्वं ससंभ्रममभ्यधात्, इतः सत्वरमेव गन्तव्यं मया। मदीयपितृपादा मरणोन्मुखाः सन्तीति समुपलब्धवृत्तस्तत्सविधे गन्तुं प्रवृत्तोऽस्मि। पितुर्गेहं समापन्नमात्रस्त्वां पत्रं लेखिष्यामि। इति मुहुर्मुहुः प्रतिश्रुत्य सदनं निसृष्टवान् मत्प्राणेश्वरः। न कदापि निजपितरावधिकृत्याक्षरमपि प्रोक्तमासीत्पूर्वं तेन। अथ प्रत्यहं तत्पत्रं प्रतीक्षमाणा सोत्कण्ठं सोत्साहमहमवास्थिषि। परं नासीन्नैराश्यं विना फलं प्रतीक्षमाणाया मे। तस्य वृत्तविशेषोपलब्धये मातापितृचरणैर्यथाशक्ति प्रयेते परं नैष्फल्यमेव प्रापुः प्रयत्नास्तयोः। व्यतीता इदानीं पञ्चषाः संवसरास्तस्य निर्गतस्य गृहात्। विना परेशं न कोऽपि मानुषो जानाति क्व वर्ततेऽसौ किं संजातं तस्य वेति। तथापि दैवेन प्रेरिताहमत्र समायातास्मि। दैवज्ञोऽत्र तथ्यं कथयेदिति। ओम्। इति मरुद्विधूतसुरुनामकतरुविशेषस्य रुतमिव मन्दायाः स्वरः क्षीणक्षीणो भूत्वा श्रुत्यगोचरतां ययौ। क्षणमात्रं यावदत्र विलक्षणनिःशब्दता विराजते तावत्सर्वासु तासु लावण्यमर्दितानङ्गजाया सरोजनयना सुललिताङ्गयष्टिः सुवर्णवर्णा मोहिनीनाम्नी तृतीयाङ्गना व्याहरत्।

"अयि युवामुभे अपि दैवेन प्रतारिते स्थः खलु। मदीयविषये त्वहमेव दोषास्पदीभूतास्मि।" इत्युक्त्वा मोहिनी निजचरितमाख्यातुं प्राक्रमत।

"कस्यचिच्छ्रेष्ठिनो महानगरनिवासिनः कुले मां प्राप्तसम्भवां पितृभ्यामतीव-लालितां युवानो बहवोऽहमहकियोद्वोढुं प्रार्थयन्त मदीयजनकम्। 'धनिकस्यात्मजा धनिकायैव देये'ति कृतनिश्चया नवयौवनचुम्बितमात्रां मां पितरौ मेऽधिकवयस्केन केन-चिद्धनाढ्येन मौक्तिकवाणिजेन पर्यणाययताम्। वाणिज्यव्यवहाराय भर्ता मे मुहुर्मुहु-र्भूतलेन्द्रभवनायितां प्यारिसपुरीमभ्यगच्छत्। अथैकदा च सह तेन नगरीमेना-मगमम्। महानगरीयममरावतीसौन्दर्याधरीकारिणी, वसुधातलगतनिखिलनगरीललामभूता विविधरम्यतमोपवननिचयविजितनन्दनकाननरामणीयका, कूजन्नानाविधसुन्दराण्डज-नीलोत्पलविलसितजलाशयसुरमातिशया, विशालराजमार्गसंगमभूतविजयतोरणा, आर्क-दत्रियोम्फनाममण्डिता, शान्झलीझेनामकदेदीप्यमानविस्तीर्णराजमार्गविराजमाना, निखिल-महीतलदेशीयाश्रयभूता, नाट्यसङ्गीतनृत्यचित्रशिल्पादिकलाकलापधाम, असंख्यबुलेवार्डा-ख्यमहावीथिसंगतजनसमूहस्वरगुञ्जिता, नोत्रदाम-मादूलेन-साक्रेकराद्यद्वितीयदेवतालयशिल्प-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौन्दर्यसमलङ्कृता, विपणिवातायनविरचितरुचिराम्बरजनहैमपात्ररत्नखचितालङ्कारादि-भूषिता मां व्यमोहयत्तराम्। विद्यतेऽत्रैव विख्यातमार्गो रुलापेनामको नैकोत्कृष्टभोजन-गृहसम्पन्नः। अत्र प्रतिरात्रमावामाहारमुपभुज्य यावन्निवासं प्रत्यावृत्तौ तावद् भर्ता मे विसृज्य मामेकाकिनीं गृहात्पुनर्निर्याति स्म बहिश्चाप्रातरास्त। स्फुटमेव स्याद्भवतीभ्यो यद्वसना-भरणादिभिर्मामपूरयदसौ न तु प्रेम्णा। अतः प्रणयिनः प्रेमनिर्झरोत्सेको न मया तन्निकटेऽनुभूतः। एष दैनिकक्रमो भर्तुर्विलक्षणः समुपाक्रमत प्रत्यहम्। पर्यन्ते चार्तकि मयास्य चिरादनुष्ठितदुराचारस्य कथा। अथैकदा भोजनावसरे कश्चित्पत्रवाहकः पत्रमेक-मानीय हस्ते मम पत्युः समर्पितवान्। पठित्वाशु लेखमिमं विवर्णवदनः सहसाऽऽसनादुत्थाय "प्रतीक्षस्व क्षणमात्रं मां शीघ्रमेव निवर्तिष्ये" इति प्रतिश्रुत्य मामेकाकिनीं भोजनागारे विहाय ससम्भ्रमं निर्ययौ। तमर्धयामं प्रतीक्षमाणा तत्रैव जोषमुपविष्टासम्। परं वञ्चकोऽयं न प्रत्यागात्। अत्रान्तरे यथा यथा भोजनार्थं जना अधिकाधिका आययुस्तत्र तथा तथा मम पत्युरनागमनादुद्विग्नाभवम्। अस्मत्परिषेवितभोजनस्य धनप्रदित्सया धनकोशमात्मनो यावदपावृणोमि तावत्सेवकाय पारितोषिकप्रदानाय पर्याप्तमपि धनं तत्र नास्तीति नितान्तं लज्जिताभवम्। अथासीद्दिष्ट्या तरुणो भारतीयः कश्चित्समीपवर्तिभोजनफलकसविधमाहारं भुञ्जानः। समानदेशीयोऽयं प्रत्यहमदर्शि मयात्र भोजनालये। प्रसङ्गेऽस्मिन् विलोक्य संभ्रान्तां मां शीघ्रं स मदन्तिकमुपेत्य साहाय्यं चिकीर्षुर्ममानुज्ञामयाचत। उपकृतास्मि भवद्भिरित्युक्तो मया नतशिरसा भोजनमूल्यं प्रदाय गृहस्वामिने मन्निवासं सादरं मामनैषीत्। तद्दिनादारभ्य दर्शनीयशरीराकृतिर्दृढाङ्गो गौरवर्णस्तरुणोऽसौ मया प्रतिदिनं भोजनालये ऽमिलत्। नचिरात् परिचयश्चावयो र्वृद्धिं गतः। तदनु विहारभूमौ रम्योपवने वा यथासङ्केतं परस्परसंगतिसुखमन्वभवावावाम्। मिथः संभाषणसहवासविनोद-क्रीडादिना प्रेमबन्धो नौ नचिराद् गाढोऽभवत्। अथ मासाभ्यन्तरे यद्यदासीन्मत्सविधे तत्सर्वमपि संगृह्य प्रणयिनानेन सार्धमिजीष्टदेशं प्रति निभृतपलायनमकरवम्। प्राप्य तत्र कस्याश्चित्समुद्रतटवर्त्तिन्यामविख्यातग्रामटिकायामावाममन्दानन्दतुन्दिलौ मासषट्कं न्यवसाव। सेर्ष्यं च सासूयं च तरुणोऽयं मां चकमेतराम्। निरतिशयप्रेमोद्रेकः प्रियङ्करस्य क्वचिन्मयि भयमजीजनत्। तथा हि प्रेमशङ्कास्य तत्प्रेमापेक्षयापि बलीयसी बभूव। क्वचित्स प्रेमाशङ्काशीलोऽकारयदात्मानमेतावद्धास्यास्पदं यत्तस्योपहासार्थमेव तं पीडयितुं प्रवृत्ताभवम्। अथैकदाम्बुनिधे रोधसि स्नानार्थं याते तस्मिन् सुहृदा केनचित्कैरोनामिकां राजधानीं प्रति यामीति संदेशपत्रं लिखित्वा मन्दिरान्निरगमम्। सर्वमिदं चेष्टितं विनोदार्थमेव व्यधायि मया। परेद्यवि प्रेमनिलयमावयो र्यावन्निवर्तेऽहं तावत्सदनं तदनाथीभूतमवालोकयम्। अस्मदरबीस्थानदेशीयसेवको मदतर्कितनिर्गमजन्यविप्रलम्भे-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाभिभूतस्य कामुकस्य मे नैराश्याग्निज्वालामज्जनं मह्यं न्यवेदयत्। अथानुतापानल-सन्तप्तया मया सर्वतस्तमन्विष्यन्त्या नैराश्यमन्तरा फलमन्यन्नोपालभ्यत। पर्यन्ते गत्यन्तराभावात्स्वदेशं पुनरागमम्। मत्प्रत्यागमात्प्रागेव हन्त पितरौ मे किलापरिमित-सम्पत्तिभागिनीं मां विधाय दिवं गतौ। परं धनसम्पन्नाया अपि मे सुखलेशोऽपि न विद्यते। विनानुरागं हि प्रणयिनः प्रमदाया जीवनं व्यर्थमेव खलु। सर्वथा शून्यतैव प्रतिभासते मे, वार्धकं चासन्नप्रायम्।"

इति कथयन्त्यास्तस्याः स्वरो यः पूर्वं स्फुटो निश्चितश्चाश्रावि स इदानीं शिथिलीभूतः शनैः शनैराकाशे विलीनतां ययौ। अथ ज्येष्ठा तासु योषित्सु दयानाम्नी व्याहरत्। "अयि कथं नाम वृद्धा भवेस्त्वम्? वयसाहं ज्यायस्यपि प्राणनाथस्य मे संदर्शनपिपासया व्यथितास्मि।" इत्याख्यायाङ्गनस्य समीपवर्तिनः स्तम्भस्य पृष्ठभागे विलीय पुनर्दृश्यतां यदा गतासीत्तदा प्राप्तरूपान्तरा सा बभौ। तदीयसान्द्रमेचककेशकलापस्य स्थाने धूसर-वर्णा विरलविरलाः केशतन्तव एवासञ्छिरसि तस्याः। तदाननाकारो निम्नभाग-निमग्नोऽभून्निस्तेजश्च तन्नेत्रयुगलम्। अथ योषितोऽन्यास्तस्यां बद्धदृष्टयः काष्ठविग्रहा इव विस्मयाज्जडीकृता इव स्थिताः। क्षणोत्तरं निजकथानिवेदनमुपाक्रमत दया।

दया। कस्याश्चित्प्रथिताया नट्याः कुले गृहीतजन्माहमासम्। मदीयगानशिक्षकं प्रवयसमन्तरा न केनापि पुरुषेण व्यवहारं मेऽनुजज्ञौ प्रसूर्मे। षोडशवर्षकल्पाऽभवं यदा मदीयाम्बा तदा बहुभिस्तरुणैर्धनाढ्यैः साकं कुभोगार्थं मच्छरीरसमर्पणसन्धानं कर्तु-मारब्धा। परं गणिकाजीवनमसहमानाहं नैसर्गिकत्रीभत्सया तन्मनोरथानुवर्तन-पराङ्मुखी सनिश्चया स्थिताऽसम्। तथापि मत्संकल्पमविगणय्य केनचिद्धनिना क्षेत्रपतिना सार्धं मद्देहविक्रयव्यवहारः समपादयत तया। अथावयोः प्रथमसंगमात्प्रागेव मातुरालया-न्निभृतं पलायिताहम्। अथ पुरात्पुरमटन्त्या दीनदीनाया मे वार्तां निशम्य पुरोहितः कश्चिद्दयालुरार्द्रीभूतो मां स्वगृहं नीत्वा प्रदायाश्रयं च पुत्रीनिर्विशेषमपालयत्। दश वर्षाणि महानुभावेनानेन करुणानिधिना कन्येव लालिता स्वेनाध्यापिता च यथाशक्ति पयोनिधेस्तटवर्तिनि ग्रामे कोंकणावनिमण्डलस्थे कस्मिंश्चित्तस्यालये सह तेन सुखमध्य-वसम्। मामन्तरा नासीदन्यः कोऽपि तमुपासितुम्। प्रसूतिकाले हि तद्गृहिणी विंशतिवर्षीया सार्भका कालवशं गतासीत्। न चान्यामुपायंस्त भूसुरवरोऽयम्। अथ गच्छति काले समारूढनिर्भरयौवनां मां परिणाययितुं सुतरां प्रायतन्त पितृपादा मे, परमाकर्ण्य कर्णपरम्परया मम संभवं न कोऽपि तरुणो मत्पाणिं ग्रहीतुं प्रत्यपद्यत। हृदयं च विव्यथेतरां पूज्यतमपितृदेवस्य दर्शं दर्शं माम्नूढां प्रतिवर्षं वर्धमानां च वयसा। परं सर्वापेक्षया बलीयस्याशेति मद्विवाहविषये सप्रत्याशोऽवतस्थे स आजीवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिक्रान्तषड्विंशतिवर्षायां मयि पितृपादा दिवं गता विसृज्य मे स्वार्जितं सर्वमेव वित्तमालयं च। ततः परं विलुप्तैकावलम्बनाहं चिरं पितृचरणानां निधनं विलपन्ती नामशेषाणां तेषां स्मृतिं पूजनीयां हृदि निरन्तरं दधाना तन्मन्दिरे न्यवसमेकाकिनी। अथैकदा सायं समुद्रतटे शतपदीं कुर्वाणा गण्डशैले शयितं कञ्चिन्मूर्छाभिभूतं युवानमद्राक्षमहम्। सोऽयं गौरवर्ण आयतललाटो दीर्घबाहुर्दृढकायस्त्रिंशद्वर्षदेशीयः प्रविलुप्तसंज्ञो म्लानमुखो मन्दमन्दमश्वसीत्। यावत्तदीयगण्डस्थलं स्पृशामि तावदपूर्वविविधमिश्रभावनातरङ्गाभिभूता भवाम्यहम्। चिराद्विनष्टोपलब्धबालका प्रसूरिव परितोषस्य परां कोटिमारुक्षम्। तदीययौवनचुम्बितमाननमालोकयन्त्या मे वक्षःस्थलं झञ्झावातेन प्रोच्चकैरुत्क्षिप्तमिव सरभसमस्पन्दत। अथ स केषाञ्चिन्मत्स्यजीविनां साहाय्येनानीयत मद्गेहम्। "कल्लोलमालिकाभिः प्रहता नौका निशि क्वचित्सागरस्याम्भस्यमज्जत्। दैवगत्या तु तरुणोऽयं समुद्रतीरभूमिमागमत्प्रभाते" इति तैर्निवेदितं मे। अथ त्रिघटिकोत्तरं लब्धसंज्ञस्यास्य स्मितमस्मरणीयं मे न्यवेदयत्प्रभूतवस्तुजातम्। तदनु स कियतश्चिद्विसान् सामिमूर्च्छादशायामवतस्थे। क्रमेण च प्रकृतिमापन्नोऽभाषताल्पमेव। साम्रेडमनुयुक्तोऽपि मया स्वपूर्ववृत्तान्तं परिपूरयितुं कुतूहलं मे निवेदयितुं न स प्राभवत् स्मृतिभ्रंशात्। तत्पारतन्त्र्यादधिकाधिकं तस्मिन् स्नेहबद्धाभवम्। कदाचित्सम्भ्रान्तमनाः स्मृतिफलकात्प्रच्छन्नाधिं परिमार्ष्टुं स यतते स्म। अथ गच्छत्सु मासेषु मामवधातुमारब्ध। मदीयवसनाभरणनयनाञ्जनरञ्जितपाणिरुहरागादिकलापस्तद्दृष्टिविषयोऽभूत्। ततस्तस्मिन्प्रेमाङ्कुरोदयलक्षणान्यपश्यम्। तदवलोकनेन सुतरां मनसिजशरविद्धेव रोमाञ्चिताङ्गी स्वान्तर्भावविकारमगोपयमहं सप्रयत्नम्। सोऽपि पृथग्भावमाश्रित्य चिन्तापरो नित्यमास्त। अथैकदा सायमुद्याने विहरतोरावयोरवादीत्तरुणोऽसौ "गन्तव्यमिदानीं मयेतः" इति। वचस्तस्याकर्ण्य सुतरामवदीर्णहृदयेव विकम्पितगात्रा विषण्णान्तरात्मा क्व प्रस्थास्यते त्वयेत्यवोचम्। "यत्र कुत्रापि। अलं चिन्तया मद्विषये।" इति सशिथिलवचनविन्यासं सशोकं च स प्रत्युवाच।

इत्थं ब्रुवाणं तम् परिसान्त्वयितुमालिङ्गितुं च भृशमैच्छम्। परं लज्जया तदप्रसादभियाऽऽवरुद्धा क्षणं जोषं स्थित्वाऽप्राक्षमहम्। "किमिति निर्गन्तुमुद्यतोऽसि। अपि नास्ति क्षेमं तवात्र?" इति पृष्टः कृतज्ञतासूचकं हस्तविक्षेपं कुर्वाणो निरुत्तरोऽवतस्थे तरुणः। "स्ववृत्तिं पुनर्ग्रहीतुमिच्छसि प्रायः?" इति मयानुयुक्तः प्रत्युत्तरमदत्त्वा सकन्धरकम्पं तूष्णीं प्रस्थितः। "किं बान्धवानाहोस्विद् दिदृक्षुरसी"ति पृष्टः शिरो विधूतवान् पुनः।

अत्रान्तरे धवलयता वसुधातलं धवलकरैः धवलरश्मिना प्लावितमुद्यानमिदम्। चरणपथेषूत्पलखण्डानि देदीप्यमानान्युपला इव विलक्षणभावोत्सेकं मय्यजीजनन्। आसीत्स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव क्षणो निश्चायको मज्जीवनस्येति प्रतीताभवम्। शनैः सभयं तत्करमादाय समार्दवं तं परामृशम्। सविश्वासं सविनयं चान्वमंसि तेन मां ग्राहयितुं हस्तमात्मनः। अहं तु क्वचिदुत्कण्ठिता क्वचित् संभ्रान्ता, क्वचित्कम्पमाना, क्वचित्संत्रस्ता कांश्चित् क्षणान् जोषमवास्थिषि। ततो निजपारतन्त्र्यमाविष्कुर्वन् बभाषे सः। "अहो भवत्याः महत्तमसौजन्यभारनतोऽहं किल। न खलु भवत्याः प्रेमपात्रं भवितुमर्हति जनोऽयम्।" इत्युदीरिते वचने तेन मदीयकरो निःसह इवागलत्तदीयहस्तात्। अभाषि च मया "भवन्तं सेवमानाऽमन्दानन्दतुन्दिलास्मि। आर्य! एकाकिन्येवास्मि मन्दिरेऽस्मिन्। भवतां पदाम्बुजयुग्मसमुपासनायानुमोदतां जनोऽयम्। अस्ति पर्याप्तं वित्तं मत्सविधे पोषणायावयोरुभयोः।" इत्युक्त्वा रुद्धकण्ठा व्यरमम्। स च मां सदयमालोकयन्मत्करं परामृशत् समार्दवम्। निजपूर्वचरितस्मरणेन तप्यमान इव स प्रत्यभात्। कयापि निर्दययाङ्गनया वञ्चितः स्यादित्यकि मया। परं नाक्षरेणापि तेन मनागपि व्यक्तीकृतम्। मौनमस्य तावन्मां किञ्चिदाश्वासयत्। चिरं च पतत्रिकुलकूजितं दविष्ठजलाशयनिर्झर-ध्वनिं च श्रावं श्रावं चन्द्रिकाया रामणीयकेन प्रहृष्टान्तरङ्गौ कुन्दकुसुमैः सुवासिते लतामण्डपे जोषमवास्थिष्वहि।

परेद्यवि प्रातस्तरां यदा जागरितासं तदा हृदयवल्लभाय दुग्धापूपादियुतं प्रातराशं प्रदातुं गृहतलं यावदारोहामि तावद्भोजनफलकोपरिस्थापितं तद्धस्तलिखितं पत्रमेकं मद्दृष्टिपथे निपतति। सवेपथुरवसन्नगात्री सचकितं सभयं पत्रमिदमपाठिषम्। यथा। "भगवत्याः सौजन्यातिशयभारेण सुतरां नतस्य भगवत्याः सौहार्द्रपात्रत्वं नास्ति खलु जनस्यास्य। सन्ति मदपेक्षया परःशता भवत्सौहार्दार्हाः। अज्ञातक्षुद्रजनस्यानेकनतिततयोऽङ्गी-क्रियन्ताम्। स्वस्ति भवत्यै।" पठित्वेति स्वल्पसन्देशमिमं निश्चला चिरमवास्थिषि। अनेकापत्सहिष्णो र्मम कि जन्मान्तरोपात्तस्य दुष्कर्मणः फलं भाग्यं यदपारानन्दपयोनिधौ मां कामवराक आदौ निमज्ज्य ततो हृदयेश्वराश्लेषदुःखशैलशिखराच्चयपातयत्।" इत्युदीर्य दीना रुद्धकण्ठा शिथिलवचनन्यासा विललाप सकरुणं दया। निशम्य दयनीयां कथां तस्याः स्वस्वदयिताभ्यर्थिन्यो योषितोऽन्यास्तिस्रो दयाम्बुनयना बभूवुः।

अथाचिरात्सर्वा इमाश्चतस्रः स्वस्वहृदयवल्लभस्य नामाक्षररेखाः पुष्पैरालिख्य परेद्यवि तत्र पुनरागमननिश्चिता ततो निर्ययुः। अथ प्रातस्तरां दैवज्ञेनालोकितेषु नामाक्षरकुसुम-लेख्येषु प्रतिस्थलं समर्मार्जि। तदनु श्लोकेनैकेनालङ्कृतमासीत्प्रत्येकाङ्गनायाः स्थानं निभृतम्। सन्देशोऽभूद्यथा।

पतङ्गो रसमास्वाद्य चतुःसुमनसां पृथक्।
मायाजाले गृहीतत्वाद् विमुक्तोऽपि तिरोऽभवत्॥ इति।

अथ भानूदये चतुष्टयं योषितां देवमन्दिरवर्ति स्वस्वस्थानं पुनरुपेत्य मूकबधिरेण दैवज्ञेन विरचितं पद्यमयं सन्देशमपठत्परं तद्गूढार्थमवगन्तुं नैकाप्यपारयत्। पश्चाद्दैवज्ञेन मायाजालसदृशं जीवनं संग्रथ्नन्त्येव प्राणिन इति हस्तचेष्टया योषिद्भ्यो निवेदयितुं यतितम्। तास्तु सम्भ्रान्ता अधिकाधिकं भग्नमनोरथाश्च देवालयान्नतशिरसो निर्ययुः परं न जज्ञिरे ता यत्ताभिश्चतसृभिरन्विष्यमाणो रमण आसीदेक एव पुरुष इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Works by Pandita Kshama Row

The following works of Pandita Kshama Row, all wristen in simple and elegant Sanskrit aud absolutely free from vulgarity are indispensable to all teachers and students of Sanskrit and should find an honoured place in all school and college libraries.

They may be obtained from Srimati Lila Dayal, 37, New Marine Lines, Bombay and N. M. Tripathi Ltd. Book-Sellers, Bombay—2.

Satyagraha Gita	Rs. 2	8
Uttara Satyagraha Gita ...	„ 6	12
Sankara Jivanakhyaniyam ...	„ 2	0
Mira Lahari with English Translation	„ 2	8
Sri Tukaram Charitam with English Translation.	„ 5	8
Kathapanchakam	„ 1	0
Vichitra Parishad Yatra ...	„ 0	12
Sri Ramdasa Charitam with English Translation	„ 5	0
Kathamuktavali (in the press)	„ 5	0
Grama-Jyotih	„ 1	0

A No Bhadriyam

One of the most inspiring hymns of the Rigveda with the critically edited commentaries of (1) Venkatamadhava, (2) Skandasvamin, (3) Mahidhara, (4) Sayana and (5) Kashypa and extracts from the commentaries of Uvata, Haradatta and others, English translation, critical and explanatory notes-parallels from other languages etc. etc. Rs. 2/8/-

Visvanath Chatterji

81 Shyambazar Street, Calcutta 4.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

মঞ্জূষায়া নিয়মাবলী

মঞ্জূষায়া বার্ষিকং মূল্যং রূপকত্রিতয়ম্। আশ্বিন (September) মাসতো বর্ষারম্ভঃ। গ্রাহকৈর্বর্ষস্য প্রথমসংখ্যাত এব গ্রহীতব্যম্।

২। প্রতিসৌরমাসং দশমদিনে (আঙ্গ্লমাসস্য চতুর্বিংশে দিবসে) 81, Shambazar Street, Calcutta 4 ইত্যতো মঞ্জূষা প্রকাশ্যতে।

স্ত্রীপ্রশংসা—বরাহমিহিরস্য শ্লোকাঃ

ভট্টোৎপলটীকয়া বিদ্যাবাচস্পতিবিরচিতাভিনববিস্তৃতব্যাখ্যয়া চ বিভূষিতা। মূল্যং রূপ্যকমাত্রম্।

Convocation Address in Ancient India As. 12

Popular Etymology— Re. 1/-

শব্দকথা—সরস, সরল ভাষাতত্ত্ব ২৲

ইহাতে সরল ও সরসভাবে বাঙ্গালা ভাষার চলতি ভুলগুলির আলোচনা করা হইয়াছে, **সংস্কৃত ব্যাকরণের দিক্ দিয়া, বাঙ্গালা ভাষার দিক্ দিয়া, ভাষাতত্ত্বের দিক্ দিয়া,** বঙ্গদর্শন প্রভৃতি হইতে ভূরি ভূরি উদাহরণ উদ্ধৃত করিয়া শব্দ ও শব্দসমষ্টির শুদ্ধি ও অশুদ্ধি বিবেচিত হইয়াছে। ওত-প্রোতশব্দে বিসর্গ আছে কি না, যদি থাকে প্রথম 'ত'র পরে আছে, না দ্বিতীয় 'ত'র পর আছে, না উভয় 'ত'র পরে আছে, 'সঠিক' শব্দ ঠিক কি না, 'ব্যবহারিক' ব্যবহারযোগ্য কি না, আবশ্যক ও আবশ্যকতায় প্রভেদ কি, প্রভৃতি আলোচিত হইয়াছে। "সোনার পাথরবাটি" প্রবন্ধে সংস্কৃত, বাঙ্গালা, ইংরাজী প্রভৃতি নানা ভাষার সোনার পাথর বাটী জাতীয় শব্দগুলি সন্নিবিষ্ট হইয়াছে। ক্রিয়াবিশেষণ প্রবন্ধে বাঙ্গালা, ইংরাজী ও ফরাসী ক্রিয়ার বিশেষণগুলির মূল অর্থ বিবেচিত হইয়াছে। "সন্ধির কথায়" সন্ধির বৈজ্ঞানিক ব্যাখ্যা ও বাঙ্গালা ইংরাজী লাটিন প্রভৃতি ভাষার সন্ধি প্রদর্শিত হইয়াছে। সন্ধি, ষত্ব ও ণত্ব সম্বন্ধীয় নিয়মগুলি সরল ও সরসভাবে বোঝান হইয়াছে ও বাঙ্গালা উপন্যাসাদি হইতে শত শত দৃষ্টান্ত সন্নিবিষ্ট হইয়াছে।

ঋগ্বেদীয়ম্ আনোভদ্রসূক্তম্ পঞ্চভাষ্যসমন্বিতম্ ২॥০

উষার আলো—ছোট ছোট হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক, সরল ব্যাখ্যা ও অনুবাদ ।/০

Several complete sets of Vols. IV, V, VI and VII (450 pp. each) of the Manjusha are still available for Rs. 6/8/- per volume and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

শ্রীবিশ্বনাথ-চট্টোপাধ্যায়ঃ।

Phone :—B. B. 4049 ৮২ শ্যামবাজার ষ্ট্রীট্, কলিকাতা ৪

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

भाषा

December, 1954 | १८७६-शकीयपौषस्य ९म-वर्षस्य चतुर्थी संख्या | Vol. IX No. 4

आभाणकमाला

1. He that lies upon the ground can fall no lower.
   Latin. Qui jacet in terra, non habet unde cadat.
   यो हि भूमिमधिशेते सोऽधस्तरां न निपतेत् ।
   'I am not now in Fortune's power,
   He that is down can fall no lower.'
2. Never quit certainty for hope.
   न जात्वध्रुवस्य कृते ध्रुवं परित्यजेत् ।
   Greek. Nēpios hos ta hetoima lipōn t'anetoima diōkei.
   He is a fool who leaves a certainty to pursue an uncertainty.
   "यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
   ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥"
   को वा बालिशादन्यः करगतमोदकं परित्यज्याशामोदकमनुसरेत् ।
3. A sound mind in a sound body.
   Lat. Orandum est, ut sit mens sana in corpore sano.
   A sound mind in a sound body is a thing to be prayed for.
   वरणीयं खलु देवेभ्यः स्वस्थे शरीरे स्वस्थं मनः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"किं तावज्जगति श्रेष्ठं वस्तु ?" इति हेसियदेन पृष्टः कविकुलचूड़ामणिर्होमारः प्राह—phrenes esthlai sōmasin andrōn पुरुषोचितेषु शरीरेषु स्वस्थानि मानसानि। इति।

प्रतीपभाषिणा वार्णार्ड्शमहोदयेनोक्तम्—*Mens sana in corpore sano* is a foolish saying. The sound body is a product of the sound mind. स्वस्थे शरीरे स्वस्थं मन इति बालिशोक्तिः। स्वस्थस्य मनसः फलं स्वस्थं शरीरमिति।

उपनिषद्रत्नमञ्जूषा

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन् वा अरेऽस्मात् स्थानादस्मि, हन्त तेऽनया कात्यायन्या अन्तं करवाणीति।

Maitreyi (मैत्रेयि), said Yājñavalkya (इति ह उवाच याज्ञवल्क्यः), Lo (अरे), verily (वै) I (अहम्) am (अस्मि) about to go forth (उद्यास्यन्) from this state (अस्मात् स्थानात्). Come (हन्त), I will make a settlement (अन्तं करवाणि) of you (ते) with that Kātyāyanī (अनया कात्यायन्या)।

भाष्यम्। मैत्रेयि इति ह उवाच याज्ञवल्क्यः मैत्रेयीं स्वभार्याम् आमन्त्रितवान् याज्ञवल्क्यो नाम ऋषिः। उद्यास्यन् ऊर्ध्वं यास्यन् पारिव्राज्याख्यम् आश्रमान्तरं [प्रवेक्ष्यन्]। [वैशब्दोऽवधारणार्थकः।] अरे इति सम्बोधनम्। अहम् अस्माद् गार्हस्थ्यात् स्थानाद् आश्रमात् ऊर्ध्वं गन्तुम् इच्छन् अस्मि भवामि। अतो हन्त अनुमतिं प्रार्थये ते तव। किञ्च ते तव अनया द्वितीयया भार्यया कात्यायन्या अन्तं विच्छेदं करवाणि। पतिद्वारेण युवयोर्मया सम्बध्यमानयो र्यः सम्बन्ध आसीत् तस्य सम्बन्धस्य विच्छेदं करवाणि, द्रव्यविभागं कृत्वा वित्तेन संविभज्य युवां गमिष्यामि।

सा होवाच मैत्रेयी। यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति। नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Thus addressed (सा ह) Maitreyī (मैत्रेयी) said (उवाच), If (यत्) indeed (नु), Venerable Sir (भगोः), this (इयम्) whole (सर्वा) earth (पृथिवी), filled (पूर्णा) with wealth (वित्तेन), were (स्यात्) mine (मे), how (कथम्) would I be (स्याम्) immortal (अमृता) thereby (तेन)? "No" (नेति) said (ह उवाच) Yājñavalkya (याज्ञवल्क्यः). "As (यथैव) the life (जीवितम्) of those possessed of the means or implements of living runs so (तथैव) will be (स्यात्) your life (ते जीवितम्). Of immortality (अमृतत्वस्य), however (तु), there is no hope (आशा न अस्ति) through wealth (वित्तेन),

भगोः is the voc. sing of भगवत्. उपकरणवताम्—Cf. Caraka : नातः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः। Cf. तस्येयं पृथिवी सर्वा वित्तेन पूर्णा स्यात्। स एको मानुष आनन्दः। तैत्तिरीयारण्यकम् ८।८।२।

भाष्यम्। सा एवमुक्ता ह उवाच। यद् यदि। नु इति वितर्के। मे मम इयम् पृथिवी भगोः भगवन् सर्वा सागरपरिक्षिप्ता वित्तेन धनेन पूर्णा स्यात्। कथम् न कथञ्चन इत्याक्षेपार्थः। प्रश्नार्थो वा। तेन पृथिवीपूर्णवित्तसाध्येन कर्मणा अग्निहोत्रादिना अमृता किं स्याम् इति व्यवहितेन सम्बन्धः। उवाच प्रत्युवाच याज्ञवल्क्यः कथम् इति यथाक्षेपार्थम्, अनुमोदनं नेति होवाच याज्ञवल्क्य इति। प्रश्नश्चेत् प्रतिवचनार्थं नैव स्या अमृता। किं तर्हि? यथैव लोके उपकरणवतां साधनवतां जीवितम् सुखोपभोगसम्पन्नं तथैव तद्वदेव ते तव जीवितम् स्यात्। अमृतत्वस्य तु न आशा मनसापि अस्ति वित्तेन वित्तसाध्येन कर्मणेति। (क्रमशः)

भारतरत्नमञ्जूषा

[सभा ८१।८–११]

यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्।
बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि* पश्यति॥
बुद्धौ कलुषभूतायां विनाशे समुपस्थिते।
अनयो नयसङ्काशो हृदयान्नापसर्पति॥
अनर्थाश्चार्थरूपेण अर्थाश्चानर्थरूपिणः।
उत्तिष्ठन्ति विनाशाय नूनं तच्चास्य रोचते॥
न कालो दण्डमादाय शिरः कृन्तति कस्यचित्।
कालस्य बलमेवाद्विपरीतार्थदर्शनम्॥

*अवाचीनानि विपरीतानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिकता-शब्दस्य निर्वचनम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

तैत्तिरीयारण्यके (१।१२) श्रूयते -वायुः श्वेतसिकद्वक इति। व्याख्यातं च सायणेन श्वेतानां सिकतानां द्रोग्धेति। अतः प्रतीयते वालुकार्थकः सिकशब्दः पूर्वमासीत्, ततश्च ग्रामजन-बन्धुभ्य इव समूहार्थे तलि सिकताशब्दः समुत्पन्नः। इति रेणुमहोदयस्य मतम्। यद्यपि तलो लित्वात् प्रत्ययात्पूर्वस्योदात्तत्वं प्राप्तम्, तथापि अवीरतेत्यत्र यथा प्रत्ययात् प्रपूर्व-स्योदात्तत्वम्, तथात्रापि बोद्धव्यम्। एवं च—एका च सिकता तैलदानेऽसमर्था तत्समुदायश्च खारीशतमप्यसमर्थम् इति महाभाष्यम् [शिवसूत्र० ५] पतञ्जलेः प्रादुर्भावसमये सोऽर्थो विस्मृत इति सूचयति। 'द्वे वा अहोरात्रे—शुक्लं च कृष्णं च, द्वे सिकते—शुक्ला च कृष्णा च' इति शतपथश्रुतौ न काप्यनुपपत्तिः, द्वे इत्यस्य द्विविधे इत्यर्थप्रतीतेः।

यथा वयं पश्यामस्तथा सिचधातोर्निष्ठायां टापि निष्पन्नस्य सिक्ताशब्दस्य विप्रकर्षेण सिकताशब्दो निष्पन्नः। अर्थपृथक्त्वप्रदर्शनार्थमाद्युदात्तत्वम्। यत्तु निरुक्ते उक्तम् [२।२]-अथाप्याद्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्किति, यच्च पतञ्जलिनोक्तम्—वर्णव्यत्यये कृतेस्तर्कुः कसेः सिकताः हिंसेः सिंह इति [शि० सू० ५] तत् सर्वं प्रौढिवादमात्रमिति बोध्यम्।

समीचीनः प्रश्नः

उपविष्टः प्राड्विवाकः। दूरतो दण्डायमानो रक्षिपरिवृतः पुरुषः। परितो निषण्णा व्यवहाराजीवाः। पुरतः स्थितोऽभियोक्ता।

राजकीयव्यवहाराजीवः (वादिनं प्रति)। उच्यतां स्वं नाम।

अभियोक्ता। व्योमकेशो वटव्यालः।

रा० व्य०। का भवतो वृत्तिः?

अभियोक्ता। अध्यापनम्।

रा० व्य०। उच्यतां किं तावद् वृत्तम्।

अभियोक्ता। अहं खलु सायं सान्ध्यभ्रमणं निर्वर्तयन्नासम्। तदा केनचन मम वक्षःस्थकञ्चुककोषात् क्षुद्रं घटिकायन्त्रमपहस्तितम्। स च तदात्व एव मया पाणौ धृतः, आक्रोशान्मे समागतस्य चारक्षिकपुरुषस्य हस्ते समर्पितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा० व्य०। निपुणं परितो विलोक्यताम्। अपि दृश्यतेऽसावत्र ?

अभियोक्ता। न खलु दृढ़तरं वक्तुं प्रभवामि। तदानीमालोकस्यास्पष्टतासीत्, अहमपि क्षीणदृष्टिः। परममुना पुरुषेण (अभियोक्तारमङ्गुल्या निर्दिश्य) गृहीतम् इति मे प्रतीतिः।

प्राड्विवाकः। न खल्वस्माकं प्रतीत्या ते प्रयोजनम्। सशपथं वक्तुं पारयसि वा ?

अभियोक्ता। नहि नह्यार्य, न शपेय।

प्राड्विवाकः। तर्हि प्रमाणाभावान्मुक्तोऽयमभियुक्तः। (अभियुक्तं प्रति) प्रमाणाभावान्मुक्तस्त्वम्। इदानीं यथेच्छं गच्छ।

अभियुक्तोऽविश्वसन्निव स्थितः।

प्राड्विवाकः। किमिति चिरायसे ? मुक्तोऽसि। अपसरेदानीम्।

अभियुक्तः। आर्य, धर्मावतार, तर्हि घटिकायन्त्रं तन्मत्सविध एव रक्षेयम् ?

मनोज्ञा वा मनस्विनी वा

आसीत् पुरा काचन परमरमणीया रमणी। एकदा तस्याः केनचन विद्वत्तमेन ग्रन्थकृता साकं परिचयः सञ्जातः। तेन च तत ऊर्ध्वं तस्यै मनोज्ञं पत्रमेकं प्रेषितम्। सा च वैदुष्याभावादुद्विजते स्म पत्रस्यास्य प्रत्युत्तरदानतः। आसीत् तस्याः सखी विरूपापि विपश्चित्। तयोक्तम् पत्रस्योत्तरमवश्यमेव देयम्। कदाचित्पत्रविनिमयेन सुसन्तुष्टोऽसौ त्वां परिणयेदिति। तयोक्तम्, न खलु मे तथाविधं वैदुष्यं वा बुद्धिप्रकर्षो वा विद्यते। कदाचिन्मदीयेन मौर्ख्येणायमुद्विजेतेति। तयोक्तं मया तव पत्राणि लेखिष्यन्ते। विनोदो हि सर्वैरेव काम्यते। तव पत्रलेखनेन मे चित्तविनोदनं स्यात् इति। तया तथेति प्रतिपन्नम्। एवं च पत्रविनिमयोत्तरं तेन विलिखितम्—श्रीमतीमहं सहधर्मिणीं विधातुमिच्छामि। नितरां प्रीतोऽस्मि भवत्याः पत्ररचनानैपुण्येनेति। ततश्च विरूपया विदुष्योक्तम्—इदानीं तस्य सविधे सत्यमेव वक्तव्यम्। यतरास्मै रोचेत ततरामसौ परिणेष्यतीति। ततश्च समागते तस्मिन् सुरूपयोक्तम्, भद्र भ्रान्तो भवान्, न खलु मया विलिखितानि पत्राणि। न खलु तथाविधं मे पाण्डित्यं वर्तते इति। तेन पृष्टं किं तर्हि तव सख्या विलिखितानीति ? तयोक्तम्, अथ किम्। अप्याह्वयामि तामिति ? तेनोक्तम्—किमिति ? न खलु तया मे प्रयोजनम्। अपि मन्यसे त्वम् अहं विश्वकोषं विवोढुमिच्छामि। त्वय्येव बद्धभावोऽस्मि, त्वामेवोपयच्छे इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनिसूत्रविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

आयनेयीनियियः फढखछघां प्रत्ययादीनाम् [७।१।२] इति सूत्रे महर्षिणा पाणिनिना प्रत्ययस्यादेः फकारस्य आयनादेशो विहितः, ढकारस्य एयः, खकारस्य ईनः, छकारस्य ईयः, घकारस्य च इयः। किमितीतरान् वर्णान् निर्घृणं परित्यज्यैतेषामेव वर्णानामत्र ग्रहणं कृतमिति प्रश्नः प्रायेण पाणिनीयानां मनःसु समुदेति। तत्रेदमुत्तरम्।

आयनप्रत्ययः प्राधान्येन गोत्रापत्ये भवति, आयनप्रत्ययान्तेषु च शब्देषु गार्ग्यायण एव प्रसिद्धतमः। गोत्रेऽपि रेफो वर्तते, गार्ग्येऽपि रेफो विलसति। अत एव रेफशब्दस्य फकारमुपादाय तस्य स्थाने आयनादेशो विहितः।

एयप्रत्ययः प्राधान्येन स्त्रीप्रत्ययान्तेभ्य एव भवति। स्त्रीलिङ्गो ढक्काशब्दश्च सुप्रसिद्ध एव। अत एव ढक्काया आद्यवर्णं ढकारं गृहीत्वा तस्य एयादेशो विहितः।

ईनप्रत्ययान्तेषु शब्देषु कुलीनशब्द एव समधिकं प्रसिद्धः। अत एव कुलात् खः [४।१।३९] इति पृथक् सूत्रं प्रणीतम्। कुलशब्दस्यादौ ककारो वर्तते। अत्र च महाप्राणो वर्णोऽपेक्ष्यते। अतः अल्पप्राणं ककारं विहाय तस्यैव सवर्णः खकार उपात्तः।

ईयप्रत्ययः प्राधान्येन ऋत्विग्विशेषेभ्यो भवति। अस्य च मूर्धाभिषिक्तमुदाहरणम्—अच्छावाकीयम् इति। अच्छावाकशब्दे च छकारो देदीप्यते। अत एव होत्राभ्यश्छः [५।२।३५] इति सूत्रे छप्रत्ययो विहितः, छकाररय च ईयादेशः कृतः।

इयप्रत्ययो विशेषेण समुद्रशब्दादभ्रशब्दाच्च भवति। अभ्रशब्दस्य पर्यायो मेघ एव सुप्रथितो लोके वेदे च। अत एव समुद्राभ्राद् घः [४।४।१२८] इति सूत्रे घकारप्रत्ययः कृतः। घकारस्य चेयादेशः।

अत्रेदमवधेयम्। अत्रत्याः सर्व एवादेशा अनेकाचः, अत एव स्थानिनोऽपि फढखछघा महाप्राणाः।

ठस्येकः [७।१।५०] इति सूत्रेण ठकारस्येकादेशो विहितः। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति [४।४।७२] इति सूत्रे कठिनान्तशब्देभ्यष्ठन् विहितः। कठिनिकेति ठकारविशिष्टे शब्द इकप्रत्ययस्य सन्दर्शनाट् ठस्येको विहित इति प्रतिभाति। (क्रमशः)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौवर्णं प्रस्तरकरकम् (२)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

कथासरित्सागरे दृश्यते—

भवच्चिन्ताविनिद्रा च चन्द्रचन्द्रातपासहा।
स्थिता निशावासरयोरत्र भेदमजानती ॥७१।९६॥

इति। अत्र चन्द्रचन्द्रातपासहा इति पदं विशेषतो दृष्टिमाकर्षति। अन्यत्रापि चन्द्रमरीच्यर्थे चन्द्रातपशब्दस्य प्रयोग उपलभ्यते। परं कस्य वा न विदितं मृच्छकटिके शूद्रकवचनम्—न चन्द्रादातपो भवतीति? अत एव चन्द्रातपशब्दः सौवर्णप्रस्तरभाजनस्यैव सब्रह्मचारी। विरहव्याकुले जने 'विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैरि'ति न्यायेन सुधाकरकिरणान्यप्यातपायन्ते। ततश्च सामान्यतश्चन्द्रातपशब्दस्य प्रयोगः प्रवृत्तः।

कश्चित् संग्रहकारीयः श्लोकः

[श्रीरामशंकरभट्टाचार्यः]

वाक्यपदीयटीकायामन्तराऽन्तरा संग्रहवचांसि उपलभ्यन्ते, पुण्यराजस्तु वाक्यपदीयस्थं श्लोकमपि संग्रहकारीयमिति प्रादीदृशत्। यथोक्तं तेन 'शुद्धस्योच्चारण.....' (२।२६७) इति श्लोकव्याख्याने—'एतदेव संग्रहकारोक्तश्लोकप्रदर्शनेन संवादयितुमाह' इति।

वयं तु इदमपि पश्यामो यदेतदनन्तरं यत् पद्यं पठितं तदपि संग्रहकारीयमेव, यद्यपि तत्पद्यटीकायामेतादृशं किमपि नोक्तं टीकाकृता। अत्रास्माकं युक्तय उपस्थाप्यन्ते :—

अयमेवात्र श्लोकः :—

यस्त्वन्यस्य प्रयोगेण यत्नादिव नियुज्यते।
तमप्रसिद्धं मन्यन्ते गौणार्थाभिनिवेशिनम् ॥२।२६८॥

२।२६७ श्लोकविषये पुण्यराजेनोक्तम्—'एतदेव संग्रहकारीयश्लोकप्रदर्शनेन संवादयितुमाह' इति। अत्र 'एतत्' खलु सर्वनामपदम्। सर्वनाम च प्रायेण प्राक्तनविषय-परामर्शि भवति। अत्र प्राग्विचारितो विषयः खलु गौणमुख्यशब्दार्थवादः (दृश्येतां २।२६५-२६६ श्लोकौ)। अत एवात्र 'एतत्'-पदेन गौणमुख्यविभाग एव ग्रहणीयः, (न केवलं गौणशब्दार्थो मुख्यशब्दार्थो वा)।

एवं स्थिते, इदं निश्चितं प्रतिभाति यत् २।२६७ संख्यकः श्लोकः मुख्यार्थशब्दस्वरूपविषयक एव। अतः 'एतत्'पदोपलक्षितविषयस्य पूर्णपरिचयार्थं गौणार्थशब्दस्वरूपविषयकः २।२६८ संख्यकः श्लोकः पठितः। समर्थितं चैतत् पुण्यराजेन—'गौणार्थशब्दस्वरूपमप्याहेति' वचनेन २।२६८ पद्यपातनिकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् वाक्ये 'आहेति' पदं विचारणीयम्। एकविषयमधिकृत्य २।२६७-२६८-संख्यकौ द्वौ श्लोकौ भाषितौ, तत्र आदिमश्लोकविषये आहेति क्रियापदं संग्रहकारं लक्षयति (टीकाकारवचनानुसारेण)। अतः २।२६८ श्लोकपातनिकायां यत् आहेति क्रियापद-मस्ति (गौणार्थशब्दस्वरूपमप्याह), तत् किं संग्रहकारं न लिलक्षयिषति ? टीकाकारस्ये-दमेव हृदयं प्रतिभाति, यत् स २।२६८ श्लोकमपि संग्रहकारीयत्वेन जानाति स्म, अन्यथा 'अत्र स्वमतं दर्शयति' अथवा 'स्वमतमाह' इत्येव स कथं नोक्तवान् ?

किंच पुण्यराज-वाक्य-स्वरसतोऽपीदं प्रतीयते। तेनोक्तं—'गौणार्थशब्दस्वरूपम् अपि आह' इति। अत्र 'अपि' इत्यनेन द्योत्यते यद् य एव पूर्वश्लोकस्य वक्ता, स एव परश्लोकस्यापि, अन्यथा अपिशब्दप्रयोगस्य किमपि सार्थक्यं न भवति। एतेन २।२६८-श्लोकस्य संग्रहकारीयत्वं सिद्धं भवति।

अपि च २।२६८श्लोकस्य शब्दानुपूर्वी अपि ज्ञापयति, यदयं तेनैव रचितः, येन २।२६७ श्लोको व्यरचि। तथाहि—२।२६८ श्लोके तु-पदं पठ्यते (यस्त्वन्यस्य प्रयोगेणेत्यादि), येन ज्ञायते यदुभे पद्ये एककर्तृके—एक एव लेखकः भिन्नभिन्नमत-प्रदर्शनाय तु-पदं व्यवहरतीति पुष्कलव्यवहारदर्शनात्। अतो यदि 'मुख्य-गौण-शब्दार्थ-स्वरूपम्' अत्र विषयः स्यात्, तस्य विषयस्य च अर्द्धांशः २।२६७ पद्ये भाषितः स्यात् संग्रहकारेण, ततोऽवशिष्टार्द्धांशोऽपि २।२६८ श्लोके तेनैव भाषित इत्यत्र न सन्देह-लेशः। एतेनापि २।२६८ श्लोकस्य संग्रहश्लोकत्वं सिद्धमेव।

ननु—टीकाकारेणोक्तं २।२६७ श्लोकव्याख्याने अयं श्लोकः संग्रहकारीय इति। यदि २।२६८ श्लोकोऽपि संग्रहकारीय एव स्यात्, तर्हि कथं टीकाकारस्तादृशं किमपि नात्रापि (२६८ श्लोकव्याख्याने) उक्तवान् ? उच्यते—टीकाकारेणोक्तम्—'संग्रहकारोक्त-श्लोक.....' इति। अत्र एक एव श्लोक उक्तः, न द्वितीय इत्येतादृशं किमपि न निर्दिष्टं तेन नानेन वचनेन अपरस्य श्लोकस्य संग्रहकारीयत्वस्य निषेधः कर्तुं शक्यते।

किंच टीकाकारेणोक्तं 'संवादयितुम्' इति। संवादः खलु परिपूर्णविवरणदाने एव भवितुमर्हति। न केवलं २।२६७ श्लोकेन मुख्यगौणशब्दार्थस्वरूपस्य संवादः पूर्णी-भवितुमर्हति, एतेन श्लोकेन प्रतिपाद्यविषयस्य अर्द्धांशोल्लेखनात्। अतः संवादसिद्ध्यर्थं २।२६८ श्लोकस्य आवश्यकता वर्तते। यदि प्रतिपाद्यविषयस्य अर्द्धांशविवरणात्मकः श्लोकः संग्रहकारीय इति कथ्यते, तर्हि सुतरामायातं यद् अवशिष्टांशोऽपि (अर्थात् २।२६८ श्लोकोऽपि) संग्रहकारीय एव।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभीषिका वा बिभीषिका वा ?

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

विभीषिकाशब्दस्यादिमो वर्णोऽन्तस्थो वा पवर्गीयो वेति साम्प्रतं विचार्यते। हस्तलिखितेषु मुद्रितेषु च पुस्तकेषु प्रायेणात्र पवर्गीयो बकार एव सन्दृश्यते। तथाच—

यदि ते सन्ति सन्त्वेव केयमद्य विभीषिका।
किमुक्तैरेभिरधुना तां पताकां हरामि वः॥

इत्युत्तररामचरितगतश्लोकव्याख्यायां नारायणेनोक्तम्—भीषयितुमिच्छा बिभीषा। बिभीषैव बिभीषिका। सन्नन्तत्वेन धातुत्वाद् धात्वर्थमात्रे ण्वुल् वाच्य इति भावे ण्वुल् इति।

रोगाख्यायां ण्वुल् बहुलम् [३।२।२०८] इति सूत्रे वर्तते वार्त्तिकम्—धात्वर्थनिर्देशे ण्वुल्। व्याख्यातश्चेदं भाष्यकृता—धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। का नामासिकान्येष्वीहमानेषु। का नाम शायिकान्येष्वधीयानेषु इति।

प्रथमतस्तावद् भीषयितुमिच्छेत्यर्थे बिभीषाशब्दो दुर्घटः, भीषिधातोः सनि अप्रत्यये षकारद्वयस्य श्रवणं स्यात्। किञ्च, ण्वुल्प्रत्ययेन विभीषिकापदस्य सिद्धिश्चेत् विभीषायाः साधनमनर्थकम्। अत एव णिजन्तभीषिधातोर्ण्वुलि स्त्रियां विभीषिकेतिपदं सिध्यति। तस्य च वकारोऽन्तस्थ एव, न पुनः पवर्गीयः। भीधातोः सनि अप्रत्यये पवर्गीयबकारादिबिभीषा भवति, तस्य चार्थो भेतुमिच्छेति। अ प्रत्ययात् इति सूत्रेण णिजन्तेभ्यः अप्रत्ययः साम्प्रतं न सन्दृश्यते, कारयाम्बभूवेत्यादिषु कारयाम्प्रभृतिषु पदेषु दृश्यत एव। क्रमेण जनानां मनःसु सञ्जातम्—विभीषिकापदं भीषयितुमिच्छेत्यर्थकं स्वार्थककारान्तमिति, एवं विभीषाशब्दोऽपि भीषयितुमिच्छेत्यर्थकः सञ्जातः।

तदयं सारः—विभीषिकाशब्दस्य भीषिधातोर्ण्वुल्प्रत्ययनिष्पन्नत्वादन्तस्थवकारादित्वमेव समीचीनम्।

———

रवीन्द्रनाथस्य

पूजार्थिनी

[श्रीफटिकलालदासेनानूदितः]

स बिम्बिसारो मगधाधिराजो विलब्धबुद्धाङ्घ्रिनखाग्रभागः।
प्रासादलग्ने निभृते निकुञ्जे स्तूपं मनोज्ञं रचयाञ्चकार॥
वासो वसाना शुचि राजपत्नी स्वकन्यकाभिः स्वयमेत्य तत्र।
सम्पूज्य भक्त्या कुसुमोपहारैः क्षपागमे स्थापयति स्म दीपान्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजातशत्रुः पितरं निगृह्य यदैव सिंहासनमारुरोह।
पितुः स धर्मं रुधिरप्रवाहैरचुच्यवद् राजगृहात् पुरस्तात्॥
प्रदाय यज्ञानलपूतिहेतौ स बौद्धशास्त्राणि समादिदेश।
देवद्विजान् भूपतिमन्तरेण नान्यो हि कश्चिद् भुवि पूजनीयः॥
अथैकदा शान्तदिनावसाने सरःसु शीतेषु कृताभिषेका।
सुवर्णपात्राहितपुष्पदीपा दासीषु काचिन्महिषीं प्रपेदे॥
उवाच तां राजवधूर्भयार्ता "किं विस्मृता भो नृपशिष्टिरेषा।
'स्तूपस्य मूले ददतोऽर्घ्यदीपान् भुवं विचुम्बिष्यति कृत्तमूर्धा'॥"
व्यावृत्य सा राजवधूं ददर्श सिन्दूरबिन्दुं दधतीं ललाटे।
सा कम्प्रहस्ता निजगाद दासीम् "अपेहि दुष्टे! मम दृष्टिमार्गात्॥"
श्यामायमाने दिवसे गवाक्षे काव्यं पठन्त्या नृपनन्दनायाः।
कक्षेऽथ धीरं परिचारिका सा दीपार्घ्यहस्ता प्रविवेश तूष्णीम्॥
दृष्ट्वा ततस्तां समुपेत्य कर्णे सा राजबाला सभयं जगाद।
"आज्ञां कठोरां नृपतेर्विदित्वा न युक्तमेतन्मरणेऽभियानम्॥"
आहूय सर्वाः पुरवासिनीः सा प्रोवाच मोघेऽप्यनघा स्वयत्ने।
"एह्येहि कालो ह्ययमर्चनायाः सपुष्पदीपैः प्रभुगोतमस्य॥"
या कापि शुश्राव तदीयवाक्यं पिधाय कर्णौ विमुखा प्रतस्थे।
तां तर्जयित्वा विनिनिन्द कापि—पूजार्थिनी सा सकलं विषेहे॥
स्वल्पापि दीप्तिर्दिवसस्य शेषा बभूव सौधेषु शनैर्विलीना।
घण्टानिनादैर्मुखरं च राज्ञः प्राचीनदेवालयकक्षजातम्॥
बभुश्च तारा गगने निरभ्रे चचार वैतालिककण्ठगीतिः।
विषाणशब्दैः परिघोषिता च दौवारिकैर्मन्त्रसभासमाप्तिः॥
तस्मिन् क्षणे तत्र घनान्धकारे स्तूपस्य मूले नृपकुञ्जमध्ये।
आलोकमाला सहसा दिदीपे प्रदीपभातिप्रतिमाल्पदीप्तिः॥
प्रधावितै रक्षिगणैरवादि "भूभर्तुराज्ञामवधीरयित्वा।
पतङ्गवद्वह्निमुखं विविक्षुः का त्वं समेता मरणाय दुष्टे॥"
चचार वाणी मधुराक्षरेयं "श्रीनामिकाहं प्रभुबुद्धदासी।"
एवं ब्रुवत्यां विदधौ स्वकृत्यं क्षणेन हस्तस्थसमुद्धृतासिः॥
निर्वापिता दीपशिखा चिराय स्मृता न केनापि कथापि भूयः।
मूका स्थितैका भुवि साक्षिणी सा पाषाणशुभ्रोरसि रक्तलेखा॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धबोधसंज्ञाविमर्शः (३)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यच्ताच्येप् पिराह स्म पिसंज्ञां मुग्धबोधकृत् ।
ङीब्ङीप्ङीनो भसंज्ञाश्च समाहृत्य प्रयत्नतः ॥
लिङ्गशब्दस्य लिकारः प्रातिपदिकबोधकृत् ।
नाम्नो यः प्रत्ययस्तत्र स्वरोऽयं सति सम्भवे ॥
ईपः पकारमादाय लेरिकारं तथा पुनः ।
पिशब्दोऽयं समुद्भूतो वैयाकरणतोषकृत् ॥

———

शकुन्तलाविमर्शः (४)

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः । वत्स ज्ञानानन्द, मुष्टशब्दस्य दुष्टस्यापि प्रामाणिकः प्रयोग उपलभ्यते वा ?

ज्ञानानन्दः । अस्य प्रयोगा अतीव विरलाः । मन्ये कालिदासकाव्यस्यापपाठ एवास्य क्वाचित्कप्रयोगे निमित्ततां गतः । ब्राह्मणेषु मुषितशब्द एव श्रूयते । रामायणमहाभारतादिष्वपि स एव शब्दः सन्दृश्यते, काव्यनाटकादिष्वपि तस्यैव साम्राज्यम् । केवलं प्राभाकरैः प्रमुष्टतत्त्वकस्मरणम् इति प्रयुज्यते स्म । प्रतिपक्षकरिकेसरिणा पण्डितराजजगन्नाथेनापि कालिदासीयपाठवासितचित्तेन रसगङ्गाधरे प्रमुष्टशब्दः प्रयुक्तः । आङ्गलकविना बायरणेनावितथमेवोक्तं Better to err with Pope than shine with Pie !

अध्यापकः । मुष्टशब्दसदृशोऽपरः कोऽपि शब्दो वर्तते वा ?

ज्ञानानन्दः । बाढं वर्तते । आश्वस्तशब्दः सर्वथा मुष्टमेवानुहरति । विश्वस्तोऽपि तथाविध एव ।

अध्यापकः । कालिदासेनाश्वस्त-शब्दः प्रयुक्तो वा ?

ज्ञानानन्दः । आर्य, मेघदूतस्य सुप्रसिद्धे श्लोके प्रत्याश्वस्तशब्दो देदीप्यते । स च यथा—

त्वामुत्थाप्य सजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युत्कम्पस्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ इति ।

अध्यापकः । मुष्टप्रत्याश्वस्तयोः कोऽपि विशेषो वर्तते वा ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानानन्दः। यद्यपि ब्राह्मणेषु श्वसित-शब्द एव श्रूयते तथापीतिहासपुराणकाव्य-नाटकादिषु सर्वत्रैवाश्वस्तविश्वस्तयोः साम्राज्यम्। उच्छ्वसित-निःश्वसित-प्रश्वसितादि-ष्विदुपलभ्यते, विश्वस्ताश्वस्तौ तु सर्वथानिटावेव।

अध्यापकः। किं वात्र कारणं स्यात्? (क्रमशः)

श्रीशृंगेरिपीठाधिपति-जगद्गुरुश्रीचन्द्रशेखर-भारतीस्वामिनां विदेहमुक्तिप्राप्तिः

[पण्डित वे-वेङ्कटरामशर्मा विद्याभूषणः]

महदिदमस्माकं विषादस्थानमप्रतिविधेयं संवृत्तम्, यच्छृङ्गेरिपीठाधिपतयो जगद्गुरु-श्रीचन्द्रशेखरभारतीस्वामिनोऽप्रतीक्षितां विदेहमुक्तिं प्राप्य लोकयवनिकातस्तिरोभूता इति।

अतीते महालयामावास्यादिनप्रभाते सवनस्नानार्थं गतवन्तस्ते महात्मान उत्तुङ्गैस्तुङ्ग-तरङ्गैरभिभूता अपि स्वात्मानं प्रतिपादयितुमनिच्छन्त इव स्वकलेबरमात्रं त्यक्त्वा ततोऽपि सर्वोन्नतं ब्रह्मभावमविन्दन्त; यतस्ते बहोः कालात् प्रभृति एकाग्रसमाधिभावना-भाविताः प्रापञ्चिकं शारीरकं च कृत्यजातमनादृत्य महातपस्विनो व्यलसन्।

स्वामिनां भौतिकशरीरतिरोधानेऽपि, तेषां कृपापूर्णानुग्रहशक्तिः सर्वेषां शिष्यजनानां हृदयालयेषु सर्वदा प्रदीपायिता विलसेदिति दृढं विश्वसिमः।

इदानीं श्रीमताम् अभिनवविद्यातीर्थस्वामिनां पीठावरोधमुपश्रुत्य सन्तुष्टान्तरङ्गा उत्तरोत्तरं भूयसे श्रेयसे श्रीशारदां देवीं प्रार्थयमानाः स्वामिसन्निधावस्मदीयां प्रणति-ततिमुपहरामः।

पदपाठपाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ऋक्संहितायामष्टममण्डलस्य पञ्चत्रिंशत्तमे सूक्तेऽयमर्धर्चस्त्रिरुपलभ्यते—

सजोषसा उषसा सूर्येण चादित्यै र्यातमश्विना

इति। अत्र च पदपाठो मुद्रितपुस्तकेषु दृश्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना।

इति। मुद्रिते सायणभाष्ये दृश्यते—उषसा सूर्येण च आदित्यैः च यातं गच्छतम्। अत्र प्राचीनतमादेव कालादारभ्य लेखकप्रमादात्पदपाठस्य भाष्यस्य चांशविशेषस्त्रुटित इति स्फुटमेव। मन्त्रे "चादित्यैः" इत्यत्र आकारस्यैकारस्य च उदात्तत्वं देदीप्यते। 'आदित्यैः' इत्यस्यान्तोदात्तत्वादाकारस्यानुदात्तत्वम् [illegible] "चादयोऽनुदात्ताः" इति फिट्सूत्रेणानुदात्तत्वम्। अनुदात्तचकारात्परेणाऽनुदात्ताऽदित्यकारेण च सन्धौ जायमानस्याकारस्योदात्तत्वं कथमपि न सम्भवति। अत एव चादित्यैस्याकारः प्रश्लिष्टो वर्तते इति व्यक्तमेव। अत एव पदपाठे—

सऽजोषसौ। उषसा। सूर्येण। च। आ। आदित्यैः। यातम्। अश्विना।

इति पठनीयम्। भाष्ये च—

उषसा सूर्येण चादित्यैश्च सजोषसा सङ्गतौ आयातम् आगच्छतम्।

इति पठनीयम्। त्रिष्वप्यर्धर्चेष्वेवं पठनीयम्।

बहुलीभूताः प्रमादाः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

रत्नावल्यां दृश्यते—

प्राणाः परित्यजत काममदक्षिणं मां
रे दक्षिणा भवत मद्वचनं शृणुध्वम्।
शीघ्रं न यात यदि तन्मुषिताः स्थ मूढ़ा
याता सुदूरमधुना गजगामिनी सा॥

इति। अत्र द्वितीयचरणावसानगतं शृणुध्वमिति पदं व्यक्तमेव प्रामादिकम्, शृणोतेः परस्मैपदित्वात्। अत एव शृणुध्वमित्यत्र कुरुध्वमिति पठनीयम्। तेनार्थस्यापि परिपोषो भवति। दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु इत्याभिधानिकाः। प्राणाः कृपया ममेच्छन्दानुवर्तिनो भवत, मम वचनं पालयत। केवलं वचनश्रवणेन परच्छन्दानुवर्तित्वं न सिध्यति, अनुष्ठानं त्वपेक्ष्यते। अत एवात्र कुरुध्वमित्येव कविना विलिखितमिति प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकपरिचयः

नाट्यशास्त्रम्। श्रीमदभिनवगुप्ताचार्यविरचितविवृतिसमेतम्। तृतीयं खण्डम्। [अध्यायाः १९-२७]। श्रीरामकृष्णकविना संस्कृतम्। Oriental Institute, Baroda इत्यत्र लभ्यम्। मूल्यं पञ्चदश रूपकाः।

महत् खलूपकृतं विदुषां वरोदाविश्वविद्यालयेन निखिलनाट्यशास्त्राणामाकरायमाणं भरतनाट्यशास्त्रमिदं श्रीमदभिनवगुप्तविरचितविवृतिसनाथं प्रकाशयता। अस्यादिमं खण्ड-द्वयं बहोः कालात्पूर्वं प्रकाशितम्। कुतश्चित् प्रतिबन्धकात् तृतीयखण्डस्यास्य प्रकाशने विलम्बः संवृत्तः। चतुर्थं खण्डं सुविस्तृतोपोद्घातसनाथं नचिरादेव प्रकाशयिष्यते इति खण्डेऽस्मिन् प्रतिश्रुतम्।

अत्र सन्धीनां सन्ध्यङ्गानां च लक्षणानि, प्रस्तावनाभेदाः, तल्लक्षणानि, वृत्तिभेदा इत्येवमादयो नाटकान्यनुशीलयतामुपकारका बहवो विषया वर्तन्ते। साहित्यदर्पणस्य षष्ठे परिच्छेदे दशरूपके वा ये विषया आलोचितास्ते सर्वे प्रायेणेह समुल्लसन्ति। यद्यपि पुस्तकमिदं रामकृष्णकविभि र्महता परिश्रमेण सम्पादितम्, तथापि क्वचिद् दृश्यमाना मुद्रणप्रमादाः पाठगताश्चाशुद्धयः समुद्वेजयन्ति चित्तं सहृदयानाम्। एकद्वा अत्र प्रदर्श्यन्ते। आशास्यते चतुर्थखण्डस्यान्ते शुद्धिपत्रे प्रमादा इमे प्रदर्श्येरन् सम्पादकमहाभागैरिति।

४५ पृष्ठे दृश्यते—प्रगयणमिति रूढिशब्दः। अन्ये तु प्रजाशब्दात् विचि क्लिष्य-यत्नशब्देन शता क्विपा व्युत्पत्तिं कल्पयन्ति। इति। अस्माकं सविधे या विवृतिप्रति-लिपिर्वर्तते तत्र प्रजाशब्दाद्विचिकित्सायत्नशब्देन शता क्विना इत्यादिः पाठो वर्तते। पाठ-द्वयमपि प्रामादिकमिति व्यक्तमेव। अन्ये तु प्रगशब्दाण्णिचि क्विप्यत्नशब्देन समासेन व्युत्पत्तिं कल्पयन्ति इति कदाचित् पाठः स्यात्।

२५ पृष्ठे प्रकरी-शब्दस्य व्युत्पत्तिः प्रदर्शिता। तत्र इक् सार्वधातुभ्यः, संविदपेक्षया च, स्त्रीलिङ्गत्वे कृदिकारादिति ङीष्। इति दृश्यते। अत्र इन् सर्वधातुभ्यः, संविदपेक्षया च स्त्रीलिङ्गत्वे, कृदिकारादिति ङीष् इति पठनीयम्।

अत्र "सर्वधातुभ्य इन्" इत्यौणादिकं सूत्रम् [४।११७]। इक्प्रत्ययेन प्रकरीपदस्य सिद्धिर्न सम्भवति, इकः कित्त्वात् तत्सन्नियोगेन गुणप्रतिषेधात्। संविदपेक्षया च इत्यस्यानन्तरं छेदोऽपि न युज्यते, संविदपेक्षया स्त्रीलिङ्गत्वे इति वक्तुमभीष्टत्वात्। कृदिकारादक्तिनः इति बह्वादिगणे [पा० ४।१।४५] पठितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन्नेव पृष्ठे दृश्यते—एवं सुग्रीवविभीषणप्रभृतिरपि रामादिनोपक्रियमाणे रामादेरात्मनश्चोपकाराय प्रभवमाने प्रसिद्धिप्राशस्त्ये सम्पादयतीति। इति। अस्मदीयप्रतिलिप्यां रामादिनोपक्रियमाणे इत्यत्र रामादिनोऽर्थक्रियामारभमाणो [fol. 498] इति पाठः। यस्य हस्तलिखितपुस्तकस्य प्रतिलिपिरस्माकं सविधे वर्तते तदवश्यमेव सन्दृष्टं श्रीरामकृष्णकविमहोदयैः। न जानीमः किमिति तद्गतानि पाठान्तराणि नोल्लिखितानीति। अत्र कदाचित्—एवं सुग्रीवविभीषणप्रभृतिरपि रामादेरर्थक्रियामारभमाणो रामादेरात्मनश्चोपकाराय प्रकल्पमानः प्रसिद्धिप्राशस्त्ये सम्पादयतीति पाठः स्यात्।

अवश्यं रक्षणीयमिदं पुस्तकं विद्यालयानां पुस्तकागारेषु सयत्नमनुशीलनीयं च काव्यनाटकानामध्येतृभिश्चाध्यापकैश्च। सर्वथा धन्यवादार्हाः श्रीरामकृष्णकविमहोदया अस्य प्रकाशनेन। अवशिष्टानां च भागानां प्रकाशनं साग्रहं प्रतीक्ष्यतेऽस्माभिः।

रत्नावली। श्रीहर्षदेवविरचिता। Edited with Introduction, translation and notes by C. R. Devadhar, M. A. and N. G. Suru M. A. Poona Oriental Book House, 330 A Sadashiv, Poona 2. Price : Rs. 3/4/-

संस्कृतभाषया यास्तावच्छ्रेष्ठा नाटिका विरचितास्तास्वेवायमन्यतमा रत्नावली नाम। नाटकलक्षणकृद्भी रत्नावलीगताः श्लोका बहुशः समुद्धृताः। मन्ये नाट्यालङ्कारादीनामुदाहरणरूपेणैव रत्नावल्यवतीर्णेति। नाटिकेयं बहुत्र पाठ्यरूपेण निर्दिष्टा वर्तते। विद्वद्वर्याभ्यां देवधरसुरुमहाभागाभ्यां महता यत्नेन च्छात्राणां कृत आङ्गलानुवादव्याख्यानोपोद्घातादिभिः संयोज्य नाटिकेयं मुद्रितासीत्। इदानीमस्या द्वितीयं मुद्रणं सञ्जातम्। अत्र च्छात्राणामावश्यकाः सर्व एव विषयाः सरलया सुबोधया चाङ्गलभाषया विशदीकृताः। आदौ तावत् ३३ पृष्ठपरिमित उपोद्घाते श्रीहर्षस्यावस्थानकालादिकम् उदयनकथानां मूलादिकं च विचारितम्। ततश्च वामे पृष्ठे रत्नावल्या मूलं दक्षिणे च पृष्ठे आङ्गलानुवादः, अन्ते च आङ्गलभाषामयी व्याख्या समानवाक्यादीनि च विराजन्ति। अवश्यं संग्राह्यमिदं पुस्तकं छात्रै रक्षणीयं चेदं विद्यालयानां ग्रन्थागारेषु।

अत्र तृतीयपृष्ठे दृश्यते—क्षिप्तः कुसुमाञ्जलिरन्तरे विश्लिष्यन् वः पातु। By वः we are to understand 'all the people'—युष्मानस्मानन्यांश्च as Nigudkar Sastri has pointed out, त्यदादीनि सर्वैर्नित्यमित्येकशेषः। इति। निगुडकरशास्त्रिणां व्याख्याने दृश्यते—व इति 'त्यदादीनि सर्वैर्नित्यं (?)' इत्येकशेषः। युष्मानस्मानन्यांश्च। सर्वानिति यावत्। एतेन व इत्यस्य युष्मानित्यर्थकरणं व्याकरणानभिज्ञत्वमूलकम्। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतत्तु न समीचीनतया प्रतिभाति। यद्यपि पूर्वशेषदर्शनाच्च इति वर्तते वार्त्तिकम्, तथापि युष्मदस्मदोर्युष्मच्छेषः कदापि न सम्भवतीति नः प्रतीतिः। उत्तममध्यमयोरेकशेषे उत्तमस्यैवावस्थितिर्न पुनर्मध्यमस्य। अत एव वःशब्दस्यार्थौ युष्मानन्यांश्च न पुनर्युष्मानस्मानन्यांश्चेति।

ईदृशेषु केषुचिद्विषयेषु मतद्वैधसत्त्वेऽपि सर्वथा शोभन एव समालोच्यमानो ग्रन्थोऽतिमात्रमुपादेयश्चेति शिवम्।

सुमतिशतकम्। श्रीतारासिंहसंस्कृतकलाशलाया अध्यक्षैः श्री ति. गु. वरदाचार्यैरान्ध्रया अनूदितम्। V. Ramaswami Sastrulu and Sons, Madras 21 इत्यतो लभ्यम्।

भारतवर्षस्य सर्वास्वेव देशभाषासु सुरसरस्वत्यामिव सुबहव उपदेशश्लोका विराजन्ते। तेषां देववाण्या प्रकाशे सर्वेषामेव भारतीयानामुपकारो भवति। अत एव प्रशंसनीयतमोऽयं समुद्यमो वरदाचार्यामहोदयानाम्। अनुवादस्य भाषायां प्रायेण प्रसादः प्रज्वलति, क्लिष्टता च न दृश्यते। केचनात्रत्याः श्लोका वाचकमहोदयानां परितृप्त्या उद्धियन्ते।

सोदरः परनारीणां तुष्टः परहिते रतः।
स्तुतिनिन्दासमो यः स सुमते पुरुषोत्तमः॥
रिक्तहस्तेन नोपेयाद् दैवतं भूपतिं गुरुम्।
प्रेयसीं तनयं धीमानवेप्सुः सुमते शुभम्॥
मा रज्यस्व परस्त्रीषु परस्वानि च मा गृधः।
मा परानवभाषस्व मार्ष्यतां सुमतेऽधमः॥

द्वित्रेषु श्लोकेषु "न पादादौ खल्वादयः" इति शास्त्रशासनमुल्लङ्घ्य पादादौ चकारः प्रयुक्तोऽनुवादकैः। आशास्यते दोषोऽयं पुनर्मुद्रणावसरे निराक्रियेतेति शिवम्।

सप्रमोदाङ्गीकारः

Social and Religious Life in the Grihya Sutras by V. M. Apte, M. A., Ph. D, (Cantab). The Popular Book Depot, Lamington Road, Bombay 7. Rs. 15/-

अतिमात्रं समीचीनस्यास्य पुस्तकस्य समालोचनमागामिनि मासे प्रकाशयिष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Works by Pandita Kshama Row

The following works of Pandita Kshama Row, all wristen in simple and elegant Sanskrit aud absolutely free from vulgarity are indispensable to all teachers and students of Sanskrit and should find an honoured place in all school and college libraries.

They may be obtained from Srimati Lila Dayal, 37, New Marine Lines, Bombay and N. M. Tripathi Ltd. Book-Sellers, Bombay—2.

Satyagraha Gita	Rs.	2	8
Uttara Satyagraha Gita ...	„	6	12
Sankara Jivanakhyaniyam ...	„	2	0
Mira Lahari with English Translation	„	2	8
Sri Tukaram Charitam with English Translation.	„	5	8
Kathapanchakam	„	1	0
Vichitra Parishad Yatra ...	„	0	12
Sri Ramdasa Charitam with English Translation	„	5	0
Kathamuktavali (in the press)	„	5	0
Grama-Jyotih	„	1	8

A No Bhadriyam

One of the most inspiring hymns of the Rigveda with the critically edited commentaries of (1) Venkatamadhava, (2) Skandasvamin, (3) Mahidhara, (4) Sayana and (5) Kashypa and extracts from the commentaries of Uvata, Haradatta and others, English translation, critical and explanatory notes-parallels from other languages etc. etc. Rs. 2/8/-

Visvanath Chatterji

81 Shyambazar Street, Calcutta 4.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M. A., D. Litt.

Formerly Editor, Calcutta Oriental Journal, Surabharati, Oriental Literary Digest, etc, etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel ? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha, bha, lat, lit,* etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers"**

Price Rupees Twelve only. *Foreign Rs. 14/-*

Postage Extra

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

Printed and published by Sri Visvanath Chatterjee, B.A. from 81, Shyambazar Street, Calcutta—4. Printed at the Gupta Press, 37/7, Baniatola Lane, Calcutta—9.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

111077

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri